# श्रीवज्रस्वामिचरितम्





रम्यरेणुः

श्री परिशिष्टपर्वान्तर्गतम्

# श्रीवज्रस्वामिचरितम्

## ( द्वादशः सर्गः )

कर्तारः - कलिकालसर्वज्ञश्रीहेमचन्द्राचार्याः

आशीर्दायकाः

प.पू. श्रीअरविन्दसूरिमहाराजाः ।

प.पू. श्रीयशोविजयसूरिमहाराजाः ।

प.पू. श्रीमुनिचन्द्रसूरिमहाराजाः ।

प.पू. श्रीभाग्येशविजयसूरिमहाराजाः ।

प्रेरणापीयूषपायकाः

प.पू. श्रीवज्रसेनविजयमहाराजाः

सम्पादिका

रम्यरेणुः

द्रव्यसहायकः

खारोइ जैन श्वे.मू.पू. संघः

खारोइ ( कच्छ )

द्रव्यसहायकः

खारोइ जैन श्वे.मू.पू. संघः

खारोइ ( कच्छ )

सम्पादिका संवत-२०६५ वीर सं. २०३६

रम्यरेणुः प्रथमावृत्ति नकल : १०००

इ.सन् : २००९

કિં. રૂા. ૫૦-૦૦

प्रकाशक :

विजयभद्र चेरीटेबल ट्रस्ट

श्री पार्श्वभक्तिनगर, हाईवे,

भीलडी ( बनासकांठा )

फोन : ( ०२७४४ ) २३३१२९

प्राप्तिस्थान

भरत ग्राफिक्स
न्यु मार्केट, पांजरापोळ,
रिलीफ रोड, अहमदाबाद-१.
फोन : ९९२५०२०१०६

चन्द्रकान्तभाई एस. संघवी
बी-६, अशोका कोम्पलेक्ष,
रेल्वे गरनाळा पासे,
पाटण ( उ.गु. )
मो : ९९०९४६८५७२


(તા.ક. આ પુસ્તક જ્ઞાનદ્રવ્યમાંથી તૈયાર થયું હોવાથી
ગૃહસ્થોએ મૂલ્ય આપીને જ માલિકી કરવી.)

मुद्रक : भरत ग्राफिक्स

न्यु मार्केट, पांजरापोळ, रिलीफ रोड, अहमदाबाद-१.

फोन : ०७९-२२१३४१७६, मो : ९९२५०२०१०६

શ્રી શંખેશ્વર પાર્શ્વનાથાય નમઃ



रम्यास्य-दिव्यदीपस्य, हेमज्योतिः सुहर्षदम् ।
स्यात्सदा भव्यलोकानां, श्रीशङ्खेश्वरपार्श्व ! ते ॥



પૂ. આ. શ્રી ભાગ્યેશવિજયસૂરિજી મ.
પૂ. આ. યશોવિજયસૂરિ મ.
પૂ. આ. શ્રી ૐકારસૂરિ મ.
પૂ. આ. શ્રી ભદ્રસૂરિ મ.
પૂ. આ. અરવિંદસૂરિ મ.
પૂ. શ્રી મુનિચંદ્રસૂરિ મ.

# યત્કિંચિત્

## 'वयः क्रीडति वज्रो न क्रीडति...'

મારે વજસ્વામીજીને મળવું છે. ક્યાં મળશે ? બહાર ચોકમાં રમતા એક બાળમુનિને એક ભાઈએ પૂછ્યું...

બાળમુનિએ કહ્યું - 'સામે ઉપાશ્રય છે તેનું મુખદ્વાર પેલી બાજુ છે તે બાજુથી ઉપાશ્રયમાં જાવ... ભાઈ સૂચન પ્રમાણે આગળ વધ્યા... ને બાળમુનિ ઉપાશ્રયના પાછળના દ્વારથી ઉપાશ્રયમાં પ્રવેશી આસન પર બેસી ગયા... પેલી તરફ ભાઈ ઉપાશ્રયમાં આવ્યા... પૂછ્યું એક મહાત્માને કે વજસ્વામીજી ક્યાં છે ?

આ સામે આસન ઉપર બિરાજતાં બાળમુનિ એ વજસ્વામી છે... ઓહ ! આ તો પેલા મહારાજ જે બહાર રમતાં હતાં...

ત્યાં ગયો... વંદન કર્યું. પૂછ્યું - આપ વજસ્વામીજી...? 'હા...' તો આપ તો રમતા હતા ને... 'ના.' હું ક્યાં રમતો હતો ? મારી ઉંમર રમતી હતી... 'वयः क्रीडति वज्रो न क्रीडति...'

આવી પ્રચંડ પ્રજ્ઞાના સ્વામિ, જન્માંતરીય ક્ષયોપશમ ને વૈરાગ્યની પ્રચંડ ધારાને લઈને જન્મેલા, જન્મતાં જેમને જાતિસ્મરણ જ્ઞાન થયું છે તેવા. જન્મથી આ જીવન જેમને કાચું પાણી પીધું નથી એવા... જ્ઞાનદૃષ્ટિ સંપન્ન મેધાવી, મર્યાદી, અપ્રમત્તી મહાપુરુષ શ્રી વજસ્વામિજી મહારાજનું જીવન ચરિત્ર પરિશિષ્ટ પર્વમાં સર્ગ નં. ૧૨ માં પૂજ્યપાદ સિદ્ધહસ્ત લેખક કલિકાલસર્વજ્ઞ,- આચાર્ય ભગવંત શ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજાએ આલેખ્યું છે. સરળ ને સુબોધ સંસ્કૃત ભાષા છે. શ્લોકે શ્લોકે ઉપમાઓ છે. આ વજસ્વામિજી ચરિત્ર પર સંસ્કૃત

ભાષાના પ્રાથમિક અભ્યાસી જેમને બે બુક થયેલી છે તેવા અભ્યાસુકો પણ સરળતાથી વાંચી વ્યાકરણ સંબંધી બોધને સુદઢ બનાવે તે હેતુથી પૂજ્યપાદ સંઘ એકતાશિલ્પી આ.ભ. શ્રી ૐકારસૂરીશ્વરજી મહારાજાનાં સમુદાયના સાધ્વીજી શ્રી માતૃહૃદયા પૂ. રમ્યગુણાશ્રીજી મહારાજના શિષ્યા સાધ્વી શ્રી દિવ્યગુણાશ્રીજી મહારાજે સરળ સંસ્કૃત બોધાત્મક સમાસાદિ બનાવ્યા છે. પ્રયાસઃ સ્તુત્ય છે. ઉદ્દેશ્ય છેક સામાન્ય અભ્યાસુ સુધી પહોંચવાનો છે ને તે દ્વારા જૈન ચરિત્ર ગ્રંથનો પ્રચાર-પ્રસાર થાય સાથે સાથે વાચક આવા વજ્રસ્વામિજી જેવા મહાપુરુષોના ગુણોથી ભાવિત થઈ સ્વગુણ ઉદ્‌ઘાટનનો ક્ષયોપશમ પ્રાપ્ત કરે એ મંગલ આશય છે... આ આશય સાર્થક બને એ જ મંગલ કામના. પૂજ્યપાદ પરોપકારી પં. **શ્રી વજ્રસેનવિજયજી મ.સા.**ની મંગલ પ્રેરણા પુસ્તક તૈયાર કરવા પાછળનું પીઠબળ છે.

આ પ્રસ્તુત પુસ્તક પ્રકાશનનો લાભ કચ્છવાગડમાં રહેલ અમારા શ્રી ખારોઈ જૈન સંઘને મળેલ છે. તે અમારું અહોભાગ્ય છે. મનફરા ચાતુર્માસ બિરાજમાન પૂજ્ય આ.ભ. શ્રી અરવિંદસૂરિ મ.સા. તથા પૂ.આ.ભ. શ્રી યશોવિજયસૂરિ મ.સા.ની આજ્ઞાથી અમારે ત્યાં પર્યુષણ માટે પધારેલા પૂ. મુનિરાજ શ્રી મોક્ષેશવિજયજી મહારાજ તથા સાધ્વીજી શ્રી રમ્યગુણાશ્રીજી મ. આદિએ ખૂબ સુંદર આરાધના કરાવી. એ આરાધનાની અનુમોદનાર્થે પ્રસ્તુત પ્રકાશનનો લાભ અમારા શ્રી સંઘને મળ્યો છે. અમારો શ્રી સંઘ હર્ષની લાગણી અનુભવે છે. આપ સૌ આ ગ્રંથના વાંચન દ્વારા મુનિભાવ-મૌનભાવ-સમત્વભાવને આત્મસાત્ કરો એ જ મંગલ પ્રાર્થના...

**- લિ. શ્રી ખારોઈ જૈન સંઘ.**

# समाससंकेतसूचिः

(१) **अव.पू.क.** - अवधारणपूर्वपदकर्मधारयसमासः ।

(२) **अव्य.ब.व्री.** - अव्ययबहुव्रीहिसमासः ।

(३) **अव्य.भा.** - अव्ययीभावसमासः ।

(४) **इ.द्व.** - इतरेतरद्वन्द्वसमासः ।

(५) **उप.उत्त.क.** - उपमानोत्तरपदकर्मधारयसमासः ।

(६) **उप.त.पु.** - उपपदतत्पुरुषसमासः ।

(७) **उप.पू.क.** - उपमानपूर्वपदकर्मधारयसमासः ।

(८) **उप.ब.व्री.** - उपमानबहुव्रीहिसमासः ।

(९) **एक.द्व.** - एकशेषद्वन्द्वसमासः ।

(१०) **कु.पू.क.** - कुपूर्वपदकर्मधारयसमासः ।

(११) **च.त.पु.** - चतुर्थीतत्पुरुषसमासः ।

(१२) **तृ.त.पु.** - तृतीयातत्पुरुषसमासः ।

(१३) **द्विगु.क.** - द्विगुकर्मधारयसमासः ।

(१४) **द्वि.त.पु.** - द्वितीयातत्पुरुषसमासः ।

(१५) **नञ्.त.पु.** - नञ्तत्पुरुषसमासः ।

(१६) **नञ्.ब.व्री.** - नञ्बहुव्रीहिसमासः ।

(१७) **पं.त.पु.** - पञ्चमीतत्पुरुषसमासः ।

(१८) **प्रादि.क.** - प्रादिकर्मधारयसमासः ।

(१९) **प्रादि.तत्पु.** - प्रादिविभक्तितत्पुरुषसमासः ।

(२०) **प्रादि.ब.व्री.** - प्रादिबहुव्रीहिसमासः ।

(२१) **म.प.लो.क.** - मध्यमपदलोपिकर्मधारयसमासः ।

(२२) **मयू.व्यं.क.** - मयूरव्यंसकादिकर्मधारयसमासः ।

(२३) **वि.उत्त.क.** - विशेषणोत्तरपदकर्मधारयसमासः ।

(२४) **वि.उभ.क.** - विशेषणोभयपदकर्मधारयसमासः ।

(२५) **वि.पू.क.** - विशेषणपूर्वपदकर्मधारयसमासः ।

(२६) **व्यधि.ब.व्री.** - व्यधिकरणबहुव्रीहिसमासः ।

(२७) **व्यधि.ब.प.ब.व्री.** - व्यधिकरणबहुपदबहुव्रीहिसमासः ।

(२८) **ष.त.पु.** - षष्ठीतत्पुरुषसमासः ।

(२९) **संख्या.ब.व्री.** - संख्यार्थबहुव्रीहिसमासः ।

(३०) **स.त.पु.** - सप्तमीतत्पुरुषसमासः ।

(३१) **समा.द्व.** - समाहारद्वन्द्वसमासः ।

(३२) **समा.ब.व्री.** - समानाधिकरणबहुव्रीहिसमासः ।

(३३) **समा.ब.प.ब.व्री.** - समानाधिकरणबहुपदबहुव्रीहिसमासः ।

(३४) **सह.ब.व्री.** - सहार्थबहुव्रीहिसमासः ।

(३५) **सु.पू.क.** - सुपूर्वपदकर्मधारयसमासः ।

(३६) **सुप्सुप्स.** - सुप्सुप्समासः ।

# श्री परिशिष्ट पर्व

## द्वादशः सर्गः

**सुहस्तिनो[2]ऽन्वये[3] वज्रस्वामी[6] च[7] क्रमयोगतः[4] ।**
**अभूत्[8]प्रवचनाधार[5]स्तत्कथा[9]ऽथ[1] प्रपञ्च्यते[10] ॥ १ ॥**

**अन्वय :-** अथ सुहस्तिनः अन्वये क्रमयोगतः प्रवचनाधारः वज्र-स्वामी च अभूत् तत्कथा प्रपञ्च्यते ।

अन्वये-वंशे, 'अन्वयो जननं वंशः' इत्यभिधाने (५०३)।

**समास :-** (१) वज्रस्वामी – वज्रश्चासौ स्वामी च इति वज्रस्वामी । (वि.उ.क.)

(२) क्रमयोगतः – क्रमस्य योगः इति क्रमयोगः, तस्मात् क्रमयोगतः । (ष. त. पु.)

(३) प्रवचनाधारः – प्रवचनस्य आधारः इति प्रवचनाधारः । (ष. त. पु.)

(४) तत्कथा – तस्य कथा इति तत्कथा । (ष.त.पु.)

**इहैव[1][3] जम्बूद्वीपे[2], प्राग्भरतार्धविभूषणम्[4] ।**
**अवन्ति[7]रिति[8] देशो[9]ऽस्ति[10], स्वर्गदेशीय[6] ऋद्धिभिः[5] ॥ २ ॥**

**अन्वय :-** इह जम्बूद्वीपे एव प्राग्भरतार्धविभूषणम् ऋद्धिभिः स्वर्ग-देशीयः अवन्तिः इति देशः अस्ति ।

**समास :-** (१) जम्बूद्वीपे – (A) जम्ब्वा (वृक्षेण) उपलक्षितः इति जम्बूपलक्षितः । (तृ.त.पु.)

(B) जम्बूपलक्षितः द्वीपः इति जम्बूद्वीपः, तस्मिन् जम्बूद्वीपे । (म.प.लो.क.)

(२) प्रागभरतार्धविभूषणम् - (A) भरतस्य अर्धम् इति भरतार्धम् । (ष.त.पु.)

(B) प्राक् च तद् भरतार्द्धं च इति प्राग्भरतार्द्धम् । (वि.पू.क.)

(C) प्राग्भरतार्द्धस्य विभूषणम् इति प्राग्भरतार्द्धविभूषणम् । (ष. त. पु.)

(३) स्वर्गदेशीयः - ईषद् असमाप्तः स्वर्गः इति स्वर्गदेशीयः ।

"अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्" (७।३।११) इति देशीयर् प्रत्ययः ।

**तत्र[1] तुम्बवनम्[8]इति[9], विद्यते[11] सन्निवेशनम्[10] ।**
**निवेशनम्[3]इव[4] श्रीणाम्[2], द्युसदाम्[5]अपि[6] हर्षदम्[7] ॥ ३ ॥**

**अन्वय :-** तत्र श्रीणां निवेशनम् इव द्युसदाम् अपि हर्षदं तुम्बवनम् इति सन्निवेशनं विद्यते ।

निवेशनम् - स्थानम् "निवेशनमधिष्ठानं स्थानीयं निगमोऽपि च" । इत्यभिधाने (९७२) ।

**समास :-** (१) तुम्बवनम् - (A) तुम्बः प्रधानः यस्मिन् तद् इति तुम्बप्रधानम् । (समा.ब.व्री.)

(B) तुम्बप्रधानं वनम् इति तुम्बवनम् । (म.प.लो.क.)

(२) द्युसदाम् - दिवि सीदन्ति इति द्युसदः, तेषां द्युसदाम् । (उप. त. पु.) क्विप् प्रत्ययः ।

(३) हर्षदम् - हर्षं ददाति इति हर्षदः, तं हर्षदम् । (उप. त. पु.)आतो डोऽह्वा० ५।१।७६ ड प्रत्ययः ।

**बभूव[१०] श्रावक[९]स्तत्र[१], श्रियो[२] देव्या[३] इवा[५]त्मजः[४] ।**
**इभ्यपुत्रो[७] धनगिरि[८]र्गिरीकृतधनोच्चयः[६] ।। ४ ।।**

**अन्वय :-** तत्र श्रियः देव्याः आत्मजः इव गिरीकृतधनोच्चयः इभ्यपुत्रः धनगिरिः श्रावकः बभूव ।

इभ्यः - धनाढ्यः । "इभ्य आढ्यो धनीश्वरः । ऋद्धे" इत्यभिधाने (३५७) । उच्चयः - राशिः ।

**समास :-** (१) आत्मजः - आत्मनो जातः इति आत्मजः । (उप.त.पु.) अजातेः पञ्चम्याः ५।१।१७० ड प्रत्ययः।

(२) गिरीकृतधनोच्चयः - (A) न गिरिः इति अगिरिः । (नञ्.त.पु.)

(B) अगिरिः गिरिः कृतः इति गिरीकृतः। (गति. त.पु.)

(C) धनस्य उच्चयः इति धनोच्चयः । (ष.त.पु.)

(D) गिरीकृतः धनोच्चयः येन सः इति गिरीकृतधनोच्चयः । (समा. ब.व्री.)

(३) इभ्यपुत्रः - इभ्यस्य पुत्रः इति इभ्यपुत्रः । (ष.त.पु.)

**मध्यमेना[१]पि[३] वयसा[२], तस्य[५] भूषितवर्ष्मणः[४] ।**
**हृदये[७] ना[९]विशत्[१०]कामः[८], प्रशमद्वाःस्थरक्षिते[६] ।। ५ ।।**

**अन्वय :-** मध्यमेन वयसा अपि भूषितवर्ष्मणः तस्य प्रशमद्वाः-स्थरक्षिते हृदये कामः न अविशत् ।

वर्ष्म - शरीरम्, 'वपुः पुद्गलवर्ष्मणी । कलेवरं शरीरम्" इत्यभिधाने । (५६४)

**समास :-** (१) भूषितवर्ष्मणः - भूषितं वर्ष्म यस्य सः इति भूषितवर्ष्मा, तस्य भूषितवर्ष्मणः । (समा.ब.व्री.)

(२) प्रशमद्वाःस्थरक्षिते - (A) द्वारि तिष्ठति इति द्वाःस्थः । (उप.त.पु.) स्था-पा-स्ना-त्रः कः ५।१।१४२ क प्रत्ययः ।

(B) प्रशम एव द्वाःस्थः इति प्रशमद्वाःस्थः । (अव.पू.क.)

(C) प्रशमद्वाःस्थेन रक्षितम् इति प्रशमद्वाःस्थरक्षितम्, तस्मिन् प्रशमद्वाःस्थरक्षिते । (तृ. त. पु.)

**धर्मादर्थो भवतीति, न्यायशास्त्रेष्वधीयते ।**
**सोऽर्थादपि व्यधाद्धर्मम्, पात्रेभ्योऽर्थं नियोजयन् ॥६॥**

**अन्वय :-** न्यायशास्त्रेषु धर्माद् अर्थः भवति इति अधीयते अपि पात्रेभ्यः अर्थं नियोजयन् सः अर्थाद् धर्मं व्यधात् ।

**समास :-** (१) न्यायशास्त्रेषु- (A) न्यायं सूचयन्ति इति न्यायसूचकानि । (उप.त.पु.)

(B) न्यायसूचकानि शास्त्राणि इति न्यायशास्त्राणि, तेषु न्यायशास्त्रेषु । (म.प.लो.क.)

**ब्रह्मचर्यपरीणामम्, स्वर्गमोक्षफलं विदन् ।**
**इयेष कन्यां नोद्वोढुम्, सोऽर्हद्धर्मपरायणः ॥ ७ ॥**

**अन्वय :-** स्वर्गमोक्षफलं ब्रह्मचर्यपरीणामं विदन् अर्हद्धर्मपरायणः सः कन्याम् उद्वोढुं न इयेष ।

परायणः - तत्परः, "अथ तत्परः" ॥ ३८४ ॥

आसक्तः प्रवणः प्रह्वः, प्रसितश्च परायणः॥ इत्यभिधाने (३८५)

**समास :-** (१) ब्रह्मचर्यपरीणामम् - (A) ब्रह्मणि चरतीति ब्रह्मचरः । (उप.त.पु.) चरेष्टः ५।१।१३८ ट प्रत्ययः ।

(B) ब्रह्मचरस्य भावः इति ब्रह्मचर्यम् । (तद्धित)

(C) ब्रह्मचर्यस्य परीणामः इति ब्रह्मचर्यपरीणामः, तं ब्रह्मचर्यपरीणामम् । (ष.त.पु.)

(२) स्वर्गमोक्षफलम् - (A) स्वर्गश्च मोक्षश्च इति स्वर्गमोक्षौ । (इ.द्वन्द्व)

(B) स्वर्गमोक्षौ फलं यस्य सः इति स्वर्गमोक्षफलः, तं स्वर्गमोक्षफलम् । (समा.ब.व्री.)

(३) अर्हद्धर्मपरायणः-(A) अर्हतः धर्मः इति अर्हद्धर्मः । (ष. त. पु.)

(B) अर्हद्धर्मे परायणः इति अर्हद्धर्मपरायणः । (स.त.पु.)

**यत्र[५] यत्र[६] कुले[७] कन्याम्[८], धनगिर्यर्थ[४]मादृतौ[२] ।**
**प्रार्थयेते[९] स्म[१०] पितरौ[३], तदुद्वाहमहोत्सवे[१] ॥ ८ ॥**
**तत्र[११] तत्र[१२] धनगिरि[१३]र्गत्वा[१५] स्वयं[१४]मचीकथत्[१६] ।**
**अहं[१८] हि[१७] प्रव्रजिष्यामि[१९], दोषो[२२]ऽस्ति[२४] मे[२१] न[२३] जल्पतः[२०]॥९॥**

**( युग्मम् )**

**अन्वय :-** तदुद्वाहमहोत्सवे आदृतौ पितरौ धनगिर्यर्थं यत्र यत्र कुले कन्यां प्रार्थयेते स्म तत्र तत्र धनगिरिः स्वयं गत्वा अचीकथत् हि अहं प्रव्रजिष्यामि (इति) जल्पतः मे दोषः न अस्ति ।

**समास :-** (१) धनगिर्यर्थम् - धनगिरेः अर्थम् इति धनगिर्यर्थम् । (ष.त.पु.)

(२) पितरौ-माता च पिता च इति मातापितरौ-पितरौ । (एक. द्व.)

(३) तदुद्वाहमहोत्सवे – (A) तस्य उद्वाहः इति तदुद्वाहः ।
(ष. त. पु.)

(B) महाँश्चासौ उत्सवश्च इति महोत्सवः ।
(वि.पू.क.)

(C) तदुद्वाहस्य महोत्सवः इति तदुद्वाहमहोत्सवः, तस्मिन् तदुद्वाहमहोत्सवे । (ष. त. पु.)

**इतश्[1]च[2] धनपालस्य[4], महेभ्यस्य[3] तु[11] नन्दना[5] ।**
**सुनन्दो[6]चे[7] धनगिरे[9]र्देया[10]ऽहं[8] सो[12]ऽस्तु[15] मे[13] पतिः[14] ॥ १० ॥**

**अन्वय :-** इतः च महेभ्यस्य धनपालस्य नन्दना सुनन्दा ऊचे अहं धनगिरेः देया तु सः मे पतिः अस्तु ।
नन्दना – पुत्री ।

**समास :-** (१) महेभ्यस्य – महाँश्चासौ इभ्यश्च इति महेभ्यः, तस्य महेभ्यस्य । (वि.पू.क.)

**महेभ्यो[1] धनपालो[2]ऽपि[3], स्वयंवरपरायणाम्[4] ।**
**प्रददौ[9] धनगिरये[8], दीक्षाम्[5]अपि[7] जिघृक्षवे[6] ॥ ११ ॥**

**अन्वय :-** महेभ्यः धनपालः अपि स्वयंवरपरायणां (तां) दीक्षां जिघृक्षवे अपि धनगिरये प्रददौ ।

**समास :-** (१) महेभ्यः:- पूर्ववत् ।

(२) स्वयंवरपरायणाम् – (A) स्वयं व्रियतेऽस्मिन् इति स्वयंवरः (उप.त.पु.) पुंनाम्नि घः ५।३।१३० घ प्रत्ययः ।

(B) स्वयंवरे परायणा इति स्वयंवरपरायणा, तां स्वयंवरपरायणाम् । (स.त.पु.)

(३) जिघृक्षवे – ग्रहीतुम् इच्छुः इति जिघृक्षुः, तस्मै जिघृक्षवे । (इच्छार्थक सन् + उ प्रत्ययः)

**भ्राताऽऽर्यशमितो नाम, सुनन्दायाः पुराऽग्रहीत् ।**
**परिव्रज्यां सिंहगिरेराचार्यस्यांह्रिसन्निधौ ॥१२॥**

**अन्वय :-** पुरा सिंहगिरेः आचार्यस्य अंह्रिसन्निधौ आर्यशमितः नाम सुनन्दायाः भ्राता परिव्रज्याम् अग्रहीत् ।

**समास :-** (१) अंह्रिसन्निधौ-अंह्रेः सन्निधिः इति अंह्रिसन्निधिः, तस्मिन् अंह्रिसन्निधौ । (ष. त. पु.)

**अन्यदा तु ऋतुस्नाताम्, सुनन्दां ब्रह्मधीरपि ।**
**भेजे धनगिरिर्भोगफलम्, कर्म हि नान्यथा ॥१३॥**

**अन्वय :-** अन्यदा तु ब्रह्मधीः अपि धनगिरिः ऋतुस्नातां सुनन्दां भेजे हि भोगफलं कर्म अन्यथा न (स्यात्) ।

**समास :-** (१) ऋतुस्नाताम् - ऋतौ स्नाता इति ऋतुस्नाता, ताम् ऋतुस्नाताम् । (स.त.पु.)

(२) ब्रह्मधीः - ब्रह्मणि धीः यस्य सः इति ब्रह्मधीः । (व्यधि.ब.व्री.)

(३) भोगफलम्-भोगः फलं यस्य तद् इति भोगफलम् । (समा.ब.व्री.)

**इतश्चाष्टापदगिरौ, गौतमस्वामिना किल ।**
**प्ररूपितं पुण्डरीकाध्ययनं ह्यवधारितम् ॥१४॥**

**पुरा येन वैश्रमणसामानिकदिवौकसा ।**
**स प्रच्युत्यावततार, सुनन्दायास्तदोदरे ॥१५॥**

**[ युग्मम् ]**

**अन्वय :-** इतः च किल पुरा अष्टापदगिरौ गौतमस्वामिना प्ररूपितं पुण्डरीकाध्ययनं येन वैश्रमणसामानिकदिवौकसा अवधारितं सः हि तदा प्रच्युत्य सुनन्दायाः उदरे अवततार ।

**समास :-** (१) अष्टापदगिरौ- (A) अष्टापदः नाम यस्य सः इति अष्टापदनामा । (समा.ब. व्री.)

(B) अष्टापदनामा गिरिः इति अष्टापदगिरिः, तस्मिन् अष्टापदगिरौ । (म.प.लो.क.)

(२) गौतमस्वामिना-गौतमश्चासौ स्वामी च इति गौतमस्वामी, तेन गौतमस्वामिना । (वि.उ.क.)

(३) पुण्डरीकाध्ययनम्-(A) पुण्डरीकस्य कथनं यस्मिन् तद् इति पुण्डरीककथनम् । (समा.ब.व्री.)

(B) पुण्डरीककथनम् अध्ययनम् इति पुण्डरीकाध्ययनम् । (म.प.लो.क.)

(४) वैश्रमणसामानिकदिवौकसा - (A) वैश्रमणश्चासौ सामानिकश्च इति वैश्रमणसामानिकः । (वि.उ.क.)

(B) दिवा ओकः यस्य सः इति दिवौकाः । (अव्य.ब.व्री.)

(C) वैश्रमणसामानिकश्चासौ दिवौकाश्च इति वैश्रमणसामानिकदिवौकाः, तेन वैश्रमणसामानिकदिवौकसा । (वि.पू.क.)

**अन्तर्वत्नीं[४] धनगिरि[२]स्तां[३] ज्ञात्वो[५]चे[६] विशुद्धधीः[१] ।**
**एष[७] गर्भो[८] द्वितीय[१०]स्ते[९], भविता[११] प्रव्रजाम्य[१३]हम्[१२] ॥१६॥**

**अन्वय :-** विशुद्धधीः धनगिरिः ताम् अन्तर्वर्त्नीं ज्ञात्वा ऊचे एषः गर्भः ते द्वितीयः भविता अहं प्रव्रजामि ।

अन्तर्वत्नीम् - गर्भवतीम् "अन्तर्वत्नी गुर्विणी स्याद् गर्भवत्युदरिण्यपि" ॥५३८॥ आपन्नसत्त्वा गुर्वीच, इत्यभिधाने (५३९)

**समास :-** (१) अन्तर्वत्नीम् - अन्तर्विद्यतेऽस्यामन्तर्वत्नी, ताम् अन्तर्वत्नीम् । तदस्या० ७।२।१.. मतु प्रत्ययः पतिवत्न्यन्त० २।४।५३.. ङी प्रत्ययः ।

(२) विशुद्धधीः- विशुद्धा धीः यस्य सः इति विशुद्धधीः । (समा.ब.व्री.)

**अमनीषित एवाभूत्, सम्बन्धोऽपि त्वया सह ।**
**प्रव्रज्यैव प्रेयसी मेऽतःपरं स्वस्ति ते पुनः ॥१७॥**

**अन्वय :-** त्वया सह अमनीषितः एव सम्बन्धः अभूत् अपि अतः परं प्रव्रज्या एव मे प्रेयसी पुनः ते स्वस्ति ।

**समास :-** (१) अमनीषितः-न मनीषितः इति अमनीषितः । (नञ्.त.पु.)

**इत्युक्त्वा तां धनगिरिरवक्रयकुटीमिव ।**
**हित्वा सिंहगिरिगुरोः, पार्श्वे गत्वाऽभवद्यतिः ॥१८॥**

**अन्वय :-** इति उक्त्वा धनगिरिः अवक्रयकुटीम् इव तां हित्वा सिंहगिरिगुरोः पार्श्वे गत्वा यतिः अभवत् ।

**समास :-** (१) अवक्रयकुटीम् - (A) अवक्रयेण गृहीता इति अवक्रयगृहीता । (तृ.त.पु.)

(B) अवक्रयगृहीता कुटी इति अवक्रयकुटी, ताम् अवक्रयकुटीम् । (म.प.लो.क.)

(२) सिंहगिरिगुरो :- (A) सिंहगिरिः नाम यस्य सः इति सिंहगिरिनामा । (समा.ब.व्री.)

(B) सिंहगिरिनामा गुरुः इति सिंहगिरिगुरुः, तस्य सिंहगिरिगुरोः । (म.प.लो.क.)

**सोऽथ द्वाविंशतिमपि, सहमानः परीषहान् ।**
**सुदुस्तपं तपस्तेपे, स्वशरीरेऽपि निःस्पृहः ॥१९॥**

**अन्वय :-** अथ द्वाविंशतिम् अपि परीषहान् सहमानः स्वशरीरे अपि निःस्पृहः सः सुदुस्तपं तपः तेपे ।

**समास :-** (१) द्वाविंशतिम् - द्वाभ्यामधिका विंशतिः इति द्वाविंशतिः, तां द्वाविंशतिम् । (म.प.लो.क.)

(२) सुदुस्तपम् - अतिशयेन दुःखेन तप्यते इति सुदुस्तपम्, तद् सुदुस्तपम् । (उप.त.पु.)

(३) स्वशरीरे - स्वस्य शरीरम् इति स्वशरीरम्, तस्मिन् स्वशरीरे । (ष. त. पु.)

(४) निःस्पृहः - निर्गता स्पृहा यस्मात् सः इति निःस्पृहः। (प्रा. ब. व्री.)

**स स्थैर्यार्जवविनयादिभिः शिष्यगुणैर्वृतः ।**
**श्रुतसारं गुरोः पार्श्वात्, पयः कूपादिवाददे ॥२०॥**

**अन्वय :-** स्थैर्यार्जवविनयादिभिः शिष्यगुणैः वृतः सः कूपात् पयः इव गुरोः पार्श्वात् श्रुतसारम् आददे ।

स्थैर्यम् - स्थिरता, आर्जवम् - सरलता ।

**समास :-** (१) स्थैर्यार्जवविनयादिभि :- (A) स्थैर्यं च आर्जवं च विनयश्च इति स्थैर्यार्जवविनयाः । (इत. द्व.)

(B) स्थैर्यार्जवविनयाः आदौ येषां ते इति स्थैर्यार्जव-विनयादयः, तैः स्थैर्यार्जवविनयादिभिः । (व्यधि.ब.व्री.)

(२) शिष्यगुणैः- शिष्यस्य गुणाः इति शिष्यगुणाः, तैः शिष्यगुणैः । (ष. त. पु.)

(३) श्रुतसारम् - श्रुतस्य सारः इति श्रुतसारः, तं श्रुतसारम् । (ष. त. पु.)

**नवमास्यां[3] व्यतीतायाम्[4], सुनन्दा[1]ऽपि[2] हि[5] नन्दनम्[10] ।**
**अजीजन[11]ज्जनानन्दम्[9], सरसी[6]व[8] सरोरुहम्[7] ॥२१॥**

**अन्वय :-** सुनन्दा अपि नवमास्यां व्यतीतायां हि सरसी सरोरुहम् इव जनानन्दं नन्दनम् अजीजनत् ।

सरसी - कासारः जलाशयो वा "पद्मकासारस्तडागः स्यात् कासारः सरसी सरः" ॥१०९४॥ इत्यभिधाने ॥

**समास :-** (१) नवमास्याम् - नवानां मासानां समाहारः इति नवमासी, तस्यां नवमास्याम् । (द्विगु.कर्म.) "द्विगोः समाहारात्" २।४।२९ इति ङी ।

(२) जनानन्दम् - जनान् आनन्दयतीति जनानन्दः, तं जनानन्दम् । (उप. त. पु.)

(३) सरोरुहम् - सरसि रोहतीति सरोरुहः, तं सरोरुहम् । (उप. त. पु.) मूलविभुजादयः ५।१।१४४ कप्रत्ययः ।

**सुनन्दायाः प्रीतिपात्राण्यङ्गनाः सूतिकागृहे ।**
**प्रतिजागरणायातास्तं बालमिदमूचिरे ॥२२॥**

**अन्वय :-** सुनन्दायाः प्रीतिपात्राणि सूतिकागृहे प्रतिजागरणायाताः अङ्गनाः तं बालम् इदम् ऊचिरे ।

**समास :-** (१) प्रीतिपात्राणि – प्रीतेः पात्राणि इति प्रीतिपात्राणि । (ष. त. पु.)

(२) प्रतिजागरणायाताः – प्रतिजागरणाय आयाताः इति प्रतिजागरणायाताः । (च. त. पु.)

**यदि जात ! न ते तातः, प्राव्रजिष्यत्तदोत्सुकः ।**
**जातकर्मोत्सवः श्रेयानभविष्यत्ततः खलु ॥२३॥**

**अन्वय :-** ततः जात ! यदि ते खलु उत्सुकः तातः न प्राव्रजिष्यत् तदा जातकर्मोत्सवः श्रेयान् अभविष्यत् ।

**समास :-** (१) जातकर्मोत्सव :- (A) जातस्य कर्म इति जातकर्म । (ष. त. पु.)

(B) जातकर्मणः उत्सवः इति जातकर्मोत्सवः । (ष. त. पु.)

**स्त्रीजने सत्यपि गृहम्, भाति न स्वामिनं विना ।**
**बह्वीभिरपि ताराभिर्यथा चन्द्रं विना नभः ॥२४॥**

**अन्वय :-** यथा बह्वीभिः ताराभिः अपि चन्द्रं विना नभः (तथा) स्त्रीजने सति अपि स्वामिनं विना गृहं न भाति ।

**समास :-** (१) स्त्रीजने – स्त्रीश्चासौ जनश्च इति स्त्रीजनः, तस्मिन् स्त्रीजने । (वि. पू. क.)

**स[७] तु[४] बालो[५]ऽपि[६] संज्ञा[२]वाञ्ज्ञानावरणलाघवात्[१] ।**
**तासा[८]माकर्णया[११]मास, तं[९] संला[१०]पं समाहितः[३] ॥२५॥**

**अन्वय :-** ज्ञानावरणलाघवात् संज्ञावान् समाहितः तु बालः अपि सः तासां तं संलापम् आकर्णयामास ।

समाहितः - दत्तचित्तीभूतः ।

"समाहितः समाधिस्थे संश्रुते" इत्यनेकार्थः । (४।१२९)

**समास :-** (१) संज्ञावान् - संज्ञा अस्ति यस्य इति संज्ञावान् । (तद्धित) मतुप्रत्ययः ।

(२) ज्ञानावरणलाघवात् - (A) ज्ञानम् आवृणोति इति ज्ञानावरणम् । (उप. त. पु.)

(B) ज्ञानावरणस्य लाघवम् इति ज्ञानावरणलाघवम्, तस्मात् ज्ञानावरणलाघवात् । (ष. त. पु.)

**अचिन्तय[१]च्च[२] मत्तातः[३], परिव्रज्यामु[४]पाददे[५] ।**
**एवं[६] च[७] चिन्तयन्ने[८]व[९], जातिस्मरणमा[११]प[१२] सः[१०] ॥२६॥**

**अन्वय :-** अचिन्तयत् च मत्तातः परिव्रज्याम् उपाददे एवं च चिन्तयन् एव सः जातिस्मरणम् आप ।

**समास :-** (१) मत्तातः - मम तातः इति मत्तातः । (ष.त.पु.)

(२) जातिस्मरणम् - जातिः स्मर्यतेऽनेनेति जातिस्मरणम्, तद् जातिस्मरणम् । (उप. त. पु.) करणाऽऽधारे ५।३।१२९. अनट् प्रत्ययः

**स[६] जातजातिस्मरणः[१], संसारासारतां[२] विदन्[३] ।**
**इयेष[१०] क्षीरकण्ठो[४]ऽपि[५], पित्र्ये[७]ऽध्वन्य[८]ध्वनीनताम्[९] ॥२७॥**

**अन्वय :-** जातजातिस्मरणः संसारासारतां विदन् क्षीरकण्ठः अपि सः पित्र्ये अध्वनि अध्वनीनताम् इयेष ।

अध्वनीनताम् - पथिकताम् । अध्वनीनोऽध्वगोऽध्वन्यः, पान्थः पथिकदेशिकौ । प्रवासी... इत्यभिधाने । (४९३)

**समास :-** (१) जातजातिस्मरणः- (A) जातिस्मरणम्-पूर्ववत् ।

(B) जातं जातिस्मरणं यस्य सः इति जातजातिस्मरणः । (समा.ब.व्री.)

(२) संसारासारताम्- (A) न सारः इति असारः । (नञ्. त.पु.)

(B) असारस्य भावः इति असारता । (तद्धित)

(C) संसारस्य असारता इति संसारासारता, तां संसारासारताम् । (ष.त.पु.)

(३) क्षीरकण्ठः - क्षीरं कण्ठे यस्य सः इति क्षीरकण्ठः । (व्य.ब.व्री.)

(४) पित्र्ये - पितुः अयम् इति पित्र्यः, तस्मिन् पित्र्ये "पितुर्यो वा" ६।३।१५१ य प्रत्ययः । (तद्धित)

(५) अध्वनीनताम् - अध्वानमलंगामी इति अध्वनीनः, अध्वानं येनौ ७।१।१०३ ईनप्रत्ययः, अध्वनीनस्य भावः अध्वनीनता, ताम् अध्वनीनताम् । (तद्धित)

**कथमुद्विज्य मां माता, त्यक्ष्यतीति विचिन्त्य सः ।**
**मातुरङ्कस्थितोऽप्युच्चैः रोदिति स्म दिवानिशम् ॥२८॥**

**अन्वय :-** कथम् उद्विज्य माता मां त्यक्ष्यति इति विचिन्त्य मातुः अङ्कस्थितः अपि सः दिवानिशम् उच्चैः रोदिति स्म ।

**समास :-** (१) अङ्कस्थित :- अङ्के स्थितः इति अङ्कस्थितः । (स. त. पु.)

(२) दिवानिशम् - दिवा च निशा च एतयोः समाहारः इति दिवानिशम्, तद् दिवानिशम् । (समा. द्वन्द्व)

**न रागमधुरैर्गानैर्न क्रीडनकदर्शनैः ।**
**न वस्त्रदोलाप्रेङ्खाभिर्न चाटुवचनैरपि ॥२९॥**

**नोत्सङ्गनृत्यलीलाभिर्न मुखातोद्यवादनैः ।**
**न शिरश्चुम्बनेनापि, विशश्राम स रोदनात् ॥३०॥**

**( युग्मम् )**

**अन्वय :-** रागमधुरैः गानैः न, क्रीडनकदर्शनैः न, वस्त्रदोलाप्रेङ्खाभिः न, चाटुवचनैः अपि न, उत्सङ्गनृत्यलीलाभिः न, मुखातोद्य-वादनैः न, शिरश्चुम्बनेन अपि सः रोदनात् न विशश्राम ।

क्रीडनकः - कन्दुकादिः । दोला - हिण्डोलकः । प्रेङ्खा - हिण्डोलनम् । "अथ दोला प्रेङ्खादिका भवेत्" इत्यभिधाने ॥७५८॥

**समास :-** (१) रागमधुरैः - रागेण मधुराणि इति रागमधुराणि, तैः रागमधुरैः । (तृ त. पु.)

(२) क्रीडनकदर्शनैः - क्रीडनकानां दर्शनानि इति क्रीडनकदर्शनानि, तैः क्रीडनकदर्शनैः । (ष.त.पु.)

(३) वस्त्रदोलाप्रेङ्खाभिः - (A) वस्त्रेण निर्मिता इति वस्त्रनिर्मिता । (तृ.त.पु.)

(B) वस्त्रनिर्मिता दोला इति वस्त्रदोला । (म.प.लो.क.)

(C) वस्त्रदोलया (कृताः) प्रेङ्खाः इति वस्त्रदोलाप्रेङ्खाः, ताभिः वस्त्रदोलाप्रेङ्खाभिः । (तृ. त. पु.)

(४) चाटुवचनैः – चाटूनि च तानि वचनानि च इति चाटुवचनानि, तैः चाटुवचनैः । (वि. पू. क.)

(५) उत्सङ्गनृत्यलीलाभिः – (A) नृत्यस्य लीलाः इति नृत्यलीलाः । (ष. त. पु.)

(B) उत्सङ्गे कृताः इति उत्सङ्गकृताः । (स.त.पु.)

(C) उत्सङ्गकृताः नृत्यलीलाः इति उत्सङ्गनृत्यलीलाः, ताभिः उत्सङ्गनृत्यलीलाभिः । (म.प.लो.क.)

(६) मुखातोद्यवादनैः – (A) मुखैः वाद्यानि इति मुखवाद्यानि । (तृ.त.पु.)

(B) मुखवाद्यानि आतोद्यानि इति मुखातोद्यानि । (म.प.लो.क.)

(C) मुखातोद्यानां वादनानि इति मुखातोद्य-वादनानि, तैः मुखातोद्यवादनैः । (ष. त. पु.)

(७) शिरश्चुम्बनेन – शिरसः चुम्बनम् इति शिरश्चुम्बनम्, तेन शिरश्चुम्बनेन । (ष. त. पु.)

**एवं[१] च[२] रुदत[३]स्तस्य[४], शिशो[५]र्मासा[७]ः षड[६]त्यगु[८]ः ।**
**आससाद[१४] सुनन्दा[९]ऽपि[१०], निर्वेदं[१३] तेन[११] सूनुना[१२] ॥३१॥**

**अन्वय :–** एवं च रुदतः तस्य शिशोः षड् मासाः अत्यगुः सुनन्दा अपि तेन सूनुना निर्वेदम् आससाद ।

**अन्यदा[१] तु[२] सिंहगिरि[६]स्तत्रा[७]गा[९]त्सन्निवेशने[८] ।**
**विनेयै[४]र्धनगिर्यार्यशमितादिभि[३]रावृत[५]ः ॥३२॥**

**अन्वय :–** अन्यदा तु धनगिर्यार्यशमितादिभिः विनेयैः आवृतः सिंहगिरिः तत्र सन्निवेशने अगात् ।

विनेयैः - शिष्यैः "शिष्यो विनेयोऽन्तेवासी" ।
इत्यभिधाने (७९)

**समास :-** (१) धनगिर्यार्यशमितादिभिः - (A) धनगिरिश्च आर्यशमितश्च इति धनगिर्यार्यशमितौ । (इ.द्व.)

(B) धनगिर्यार्यशमितौ आदौ येषां ते इति धनगिर्यार्यशमितादयः, तैः धनगिर्यार्यशमितादिभिः । (व्यधि. ब. व्री.)

**वसत्यां[१] तस्थिवांसं[३] च[२], नत्वा[६] सिंहगिरिं[४] गुरुम्[५] ।**
**धनगिर्यार्यशमितौ[७]न्वजिज्ञपता[९]मिति[८] ॥३३॥**

**अन्वय :-** वसत्यां च तस्थिवांसं सिंहगिरिं गुरुं नत्वा धनगिर्यार्यशमितौ इति अन्वजिज्ञपताम् ।

वसतिः - स्थानकः "वसतिः स्यादवस्थाने निशायां सदनेऽपि च" ॥३/२८३॥ इत्यनेकार्थः ।

**समास :-** धनगिर्यार्यशमितौ - पूर्ववत् ।

**स्वजनाः[५] सन्ति[६] नाव[४]स्मिन्[२]भगवन्[१] ! सन्निवेशने[३] ।**
**यौष्माकेण[७] नियोगेन[८], तान्[९]विवन्दयिषावहे[१०] ॥३४॥**

**अन्वय :-** भगवन् ! अस्मिन् सन्निवेशने नौ स्वजनाः सन्ति यौष्माकेण नियोगेन तान् विवन्दयिषावहे ।

नौ-आवयोः। नियोगः-आदेशः । "आज्ञा शिष्टिर्निराङ्निभ्यो देशो नियोगशासने" ॥२७७॥ इत्यभिधाने ।

यौष्माकेण-युष्माकम् अयं यौष्माकः, तेन यौष्माकेण, युष्मदस्मदोऽञीनञौ० ६।३।६७.. अञ् । (तद्धित)

**तयोश्च पृच्छतोरेवम्, शकुनं शुभसूचकम् ।**
**दृष्ट्वा सिंहगिरिगुरुरूचेऽनूचानपुङ्गवः ॥३५॥**

**अन्वय :-** एवं च तयोः पृच्छतोः शुभसूचकं शकुनं दृष्ट्वा अनूचानपुङ्गवः सिंहगिरिगुरुः ऊचे ।

अनूचानपुङ्गवः –गणिश्रेष्ठः "अनूचानः प्रवचने साङ्गेऽधीती गणिश्च सः" । इत्यभिधाने । (७८)

**समास :-** (१) शुभसूचकम् – शुभं सूचयति इति शुभसूचकम् । (उप. त. पु.)

(२) सिंहगिरिगुरुः – पूर्ववत् ।

(३) अनूचानपुङ्गवः – अनूचानेषु पुङ्गवः इति अनूचानपुङ्गवः । (स.त.पु.)

**महाल्लाँभोऽद्य वां भावी, लभेथे यद्युवां मुनी! ।**
**सचित्तं वाऽप्यचित्तं वा, तदादेयं मदाज्ञया ॥३६॥**

**अन्वय :-** मुनी ! वाम् अद्य महान् लाभः भावी युवां सचित्तं वा अचित्तं वा यद् अपि लभेथे तद् मदाज्ञया आदेयम् ।

वाम् – युवयोः ।

**समास :-** (१) सचित्तम् – चित्तेन सह वर्तते यद् तद् इति सचित्तम् । (सह. ब. व्री.)

(२) अचित्तम् – नास्ति चित्तं यस्य तद् इति अचित्तम् । (नञ्. ब. व्री.)

(३) मदाज्ञया – मम आज्ञा इति मदाज्ञा, तया मदाज्ञया । (ष.त.पु.)

**सदने[5]ऽथ[1] सुनन्दाया[4], जग्मतु[6]स्तौ[2] महामुनी[3] ।**
**तस्या[8]स्तौ[11]वन्यनारीभि[7]र्द्वार्या[9]यातौ[10] निवेदितौ[12] ॥३७॥**

**अन्वय :-** अथ तौ महामुनी सुनन्दायाः सदने जग्मतुः अन्यनारीभिः तस्याः द्वारि आयातौ तौ निवेदितौ ।

सदने – गेहे "मन्दिरं सदनं सद्म" इत्यभिधाने (९९०)

**समास :-** (१) महामुनी – महान्तौ च तौ मुनी च इति महामुनी । (वि. पू. क.)

(२) अन्यनारीभिः – अन्याश्च ताः नार्यश्च इति अन्यनार्यः, ताभिः अन्यनारीभिः । (वि. पू. क.)

**महिला[3]श्चो[2]चिरे[4] सर्वाः[1], सुनन्दे[5]! नन्दन[8]स्त्वया[6] ।**
**अर्पणीयो[9] धनगिरेः[7], क्व[12] नेष्य[13]त्येष[11] दृश्यताम्[10] ॥३८॥**

**अन्वय :-** सर्वाः च महिलाः ऊचिरे सुनन्दे ! त्वया धनगिरेः नन्दनः अर्पणीयः दृश्यताम् एष क्व नेष्यति ? ।

**निरानन्दा[3] सुनन्दा[5]ऽपि[6], तमा[7]दाय[9] स्तनन्धयम्[8] ।**
**तेन[1] निर्वेदितो[2]दस्था[10]दूचे[13] धनगिरिं[11] च[12] सा[4] ॥३९॥**

**अन्वय :-** तेन निर्वेदिता निरानन्दा सा सुनन्दा अपि तं स्तनन्धयम् आदाय उदस्थात् धनगिरिं च ऊचे ।

**समास :-** (१) निरानन्दा – निर्गतः आनन्दः यस्याः सा इति निरानन्दा । (प्रा.ब.व्री.)

(२) स्तनन्धयम् – स्तनं धयति इति स्तनन्धयः, तं स्तनन्धयम् । (उप.त.पु.) शुनी-स्तन-मुञ्ज० ५।१।११९ खश् प्रत्ययः ।

**इयन्तं कालमात्मेव, बालकः पालितो मया ।**
**नटिताऽहं त्वनेनोच्चैः, रोदित्येष दिवानिशम् ॥४०॥**

**अन्वय :-** मया इयन्तं कालं बालकः आत्मा इव पालितः अनेन तु अहं नटिता दिवानिशम् एषः उच्चैः रोदिति ।

**समास :-** (१) दिवानिशम् - पूर्ववत् ।

**यद्यप्यसि प्रव्रजितस्तथाऽप्येनं स्वमात्मजम् ।**
**गृहाण मामिव त्याक्षीर्मा स्मैनमपि सम्प्रति ॥४१॥**

**अन्वय :-** यद्यपि प्रव्रजितः असि तथापि स्वम् एनम् आत्मजं सम्प्रति गृहाण माम् इव एनम् अपि मा त्याक्षीः स्म ।
स्वम् - निजम् "स्वं निजे धने" ॥१/१४॥ इत्यनेकार्थः ।

**समास :-** (१) आत्मजम् - आत्मजः पूर्ववत्, तम् आत्मजम्ः ।

**स्मित्वा धनगिरिरपि, प्रोवाच वदतांवरः ।**
**एवं करिष्ये कल्याणि! पश्चात्तापं तु यास्यसि ॥४२॥**

**अन्वय :-** वदतांवरः धनगिरिः अपि स्मित्वा प्रोवाच कल्याणि ! एवं करिष्ये पश्चात्तापं तु यास्यसि ।

**समास :-** (१) वदतांवरः - वदतां वरः इति वदतांवरः ।
(अलुप् ष. त. पु.)

**मा कृथाः सर्वथैदक्षम्, कुरुषे वा कुरुष्व तत् ।**
**समक्षं साक्षिणां भद्रे! पुनर्ह्येनं न लप्स्यसे ॥४३॥**

**अन्वय :-** भद्रे ! सर्वथा ईदृक्षं मा कृथाः कुरुषे वा हि पुनः एनं न लप्स्यसे तत् साक्षिणां समक्षं कुरुष्व ।

**समास :-** समक्षम् – अक्ष्णोः समीपम् इति समक्षम् । (अव्य.भा.)

**तत[१]श्च[२] साक्षिणः[३] कृत्वा[४], सनिर्वेदं[८] सुनन्दया[५] ।**
**नन्दनो[७] धनगिरये[६]ऽर्पित[९]स्तेना[१०]ऽऽददे[१३] च[११] सः[१२] ॥४४॥**

**अन्वय :-** ततः च साक्षिणः कृत्वा सुनन्दया धनगिरये नन्दनः सनिर्वेदम् अर्पितः तेन च सः आददे ।

**समास :-** (१) सनिर्वेदम् – निर्वेदेन सह वर्तते यद् तद् इति सनिर्वेदम्, तद् सनिर्वेदम् । (सह. ब. व्री.)

**सो[३]ऽर्भको[४] धनगिरिणा[१], पात्रबन्धे[५] न्यधायि[६] च[२] ।**
**गृहीतसङ्केत[७] इव[८], विरराम[११] च[१०] रोदनात्[९] ॥४५॥**

**अन्वय :-** धनगिरिणा च सः अर्भकः पात्रबन्धे न्यधायि गृहीतसङ्केतः इव रोदनात् च विरराम ।
पात्रबन्धे – वस्त्रमयपात्राधारे (लोके 'झोली' इति प्रसिद्धम् ।)

**समास :-** (१) पात्रबन्धे – पात्राणि बध्यन्तेऽस्मिन् इति पात्रबन्धः, तस्मिन् पात्रबन्धे । (उप. त. पु.)
(२) गृहीतसङ्केतः – गृहीतः सङ्केतः येन सः इति गृहीतसङ्केतः । (समा. ब. व्री.)

**ततः[१] सुनन्दासदना[२]दृषी[६] ता[५]वात्तबालकौ[४] ।**
**गुर्वाज्ञापालकौ[३] भूयो[७]ऽपेयतु[९]र्गुरुसन्निधौ[८] ॥४६॥**

**अन्वय :-** ततः सुनन्दासदनात् गुर्वाज्ञापालकौ आत्तबालकौ तौ ऋषी भूयः गुरुसन्निधौ अपेयतुः ।

**समास :-** (१) सुनन्दासदनात् – सुनन्दायाः सदनम् इति
सुनन्दासदनम्, तस्मात् सुनन्दासदनात् । (ष.त.पु.)
(२) आत्तबालकौ – आत्तः बालकः याभ्यां तौ इति
आत्तबालकौ । (समा. ब. व्री.)
(३) गुर्वाज्ञापालकौ – (A) गुरोः आज्ञा इति गुर्वाज्ञा ।
(ष.त.पु.)
(B) गुर्वाज्ञां पालयतः इति गुर्वाज्ञापालकौ ।
(उप.त.पु.) णकतृचौ ५।१।४८ णक
प्रत्ययः ।
(४) गुरुसन्निधौ – गुरोः सन्निधिः इति गुरुसन्निधिः,
तस्मिन् गुरुसन्निधौ । (ष. त. पु.)

**महासारस्य[1] भारेण[4], पुत्ररत्नस्य[3] तस्य[2] तु[5] ।**
**नमद्बाहुं[6] धनगिरिम्[7], दृष्ट्वा[8] गुरुर्[9]भाषत[10] ॥४७॥**

**अन्वय :-** महासारस्य तस्य पुत्ररत्नस्य भारेण तु नमद्बाहुं धनगिरिं
दृष्ट्वा गुरुः अभाषत ।

**समास :-** (१) महासारस्य – महान् सारः यस्य सः इति महासारः,
तस्य महासारस्य । (समा.ब.व्री.)
(२) पुत्ररत्नस्य – पुत्रः एव रत्नम् इति पुत्ररत्नम्, तस्य
पुत्ररत्नस्य । (अव.पू.क.)
(३) नमद्बाहुम् – नमन् बाहुः यस्य सः इति नमद्बाहुः,
तं नमद्बाहुम् । (समा. ब. व्री.)

**आयासित[4] इवा[5]सि[6] त्वम्[2], भिक्षाभारेण[3] तं[8] मम[7] ।**
**समर्पय[9] महाभाग![1], विश्राम्यतु[12] भुजस्[11]तव[10] ॥४८॥**

**अन्वय :-** महाभाग ! त्वं भिक्षाभारेण आयासित इव असि मम तं समर्पय तव भुजः विश्राम्यतु ।

**समास :-** (१) भिक्षाभारेण - भिक्षायाः भारः इति भिक्षाभारः, तेन भिक्षाभारेण । (ष. त. पु.)

(२) महाभाग ! - महान् भागः यस्य सः इति महाभागः, तत्सम्बोधनं महाभाग ! (समा.ब.व्री.)

**इत्यु[१]पादाय[४] यत्नेन[३], साधुः[२] श्रीपात्रम[५]र्भकम्[९] ।**
**कान्त्या[६] सुरकुमाराभम्[७], अर्पयामास[११] तं[८] गुरोः[१०] ॥४९॥**

**अन्वय :-** इति साधुः यत्नेन उपादाय श्रीपात्रं कान्त्या सुरकुमाराभं तम् अर्भकं गुरोः अर्पयामास ।

**समास :-** (१) श्रीपात्रम् - श्रियाः पात्रम् इति श्रीपात्रम्, तद् श्रीपात्रम् । (ष.त.पु.)

(२) सुरकुमाराभम् - (A) सुरश्चासौ कुमारश्च इति सुरकुमारः । (वि.उ.क.)

(B) सुरकुमारस्य आभा इव आभा यस्य सः इति सुरकुमाराभः, तं सुरकुमाराभम् । (उप.ब.व्री.)

**देदीप्यमानं[६] तेजोभि[५]रधिपं[३] तेजसा[२]मिव[४] ।**
**आचार्यवर्य[१]स्तं[७] बालम्[८], पाणिभ्यां[९] स्वयमा[१०]ददे[११] ॥५०॥**

**अन्वय :-** आचार्यवर्यः तेजसाम् अधिपम् इव तेजोभिः देदीप्यमानं तं बालं पाणिभ्यां स्वयम् आददे ।

**समास :-** (१) अधिपम् - अधिकं पाति इति अधिपः, तम् अधिपम् । (उप.त.पु.) स्था-पा-स्ना. ५।१।१४२ कप्रत्ययः ।

(२) आचार्यवर्यः - आचार्येषु वर्यः इति आचार्यवर्यः । (स.त.पु.)

**शिशो[२]स्तस्या[१]तिभारेण[३], सद्यः[१०] सिंहगिरे[७]र्गुरोः[८] ।**
**नमति[१२] स्म[१३] महीपीठम्[११], वार्या[४]दित्सो[५]रिवा[६]ञ्जलिः[९] ॥५१॥**

**अन्वय :-** तस्य शिशोः अतिभारेण वारि आदित्सोः इव सिंहगिरेः गुरोः अञ्जलिः सद्यः महीपीठं नमति स्म ।

**समास :-** (१) अतिभारेण – अतिशयः भारः इति अतिभारः, तेन अतिभारेण । (प्रादि.कर्म.)

(२) महीपीठम् – मह्याः पीठः इति महीपीठः, तं महीपीठम् । (ष. त. पु.)

(३) आदित्सोः – आदातुम् इच्छुः इति आदित्सुः, तस्य आदित्सोः। (इच्छार्थक सन्+उ) सन्–भिक्षा० ५।२।३३ उप्रत्ययः ।

**तद्भारभङ्गुरकरो[१], गुरु[३]रूचे[४] सविस्मयः[२] ।**
**अहो[५]! पुंरूपभृद्[६]वज्र[८]मिदं[७] धर्तुं[९] न[१०] शक्यते[११] ॥५२॥**

**अन्वय :-** तद्भारभङ्गुरकरः सविस्मयः गुरुः ऊचे अहो । पुंरूपभृद् इदं वज्रं धर्तुं न शक्यते ।

**समास :-** (१) तद्भारभङ्गुरकरः– (A) तस्य भारः इति तद्भारः । (ष.त.पु.)

(B) तद्भारेण भङ्गुरौ करौ यस्य सः इति तद्भार-भङ्गुरकरः । (व्य. ब. प. ब. व्री.)

(२) सविस्मयः – विस्मयेन सह वर्तते यः सः इति सविस्मयः । (सह. ब. व्री.)

(३) पुंरूपभृत् – (A) पुंसः रूपम् इति पुंरूपम्। (ष.त.पु.)

(B) पुंरूपं बिभर्ति इति पुंरूपभृत् । (उप.त.पु.)

क्विप् ५।१।१४८ क्विप् प्रत्ययः ।

**भावी[५] प्रवचनाधारो[४], महापुण्यः[१] पुमानयम्[३][२] ।**
**यत्नेन[६] रक्ष्यो[७] रत्नं[१०] हि[८], प्रायेणापायवल्लभम्[९][११] ॥५३॥**

**अन्वय :-** महापुण्यः अयं पुमान् प्रवचनाधारः भावी (अतः) यत्नेन रक्ष्यः हि प्रायेण रत्नम् अपायवल्लभम् ।

**समास :-** (१) प्रवचनाधारः – पूर्ववत् ।

(२) महापुण्यः – महत् पुण्यं यस्य सः इति महापुण्यः । (समा. ब. व्री.)

(३) अपायवल्लभम् – अपायस्य वल्लभम् इति अपायवल्लभम् । (ष.त.पु.)

**साध्वीनामिति[६][१] तं[३] बालम्[४], पालनायार्पयद्[५][७] गुरुः[२] ।**
**वज्रसारस्य तस्यादाद्[८][९][१४], वज्र[१०] इत्यभिधामपि[११][१२][१३] ॥५४॥**

**अन्वय :-** इति गुरुः तं बालं पालनाय साध्वीनाम् आर्पयद् वज्रसारस्य तस्य वज्र इति अभिधाम् अपि अदात् ।

**समास :-** (१) वज्रसारस्य – वज्रम् इव सारः यस्य सः इति वज्रसारः, तस्य वज्रसारस्य । (उप.ब.व्री.)

**गत्वा[५] शय्यातरकुले[४], भक्ते[३] तं[११] बालमार्यिकाः[१२][२] ।**
**स्वमात्मानमिवाख्याय[६][७][८][९], पालनायार्पयन्नथ[१०][१३][१] ॥५५॥**

**अन्वय :-** अथ आर्यिकाः भक्ते शय्यातरकुले गत्वा स्वम् आत्मानम् इव आख्याय पालनाय तं बालम् आर्पयन् ।

आर्यिकाः - साध्व्यः ।

**समास :-** (१) शय्यातरकुले - (A) शय्यया (वसत्या) तरतीति शय्यातरः । (उप.त.पु.)

(B) शय्यातरस्य कुलम् इति शय्यातरकुलम्, तस्मिन् शय्यातरकुले । (ष.त.पु.)

**कुमारभृत्याकुशलाः[1], शय्यातर्यो[5]ऽपि[6] तं[7] शिशुम्[8] ।**
**स्वस्वपुत्राधिकं[3] प्रीत्या[2], पश्यन्त्यः[4] पर्यपालयन्[9] ॥५६॥**

**अन्वय :-** कुमारभृत्याकुशलाः प्रीत्या स्वस्वपुत्राधिकं पश्यन्त्यः शय्यातर्यः अपि तं शिशुं पर्यपालयन् ।

**समास :-** (१) कुमारभृत्याकुशलाः - (A) कुमारस्य भृत्या इति कुमारभृत्या । (ष.त.पु.)

(B) कुमारभृत्यायां कुशलाः इति कुमारभृत्याकुशलाः । (स.त.पु.)

(२) स्वस्वपुत्राधिकम् - (A) स्वे च स्वे च इति स्वस्वे । (विशे०उभ०क०)

(B) स्वस्वेषां पुत्राः इति स्वस्वपुत्राः । (ष.त.पु.)

(C) स्वस्वपुत्रेभ्यः अधिकः इति स्वस्वपुत्राधिकः, तं स्वस्वपुत्राधिकम् । (पं. त. पु.)

**शय्यातरपुरन्ध्रीणाम्[7], स[6] सौभाग्यनिधानभूः[5] ।**
**अङ्का[8]दङ्कं[9] सञ्चचार[10], हंसो[3]ऽम्बुजं[2]मिवा[4]म्बुजात्[1] ॥५७॥**

**अन्वय :-** अम्बुजात् अम्बुजं हंसः इव सौभाग्यनिधानभूः सः शय्यातरपुरन्ध्रीणाम् अङ्कात् अङ्कं सञ्चचार ।

**समास :-** (१) शय्यातरपुरन्ध्रीणाम् – (A) शय्यातराः–पूर्ववत् ।

(B) शय्यातराणां पुरन्ध्र्यः इति शय्यातरपुरन्ध्र्यः, तासां शय्यातरपुरन्ध्रीणाम् । (ष.त.पु.)

(२) सौभाग्यनिधानभूः – (A) शोभनं भगम् इति सुभगम् । (सु.पू.क.)

(B) सुभगस्य भावः सौभाग्यम् । (तद्धित)

(C) सौभाग्यस्य निधानम् इति सौभाग्यनिधानम् । (ष.त.पु.)

(D) सौभाग्यनिधानस्य भूः इति सौभाग्यनिधानभूः । (ष.त.पु.)

(३) अम्बुजम् – अम्बुनि जातम् इति अम्बुजम्, तद् अम्बुजम् । (उप.त.पु.)

(४) अम्बुजात् – अम्बुजम्–पूर्ववत्, तस्मात् अम्बुजात् । (उप.त.पु.)

**उल्लापयन्त्यस्[४]तं[१] बालम्[२], मन्मनोल्लापपूर्वकम्[३] ।**
**शय्यातरकुटुम्बिन्यो[५], हर्षवातूलतां[६] ययुः[७] ॥५८॥**

**अन्वय :-** तं बालं मन्मनोल्लापपूर्वकम् उल्लापयन्त्यः शय्यातर-कुटुम्बिन्यः हर्षवातूलतां ययुः ।

**समास :-** (१) मन्मनोल्लापपूर्वकम् – (A) मन्मनः एव उल्लापः इति मन्मनोल्लापः । (अव. पू. क.)

(B) मन्मनोल्लापेन पूर्वकम् इति मन्मनोल्लापपूर्वकम्, तद् मन्मनोल्लापपूर्वकम् । (तृ.त.पु.)

(२) शय्यातरकुटुम्बिन्यः - (A) शय्यातराः-पूर्ववत् ।

(B) शय्यातराणां कुटुम्बिन्यः इति शय्यातरकुटुम्बिन्यः । (ष.त.पु.)

(३) हर्षवातूलताम् - (A) हर्ष एव वातूलः इति हर्षवातूलः । (अव.पू.क.)

(B) हर्षवातूलस्य भावः इति हर्षवातूलता, तां हर्षवातूलताम् । (तद्धित)

**शय्यातर्यो[२] महाभागाः[१], स्नानपानाशनादिभिः[३] ।**
**स्पर्धमाना[५] इवा[६]ऽन्योन्यम्[४], चक्रु[९]र्वज्रस्य[७] सत्क्रियाम्[८] ॥५९॥**

**अन्वय :-** महाभागः शय्यातर्यः स्नानपानाशनादिभिः अन्योन्यं स्पर्धमाना इव वज्रस्य सत्क्रियां चक्रुः ।

**समास :-** (१) शय्यातर्यः-पूर्ववत् ।

(२) महाभागाः - महान् भागः यासां ताः इति महाभागाः । (समा.ब.व्री.)

(३) स्नानपानाशनादिभिः - (A) स्नानं च पानं च अशनं च इति स्नानपानाशनानि । (इत. द्वन्द्व)

(B) स्नानपानाशनानि आदौ येषां ते इति स्नानपानाशनादयः, तैः स्नानपानाशनादिभिः । (व्यधि. ब. व्री.)

(४) सत्क्रियाम् - सती चासौ क्रिया च इति सत्क्रिया, तां सत्क्रियाम् । (वि.पू.क.)

**वयोवृद्धपरिणामो[४], वज्रो[५] बालो[१]ऽपि[२] संयमात्[३] ।**
**न[१०] बालचापलं[९] चक्रे[११], किंचित्[८] तासाम[६]सौख्यदम्[७] ॥६०॥**

**अन्वय :-** बालः अपि संयमात् वयोवृद्धपरिणामः वज्रः तासाम् असौख्यदं किंचित् बालचापलं न चक्रे ।

**समास :-** (१) वयोवृद्धपरिणामः-(A) वयसा वृद्धः इति वयोवृद्धः । (तृ.त.पु.)

(B) वयोवृद्धस्य परिणामः इव परिणामः यस्य सः इति वयोवृद्धपरिणामः । (उप. ब. व्री.)

(२) बालचापलम् - बालस्य चापलम् इति बालचापलम्, तद् बालचापलम् । (ष.त.पु.)

(३) असौख्यदम्-(A) सुखस्य भावः सौख्यम् । (तद्धित)

(B) न सौख्यम् इति असौख्यम् । (नञ्.त.पु.)

(C) असौख्यं ददाति इति असौख्यदम्, तद् असौख्यदम् । (उप.त.पु.)

**बुभुजे[९] प्रासुकं[८] वज्रः[५], प्राणयात्राकृते[६] सुधीः[२] ।**
**जातिस्मरणसञ्ज्ञातविवेकः[१] कल्पवि[३]द्धि[७] सः[४] ॥६१॥**

**अन्वय :-** जातिस्मरणसञ्ज्ञातविवेकः सुधीः कल्पवित् सः वज्रः प्राणयात्राकृते हि प्रासुकं बुभुजे ।

**समास :-** (१) प्रासुकम् - प्रगताः असवः यस्मात् तद् प्रासुकम्, तद् प्रासुकम् । (प्रादि.ब.व्री.)

(२) प्राणयात्राकृते - (A) प्राणानां यात्रा इति प्राणयात्रा । (ष.त.पु.)

(B) प्राणयात्रायाः कृते इति प्राणयात्राकृते । (ष.त.पु.)

(३) सुधीः- सुष्ठु दधाति/ध्यायति इति सुधीः। (उप.त.पु.)

(४) जातिस्मरणसञ्ज्ञातविवेकः - (A) जातिस्मरणम् - पूर्ववत् ।

(B) जातिस्मरणेन सञ्ज्ञातः इति जातिस्मरण-सञ्ज्ञातः । (तृ.त.पु.)

(C) जातिस्मरणसञ्ज्ञातः विवेकः यस्य सः इति जातिस्मरणसञ्ज्ञातविवेकः । (समा.ब.व्री.)

(५) कल्पवित् - कल्पं वेत्ति इति कल्पवित् । (उप.त.पु.)... क्विप् प्रत्ययः ।

**चिकीर्षति[7] स्म[8] बालो[5]ऽपि[2], निहारादि[6] यदा[1] च[3] सः[4] ।**
**चक्रे[14] तदा[9] सदा[10] संज्ञाम्[13], सुव्यक्तां[12] बालधारिषु[11] ॥६२॥**

**अन्वय :-** यदा अपि च सः बालः निहारादि चिकीर्षति स्म तदा सदा बालधारिषु सुव्यक्तां संज्ञां चक्रे ।

**समास :-** (१) निहारादि - निहारः आदौ यस्मिन् तद् इति निहारादि, तद् निहारादि । (व्यधि. ब. व्री.)

(२) सुव्यक्ताम् - शोभना व्यक्ता इति सुव्यक्ता, तां सुव्यक्ताम् । (सु. पू. क.)

(३) बालधारिषु - बालं धारयन्ति इति बालधारिणः, तेषु बालधारिषु । (उप. त. पु.)

**शय्यातरकुमाराणाम्[2], सर्वेषां[1] युग्मभू[3]रिव[4] ।**
**वज्रो[9]ऽभवत्[10]प्रीतिगुणम्[7], समानं[6] तेषु[5] दर्शयन्[8] ॥६३॥**

**अन्वय :-** सर्वेषां शय्यातरकुमाराणां युग्मभूः इव तेषु समानं प्रीतिगुणं दर्शयन् वज्रः अभवत् ।

**समास :-** (१) शय्यातरकुमाराणाम् – (A) शय्यातराः – पूर्ववत् ।
(B) शय्यातराणां कुमाराः इति शय्यातरकुमाराः, तेषां शय्यातरकुमाराणाम् । (ष.त.पु.)
(२) युग्मभूः – युग्मेन भवति इति युग्मभूः । (उप.त.पु.)
(३) प्रीतिगुणम् – प्रीतिः एव गुणः इति प्रीतिगुणः, तं प्रीतिगुणम् । (अव. पू. क.)

**ज्ञानोपकरणादानैर्[1]बालक्रीडां[2] प्रपञ्चयन्[3] ।**
**वज्रः[4] प्रमोदयामास[7], प्रतिवासरमार्[5]यिकाः[6] ॥६४॥**

**अन्वय :-** ज्ञानोपकरणादानैः बालक्रीडां प्रपञ्चयन् वज्रः प्रतिवासरम् आर्यिकाः प्रमोदयामास ।

**समास :-** (१) ज्ञानोपकरणादानैः – (A) ज्ञानस्य उपकरणानि इति ज्ञानोपकरणानि । (ष.त.पु.)
(B) ज्ञानोपकरणानाम् आदानानि इति ज्ञानोपकरणादानानि, तैः ज्ञानोपकरणादानैः । (ष.त.पु.)
(२) बालक्रीडाम्–(A) बालस्य योग्या इति बालयोग्या । (ष.त.पु.)
(B) बालयोग्या क्रीडा इति बालक्रीडा, तां बालक्रीडाम् । (म.प.लो.क.)
(३) प्रतिवासरम् – वासरं वासरम् इति प्रतिवासरम्, तद् प्रतिवासरम् । (अव्य. भा.)

**वज्रं[3] दृष्ट्वा[4] सुनन्दा[8]ऽपि[9], सुरूपं[1] शीलशालिनम्[2] ।**
**शय्यातरेभ्यो[10]ऽयाचिष्ट[11], मत्सूनुर्[5]इति[6] वादिनी[7] ॥६५॥**

**अन्वय :-** सुरूपं शीलशालिनं वज्रं दृष्ट्वा मत्सूनुः इति वादिनी सुनन्दा अपि शय्यातरेभ्यः अयाचिष्ट ।

**समास :-** (१) सुरूपम् - शोभनं रूपं यस्य सः इति सुरूपः, तं सुरूपम् । (अव्य. ब. व्री.)

(२) शीलशालिनम् - शीलेन शालते इति शीलशाली, तं शीलशालिनम् । (उप. त. पु.)

(३) शय्यातरेभ्यः - शय्यातराः - पूर्ववत्, तेभ्यः शय्यातरेभ्यः ।

(४) मत्सूनुः - मम सूनुः इति मत्सूनुः । (ष. त. पु.)

**जननीपुत्रसम्बन्धम्[5], तव[1]ामुष्य[2]ार्भकस्य[3] च[4] ।**
**न[6] विद्मः[7] किन्त्व[8]सौ[9] न्यासो[11], गुरूणा[10]मिति[12] तेऽ[13]वदन्[14] ॥६६॥**

**अन्वय :-** तव अमुष्य अर्भकस्य च जननीपुत्रसम्बन्धं न विद्मः किन्तु तु असौ गुरूणां न्यासः इति ते अवदन् ।

**समास :-** (१) जननीपुत्रसम्बन्धम् - (A) जननी च पुत्रश्च इति जननीपुत्रौ । (इत. द्वन्द्व)

(B) जननीपुत्रयोः सम्बन्धः इति जननीपुत्र-सम्बन्धः, तं जननीपुत्रसम्बन्धम् । (ष.त.पु.)

**इत्यु[1]क्त्वा[2] ना[6]र्पयामासु[7]स्तस्यै[4] शय्यातराः[3] सुतम्[5] ।**
**तत[8]श्चै[9]क्षिष्ट[15] सा[10] वज्रम्[11], दूरस्थै[12]व[13] परस्ववत्[14] ॥६७॥**

**अन्वय :-** इति उक्त्वा शय्यातराः तस्यै सुतं न अर्पयामासुः ततः च दूरस्था एव सा वज्रं परस्ववत् ऐक्षिष्ट ।

**समास :-** (१) शय्यातराः - पूर्ववत् ।

(२) दूरस्था - दूरे *तिष्ठति* इति दूरस्था । (उप.त.पु.)।

(३) परस्ववत् - (A) परेषां स्वम् इति परस्वम् ।
(ष.त.पु.)

(B) परस्वम् इव परस्ववत् । (तद्धित)
स्यादेरिवे ७।१।५२ वत् प्रत्ययः ।

**महता[1] तू[3]परोधेन[2], सा[7] तेषामे[4]व[5] वेश्मनि[6] ।**
**धात्री[8]व[9] लालयामास[12], स्तन्यपानादिना[10] सुतम्[11] ॥६८॥**

**अन्वय :-** महता उपरोधेन तु तेषाम् एव वेश्मनि सा धात्री इव स्तन्यपानादिना सुतं लालयामास ।

**समास :-** (१) स्तन्यपानादिना - (A) स्तन्यस्य पानम् इति स्तन्यपानम् । (ष.त.पु.)

(B) स्तन्यपानम् आदौ यस्मिन् तद् इति स्तन्यपानादि, तेन स्तन्यपानादिना । (व्यधि.ब.व्री.)

**इतो[1]ऽपि[2] चा[3]चलपुरविषयश्रीविभूषणे[4] ।**
**कन्या[5] पूर्णा[6] चै[7]ति[8] नद्यौ[10], विद्येते[11] प्रार्थिताभिधे[9] ॥६९॥**

**अन्वय :-** इतः अपि च अचलपुरविषयश्रीविभूषणे कन्या पूर्णा च इति प्रार्थिताभिधे नद्यौ विद्येते ।

**समास :-** (१) अचलपुरविषयश्रीविभूषणे - (A) अचलपुरं नाम यस्य सः इति अचलपुरनामा । (सह.ब.व्री.)

(B) अचलपुरनामा विषयः इति अचलपुरविषयः ।
(म.प.लो.क.)

(C) अचलपुरविषय एव श्रीः इति अचलपुर-विषयश्रीः । (अव. पू. क.)

(D) अचलपुरविषयश्रियः विभूषणे इति अचलपुर-विषयश्री-विभूषणे। (ष. त. पु.)

(२) प्रार्थिताभिधे - प्रार्थिता अभिधा ययोः ते इति प्रार्थिताभिधे। (समा. ब. व्री.)

**अन्तराले तयोर्नद्योरवात्सुः केऽपि तापसाः।**
**पादलेपविदेकोऽभूत्, तेषां मध्ये च तापसः ॥७०॥**

**अन्वय :-** तयोः नद्योः अन्तराले केऽपि तापसाः अवात्सुः तेषां च मध्ये पादलेपविद् एकः तापसः अभूत्।

**समास :-** (१) पादलेपविद् - (A) पादयोः लेपः इति पादलेपः। (ष.त.पु.)

(B) पादलेपं वेत्ति इति पादलेपविद्। (उप.त.पु.) क्विप् प्रत्ययः।

**विधाय पादलेपं च, पादुके परिधाय च।**
**जलेऽपि स्थलवत्पादौ, विन्यस्यन् सञ्चचार सः ॥७१॥**

**अन्वय :-** पादलेपं च विधाय पादुके च परिधाय जले अपि स्थलवत् पादौ विन्यस्यन् सः सञ्चचार।

**समास :-** (१) पादलेपम् - पादलेपः-पूर्ववत्, तं पादलेपम्। (ष. त. पु.)

(२) स्थलवत् - स्थले इव इति स्थलवत्। (तद्धित)

**एवं च पादुकारूढः, स नित्यं जलवर्त्मना।**
**पुरे गतागतं चक्रे, जनयन्विस्मयं जने ॥७२॥**

**अन्वय :-** एवं च पादुकारूढः सः नित्यं जलवर्त्मना जने विस्मयं जनयन् पुरे गतागतं चक्रे ।

**समास :-** (१) पादुकारूढः – पादुकयोः आरूढः इति पादुकारूढः । (स.त.पु.)

(२) जलवर्त्मना – **(A)** जलेन पूर्णम् इति जलपूर्णम् । (तृ. त. पु.)

(B) जलपूर्णं वर्त्म इति जलवर्त्म, तेन जलवर्त्मना । (म. प. लो. क.)

(३) गतागतम् – गतं च तद् आगतं च इति गतागतम्, तद् गतागतम् । (वि. उभ. क.)

**न[6] हि[1] वो[2] दर्शने[3] कोऽपि[4], प्रभावो[5]ऽस्ति[7] यथा[8] हि[9] नः[10] ।**
**श्रमणोपासकाने[14]वम्[11], प्रजहास[15] स[12] तापसः[13] ॥७३॥**

**अन्वय :-** हि वः दर्शने कोऽपि प्रभावः न अस्ति यथा हि नः एवं स तापसः श्रमणोपासकान् प्रजहास ।

**समास :-** (१) श्रमणोपासकान् – श्रमणान् उपासते इति श्रमणोपासकाः, तान् श्रमणोपासकान् । (उप. त. पु.)

**तत्रा[7]ऽऽगाद[8]ार्यशमिताचार्यो[5] वज्रस्य[3] मातुलः[4] ।**
**विहारक्रमयोगेन[6], योगसिद्धो[1] महातपाः[2] ॥७४॥**

**अन्वय :-** योगसिद्धः महातपाः वज्रस्य मातुलः आर्यशमिताचार्यः विहारक्रमयोगेन तत्र आगात् ।

**समास :-** (१) आर्यशमिताचार्यः – (A) आर्यशमितः नाम यस्य सः इति आर्यशमितनामा । (समा.ब.व्री.)

(B) आर्यशमितनामा आचार्यः इति आर्यशमिताचार्यः । (म.प.लो.क.)

(२) विहारक्रमयोगेन – (A) विहारस्य क्रमः इति विहारक्रमः । (ष.त.पु.)

(B) विहारक्रमस्य योगः इति विहारक्रमयोगः, तेन विहारक्रमयोगेन । (ष.त.पु.)

(३) योगसिद्धः – योगेन सिद्धः इति योगसिद्धः ।(तृ.त.पु.)

(४) महातपाः – महत् तपः यस्य सः इति महातपाः । (समा.ब.व्री.)

**तस्मै[४] चा[२]चार्यवर्याय[५], कथयामासु[९]रार्हताः[३] ।**
**स्वदर्शनोपहासं[८] ते[१], तापसोपज्ञ[७]मुच्चकैः[६] ।।७५।।**

**अन्वय :-** ते च आर्हताः तस्मै आचार्यवर्याय उच्चकैः तापसोपज्ञं स्वदर्शनोपहासं कथयामासुः ।

**समास :-** (१) आचार्यवर्याय – आचार्यश्चासौ वर्यश्च इति आचार्य-वर्यः, तस्मै आचार्यवर्याय । (विशे०उत्त०क०)

(२) आर्हताः – अर्हन् देवः येषाम् इति आर्हताः । देवता ६।२।१०१ अण् प्रत्ययः । (तद्धित)

(३) स्वदर्शनोपहासम् – (A) स्वस्य दर्शनम् इति स्वदर्शनम् । (ष.त.पु.)

(B) स्वदर्शनस्य उपहासः इति स्वदर्शनोपहासः, तं स्वदर्शनोपहासम् । (ष. त. पु.)

(४) तापसोपज्ञम् – तापसेन उपजातः इति तापसोपज्ञः, तं तापसोपज्ञम् । (उप.त.पु.) क्वचित् ५।१।१७१.. ड प्रत्ययः ।

**तदाकर्ण्याऽऽर्यशमितः, श्रुतज्ञाने स्फुरत्यपि ।**
**ज्ञात्वा मतिबलेनापि, जगाद स्वानुपासकान् ॥७६॥**

**अन्वय :-** तद् आकर्ण्य आर्यशमितः श्रुतज्ञाने स्फुरति अपि मति-बलेन अपि ज्ञात्वा स्वान् उपासकान् जगाद ।

**समास :-** (१) श्रुतज्ञाने-श्रुतं च तद् ज्ञानं च इति श्रुतज्ञानम्, तस्मिन् श्रुतज्ञाने । (वि. पू. क.)

(२) मतिबलेन - मतेः बलम् इति मतिबलम्, तेन मतिबलेन । (ष. त. पु.)

**नास्य काऽपि तपःशक्तिस्तापसस्य तपस्विनः ।**
**केनाप्यसौ प्रयोगेण, प्रतारयति वोऽखिलान् ॥७७॥**

**अन्वय :-** तपस्विनः अस्य तापसस्य काऽपि तपःशक्तिः न असौ केनापि प्रयोगेण वः अखिलान् प्रतारयति ।

**समास :-** (१) तपःशक्तिः - तपसः शक्तिः इति तपःशक्तिः । (ष.त.पु.)

(२) तपस्विनः - तपः अस्ति यस्य तपस्वी, तस्य तपस्विनः । (तद्धित) अस्तपोमाया. ७।२।४७ विन् प्रत्ययः ।

**यथा हि अकालपुष्पादि, दर्शितं कौतुकावहम् ।**
**तथैतदपि विज्ञानम्, न तपःशक्तिरीदृशी ॥७८॥**

**अन्वय :-** यथा हि कौतुकावहम् अकालपुष्पादि दर्शितं तथा एतद् अपि विज्ञानम् ईदृशी तपःशक्तिः न ।

**समास** :- (१) **अकालपुष्पादि** – (A) अकाले फलितम् इति
अकाल**फलितम्** । (स.त.पु.)

(B) अकाल**फलितं** पुष्पम् इति अकालपुष्पम् ।
(म.प.**लो.क.**)

(C) अकाल**पुष्पम्** आदौ यस्य तद् इति
अकाल**पुष्पादि** । (व्यधि. ब. व्री.)

(२) **कौतुकावहम्** – **कौतुकम्** आवहति इति
कौतुकावहम् । (उप.त.पु.)

(३) तपःशक्तिः – **पूर्ववत्** ।

**उपदेशमात्रसिद्धे[3], साध्ये[4] युष्मादृशा[1]मपि[2] ।**
**विज्ञाने[5] विस्मयं[6] कृत्वा[7], मा[9] स्म[11] श्रद्धत्त[10] तापसान्[8] ॥७९॥**

**अन्वय** :-युष्मादृशाम् अपि उपदेशमात्रसिद्धे साध्ये विज्ञाने
विस्मयं कृत्वा तापसान् मा श्रद्धत्त स्म ।

**समास** :- (१) उपदेशमात्र**सिद्धे** – (A) उपदेश एव इति
उपदेशमात्रम् । (मयू. कर्म.)

(B) उप**देशमात्रेण** सिद्धः उपदेशमात्रसिद्धः,
तस्मिन् **उपदेश**मात्रसिद्धे । (तृ.त.पु.)

(२) युष्मादृशाम् – यूयमिव दृश्यन्ते युष्मादृशः, तेषां
युष्मादृशाम् । (उप.त.पु.) त्यदाद्यन्य० ५।१।१५२
क्विप् ।

**यदि[1] वः[2] प्रत्ययो[3] ना[4]स्ति[5], तापस[7]स्तन्नि[6]मन्त्र्यताम्[8] ।**
**गृहागतस्य[9] तस्यां[10]ह्री[11], प्रक्षाल्यौ[14] पादुके[12] अपि[13] ॥८०॥**

**अन्वय :-** यदि वः प्रत्ययः न अस्ति तद् तापसः निमन्त्र्यतां गृहागतस्य तस्य अंह्री पादुके अपि प्रक्षाल्यौ ।

**समास :-** (१) गृहागतस्य - **गृहे** आगतः इति गृहागतः, तस्य गृहागतस्य । (स.त.पु.)

**श्रावकै[2]स्तापसः[6] सो[5]ऽथ[1], मायां[3] कृत्वा[4] न्यमन्त्रयत[7] ।**
**एकस्य[8] श्रावकस्यौ[9]कस्यो[10]गात्[13]परिवृतः[12] जनैः[11] ॥८१॥**

**अन्वय :-** अथ श्रावकैः मायां **कृत्वा** सः तापसः न्यमन्त्रयत एकस्य श्रावकस्य ओकसि **जनैः** परिवृतः आगात् ।

**श्रावकः[5] सकुटु[1]म्बोऽपि[2], दर्शय[4]न्भक्तिनाटकम्[3] ।**
**तं[8] तापसम[9]भाषिष्ट[10], गृहद्वारमु[6]पागतम्[7] ॥८२॥**

**अन्वय :-** सकुटुम्बः अपि भक्तिनाटकं दर्शयन् श्रावकः गृहद्वारम् उपागतं तं तापसम् **अभाषिष्ट** ।

**समास :-** (१) सकुटुम्बः - **कुटुम्बेन** सह वर्तते यः सः इति सकुटुम्बः । (सह. ब. व्री.)

(२) भक्तिनाटकम् - **भक्तेः** नाटकः इति भक्तिनाटकः, तं भक्तिनाटकम् । (ष.त.पु.)

(३) गृहद्वारम् - **गृहस्य** द्वारम् इति गृहद्वारम्, तद् गृहद्वारम् । (ष.त.पु.)

**भगवन्[1] ! भवतः[2] पादपद्मे[3] प्रक्षालयाम्य[5]हम्[4] ।**
**ये[6] क्षालयन्ति[8] त्वत्पादा[7]वात्मानं[10] क्षालयन्ति[11] ते[9] ॥८३॥**

**अन्वय :-** भगवन् ! भवतः **पादपद्मे** अहं प्रक्षालयामि ये त्वत्पादौ क्षालयन्ति ते आत्मानं **क्षालयन्ति** ।

**समास :-** (१) पादपद्मे - **पादौ एव पद्मे** इति पादपद्मे, ते पादपद्मे । (अव.पू.क.)

(२) त्वत्पादौ - **तव पादौ** इति त्वत्पादौ, तौ त्वत्पादौ । (ष.त.पु.)

**तदस्माननुगृह्यैवम्, निस्तारयितुमर्हसि ।**
**स्खलयन्ति महात्मानो, भक्तिं भक्तिमतां न हि ॥८४॥**

**अन्वय :-** तद् एवम् अनुगृह्य अस्मान् निस्तारयितुम् अर्हसि हि महात्मानः भक्तिमतां भक्तिं न स्खलयन्ति ।

**समास :-** (१) महात्मानः - महान् आत्मा येषां ते इति महात्मानः । (समा.ब.व्री.)

(२) भक्तिमताम् - भक्तिः अस्ति येषां ते इति भक्तिमन्तः, तेषां भक्तिमताम् ।

**अनिच्छतोऽपि तस्याथ, श्रावकस्तापसस्य सः ।**
**क्षालयामास पादौ च, पादुके चोष्णवारिणा ॥८५॥**

**अन्वय :-** अथ सः श्रावकः अनिच्छतः अपि तस्य तापसस्य पादौ च पादुके च उष्णवारिणा क्षालयामास ।

**समास :-** (१) अनिच्छतः - न इच्छन् इति अनिच्छन्, तस्य अनिच्छतः । (ष. त. पु.)

(२) उष्णवारिणा - उष्णं च तद् वारि च इति उष्णवारि, तेन उष्णवारिणा । (वि. पू. क.)

**तत्पादपादुकाशौचमकार्षीत्स तथा यथा ।**
**तत्र प्रलेपगन्धोऽपि, नास्थान्नीचेऽनुरागवत् ॥८६॥**

**अन्वय :-** सः तथा तत्पादपादुकाशौचम् अकार्षीत् यथा नीचे अनुरागवत् तत्र प्रलेपगन्धः अपि न अस्थात् ।

**समास :-** (१) तत्पादपादुकाशौचम् - (A) पादौ च पादुके च इति पादपादुकाः । (इ.द्व.)

(B) तस्य पादपादुकाः इति तत्पादपादुकाः । (ष.त.पु.)

(C) तत्पादपादुकानां शौचम् इति तत्पादपादुका-शौचम्, तद् तत्पादपादुका-शौचम् । (ष.त.पु.)

(२) प्रलेपगन्धः – प्रलेपस्य गन्धः इति प्रलेपगन्धः । (ष.त.पु.)

(३) अनुरागवत्–अनुरागः इव इति अनुरागवत् । (तद्धित)

**महत्या[2] प्रतिपत्त्या[3] तम्[4], तापसं[5] श्रावकाग्रणीः[1] ।**
**अभोजयत्[6] कार्यवशात्[10], पूज्या[11] मिथ्यादृशो[8]ऽपि[9] हि[7] ॥८७॥**

**अन्वय :-** श्रावकाग्रणीः महत्या प्रतिपत्त्या तं तापसम् अभोजयत् हि मिथ्यादृशः अपि कार्यवशात् पूज्याः (भवन्ति) ।

**समास :-** (१) श्रावकाग्रणीः – (A) अग्रं नयति इति अग्रणीः । (उप. त. पु.)

(B) श्रावकेषु अग्रणीः इति श्रावकाग्रणीः । (स.त.पु.)

(२) कार्यवशात् – कार्यस्य वशम् इति कार्यवशम्, तस्मात् कार्यवशात् । (ष. त. पु.)

(३) मिथ्यादृशः – मिथ्या दृक् येषां ते इति मिथ्यादृशः । (अव्य. ब.व्री.)

**तेन[1] लेपापहारेण[2], तापसो[5] दुर्मनायितः[4] ।**
**ना[7]वेदीद्[8]भोजनास्वादम्[6], विगोपागमशङ्कया[3] ॥८८॥**

**अन्वय :-** तेन लेपापहारेण विगोपागमशङ्कया दुर्मनायितः तापसः भोजनास्वादं न अवेदीत् ।

**समास :-** (१) लेपापहारेण – लेपस्य अपहारः इति लेपापहारः, तेन लेपापहारेण । (ष.त.पु.)

(२) दुर्मनायितः – (A) दुष्टं मनः यस्य सः इति दुर्मनाः । (प्रादि. ब.व्री.)

(B) दुर्मना इव आचरितः इति दुर्मनायितः । (क्यङ् + त (क्त) प्रत्ययान्त नामधातु)

(३) भोजनास्वादम् – भोजनस्य आस्वादः इति भोजनास्वादः, तं भोजनास्वादम् । (ष.त.पु.)

(४) विगोपागमशङ्कया – (A) विगोपस्य आगमः इति विगोपागमः । (ष.त.पु.)

(B) विगोपागमस्य शङ्का इति विगोपागमशङ्का, तया विगोपागमशङ्कया । (ष.त.पु.)

**तापसो[१] भोजनं[२] कृत्वा[३], सरित्तीरं[८] पुनर्ययौ[९] ।**
**लोकैर्[५]वृतो[६] जलस्तम्भकौतूहलदिदृक्षया[४] ॥८९॥**

**अन्वय** :- तापसः भोजनं कृत्वा जलस्तम्भकौतूहलदिदृक्षया लोकैः वृतः पुनः सरित्तीरं ययौ ।

**समास** :- (१) सरित्तीरम् – सरितः तीरम् इति सरित्तीरम्, तद् सरित्तीरम् । (ष.त.पु.)

(२) जलस्तम्भकौतूहलदिदृक्षया – (A) जले स्तम्भः इति जलस्तम्भः । (स.त.पु.)

(B) कुतूहलस्य भाव इति कौतूहलम् । (तद्धित)

(C) जलस्तम्भस्य कौतूहलम् इति जलस्तम्भ-कौतूहलम् (ष.त.पु.)

(D) जलस्तम्भकौतूहलस्य दिदृक्षा इति *जलस्तम्भकौतूहलदिदृक्षा, तया जलस्तम्भ-*कौतूहलदिदृक्षया । (ष.त.पु.)

**लेपाश्रयः[3] स्याद[4]द्यापि[1], कोऽपी[2]त्ये[5]ल्पमतिः[6] स[7] तु[8] ।**
**अलीकसाहसं[9] कृत्वा[10], प्राग्वत्[11]प्राविशद[13]म्भसि[12] ॥९०॥**

**अन्वय :-** अद्यापि कोऽपि लेपाश्रयः स्याद् इति अल्पमतिः सः तु अलीकसाहसं कृत्वा प्राग्वत् अम्भसि प्राविशद् ।

**समास :-** (१) लेपाश्रयः - लेपस्य आश्रयः इति लेपाश्रयः । (ष.त.पु.)

(२) अल्पमतिः - अल्पा मतिः यस्य सः इति अल्पमतिः । (समा. ब. व्री.)

(३) अलीकसाहसम् - अलीकश्चासौ साहसश्च इति अलीकसाहसः, तम् अलीकसाहसम् । (वि.पू.क.)

(४) प्राग्वत् - प्राग् इव इति प्राग्वत् । (तद्धित)

**ततः[1] कमण्डलु[2]रिव[3], कुर्वन्[5] बुडबुडारवम्[4] ।**
**ब्रुडति[9] स्म[10] सरित्तीरे[8], स[6] तापसकुमारकः[7] ॥९१॥**

**अन्वय :-** ततः कमण्डलुः इव बुडबुडारवं कुर्वन् सः तापस-कुमारकः सरित्तीरे ब्रुडति स्म ।

**समास :-** (१) बुड्बुडारवम् - बुड् बुड् आरवः इति बुडबुडारवः, तं बुडबुडारवम् । (वि. पू. क.)

(२) सरित्तीरे - पूर्ववत् ।

(३) तापसकुमारकः - तापसश्चासौ कुमारकश्च इति तापसकुमारकः । (वि. उत्त. क.)

**वयं[5] मायाविनाऽ[1]नेन[2], मोहिताः[6] स्म[7] कियच्चि[3]रम्[4] ।**
**मलिन्यभू[13]दिति[8] मनस्[12]तदा[9] मिथ्यादृशा[10]मपि[11] ॥९२॥**

**अन्वय :-** मायाविना अनेन कियत् चिरं वयं मोहिताः स्म इति तदा मिथ्यादृशाम् अपि मनः मलिन्यभूत् ।

**समास :-** (१) मायाविना – माया अस्ति अस्य इति मायावी, तेन मायाविना । (तद्धित) ।

(२) मलिन्यभूत् – (A) न मलिनम् इति अमलिनम् । (नञ्.त.पु.)

(B) अमलिनं मलिनम् अभूत् इति मलिन्यभूत् । (गति.त.पु.)

(३) मिथ्यादृशाम् – मिथ्यादृशः – पूर्ववत्, तेषां मिथ्यादृशाम् ।

**दत्तताले[२] च[४] तत्कालम्[१], जने[५] तुमुलकारिणि[३] ।**
**आचार्या[८] अपि[९] तत्राऽऽगुः[६][१०], श्रुतस्कन्धधुरन्धराः[७] ॥१३॥**

**अन्वय :-** तत्कालं दत्तताले तुमुलकारिणि च जने तत्र श्रुतस्कन्धधुरन्धराः आचार्याः अपि आगुः ।

**समास :-** (१) दत्तताले – दत्तं तालं येन सः इति दत्तताल:, तस्मिन् दत्तताले । (समा. ब. व्री.)

(२) तत्कालम् – स चासौ कालश्च इति तत्कालः, तं तत्कालम् । (वि.पू.क.)

(३) तुमुलकारिणि – तुमुलं करोति इति तुमुलकारी, तस्मिन् तुमुलकारिणि । (उप. त. पु.)

(४) श्रुतस्कन्धधुरन्धराः – (A) श्रुतमेव स्कन्धः इति श्रुतस्कन्धः । (अव.पू.क.)

(B) श्रुतस्कन्धस्य धूः इति श्रुतस्कन्धधूः । (ष.त.पु.)

(C) श्रुतस्कन्धधुरं धरन्ति इति श्रुतस्कन्धधुरन्धराः । (उप. त. पु.)

**तत[१]श्चिकीर्षवः[५] स्वस्य[२], दर्शनस्य[३] प्रभावनाम्[४] ।**
**आचार्या[६]श्चिक्षिपु[९]र्योगविशेषं[८] सरिदन्तरा[७] ॥९४॥**

**अन्वय :-** ततः स्वस्य दर्शनस्य प्रभावनां चिकीर्षवः आचार्याः सरिदन्तरा योगविशेषं चिक्षिपुः ।

**समास :-** (१) चिकीर्षवः - कर्तुम् इच्छन्तीति चिकीर्षवः । (सन् + उ)

(२) योगविशेषम् - विशिष्टः योगः इति योगविशेषः, तं योगविशेषम् । (म.व्यं.क.)

(३) सरिदन्तरा - सरितः अन्तरा इति सरिदन्तरा । (ष.त.पु.)

**एहि[२] पुत्र[१]! यथा[३] यामो[७], वयं[४] परतटे[६] तव[५] ।**
**इति[८] चा[९]वोचदा[१३]चार्यवर्यो[१२] धुर्यो[११] महात्मनाम्[१०] ॥९५॥**

**अन्वय :-** पुत्र ! एहि यथा वयं तव परतटे यामः इति च महात्मनां धुर्यः आचार्यवर्यः अवोचद् ।

**समास :-** (१) परतटे - परश्चासौ तटश्च इति परतटः, तस्मिन् परतटे । (वि. पू. क.)

(२) आचार्यवर्यः - पूर्ववत् ।

(३) महात्मनाम् - महात्मानः-पूर्ववत्, तेषां महात्मनाम् ।

**तटद्वये[४] तत[१]स्तस्याः[२], सरितो[३] मिलिते[५] सति[६] ।**
**आचार्यः[८] सपरीवारः[७], परतीरभुवं[९] ययौ[१०] ॥९६॥**

**अन्वय :-** ततः तस्याः सरितः तटद्वये मिलिते सति सपरीवारः आचार्यः परतीरभुवं ययौ ।

**समास :-** (१) तटद्वये - तटयोः द्वयम् इति तटद्वयम्, तस्मिन् तटद्वये। (ष. त. पु.)

(२) सपरीवारः - परीवारेण सह वर्तते यः सः इति सपरीवारः। (सह. ब. व्री.)

(३) परतीरभुवम् - (A) परं च तद् तीरञ्च इति परतीरम्। (वि.पू.क.)

(B) परतीरस्य भूः इति परतीरभूः, तां परतीरभुवम्। (ष. त. पु.)

**आचार्यैर्दर्शितं तं चातिशयं प्रेक्ष्य तापसाः।**
**सर्वेऽपि संविविजिरे, तद्भक्तश्चाखिलो जनः ॥९७॥**

**अन्वय :-** आचार्यैः च दर्शितं तम् अतिशयं प्रेक्ष्य सर्वे अपि तापसाः अखिलः च तद्भक्तः जनः संविविजिरे।

**समास :-** (१) तद्भक्तः - तेषां भक्तः इति तद्भक्तः। (ष. त. पु.)

**आचार्यस्यार्यशमितस्यान्तिके प्राव्रजन्नथ।**
**सर्वे मथितमिथ्यात्वास्तापसा एकचेतसः ॥९८॥**

**अन्वय :-** अथ आचार्यस्य आर्यशमितस्य अन्तिके एकचेतसः मथितमिथ्यात्वाः सर्वे तापसाः प्राव्रजन्।

**समास :-** (१) मथितमिथ्यात्वाः - मथितं मिथ्यात्वं यैः ते इति मथितमिथ्यात्वाः। (समा. ब. व्री.)

(२) एकचेतसः - एकं चेतः येषां ते इति एकचेतसः। (समा. ब. व्री.)

**ते ब्रह्मद्वीपवास्तव्या, इति जातास्तदन्वये।**
**ब्रह्मद्वीपिकनामानः, श्रमणा आगमोदिताः ॥९९॥**

**अन्वय :-** ते ब्रह्मद्वीपवास्तव्याः इति तदन्वये ब्रह्मद्वीपिकनामानः श्रमणाः आगमोदिताः जाताः ।

**समास :-** (१) ब्रह्मद्वीपवास्तव्याः - (A) ब्रह्म नाम यस्य सः इति ब्रह्मनामा । (समा.ब.व्री.)

(B) ब्रह्मनामा द्वीपः इति ब्रह्मद्वीपः । (म.प.लो.क.)

(C) ब्रह्मद्वीपे वास्तव्याः इति ब्रह्मद्वीपवास्तव्याः । (स. त. पु.)

(२) तदन्वये-तेषाम् अन्वयः इति तदन्वयः, तस्मिन् तदन्वये । (ष. त. पु.)

(३) ब्रह्मद्वीपिकनामानः - (A) ब्रह्मद्वीपे भवम् इति ब्रह्मद्वीपिकम् । (तद्धित)

(B) ब्रह्मद्वीपिकं नाम येषां ते इति ब्रह्मद्वीपिकनामानः । (समा. ब. व्री.)

(४) आगमोदिताः - आगमे उदिताः इति आगमोदिताः । (स. त. पु.)

**इत[१]श्च[२] वज्र[४]स्तत्रस्थः[३], क्रमेणा[५]भूत्[७] त्रिहायणः[६] ।**
**तदा[८] च[९] धनगिर्याद्या[११]स्तत्र[१०] साधव[१२] आययुः[१३] ॥१००॥**

**अन्वय :-** इतः च तत्रस्थः वज्रः क्रमेण त्रिहायणः अभूत् तदा च तत्र धनगिर्याद्याः साधवः आययुः ।

**समास :-** (१) तत्रस्थः - तत्र तिष्ठति इति तत्रस्थः । (उप.त. पु.)

(२) त्रिहायणः - त्रीणि हायनानि यस्य सः इति त्रिहायणः । (संख्या. ब. व्री) चतुस्त्रेर्हायन० २।३।७४ णत्वं भवति ।

(३) धनगिर्याद्याः - धनगिरिः आद्यः येषु ते इति धनगिर्याद्याः । (समा. ब. व्री.)

**आयास्यति धनगिरिर्ग्रहीष्यामि स्वमात्मजम् ।**
**सुनन्दैवं चिन्तयन्ती, तेष्वायातेष्वमोदत ॥१०१॥**

**अन्वय :-** धनगिरिः आयास्यति स्वम् आत्मजं ग्रहीष्यामि एवं चिन्तयन्ती सुनन्दा तेषु आयातेषु अमोदत ।

**समास :-** (१) आत्मजम् - आत्मनः जातः इति आत्मजः, तम् आत्मजम् । (उप. त. पु.)

**सुनन्दाऽपि महर्षिभ्यः, स्वनन्दनमयाचत ।**
**ते पुनर्नार्पयामासुः, प्रत्यभाषन्त चेदृशम् ॥१०२॥**

**अन्वय :-** सुनन्दा अपि महर्षिभ्यः स्वनन्दनम् अयाचत ते पुनः न अर्पयामासुः ईदृशं च प्रत्यभाषन्त ।

**समास :-** (१) महर्षिभ्यः - महान्तश्चामी ऋषयश्च इति महर्षयः, तेभ्यः महर्षिभ्यः । (वि. पू. क.)

(२) स्वनन्दनम् - स्वस्य नन्दनः इति स्वनन्दनः, तं स्वनन्दनम् । (ष. त. पु.)

**अयाचितस्त्वया दत्तो, मुग्धेऽस्मभ्यमयं शिशुः ।**
**वान्तान्नमिव को दत्तं, पुनरादातुमिच्छति ॥१०३॥**

**अन्वय :-** मुग्धे ! त्वया अस्मभ्यम् अयाचितः अयं शिशुः दत्तः वान्तान्नम् इव दत्तं पुनः आदातुं कः इच्छति ।

**समास :-** (१) अयाचितः-न याचितः इति अयाचितः । (नञ्.त.पु.)

(२) वान्तान्नम् - वान्तं च तद् अन्नं च इति वान्तान्नम्, तद् वान्तान्नम् । (वि. पू. क.)

**विक्रीतेष्विव दत्तेषु, स्वामित्वमपगच्छति ।**
**मा याचिष्ठाः सुतं दत्त्वा, त्वयैष परसात्कृतः ॥१०४॥**

**अन्वय :-** विक्रीतेषु इव दत्तेषु स्वामित्वम् अपगच्छति सुतं दत्त्वा मा याचिष्ठाः त्वया एष परसात्कृतः ।

**समास :-** (१) परसात्कृतः – परस्मिन् अधीनः कृतः इति परसात्कृतः । तत्राधीने ७।२।१३२ सात् प्रत्ययः । (तद्धित)

**पक्षयोरुभयोरेवमुच्चैर्विवदमानयोः ।**
**लोकोऽवादीदमुं वादम्, राजा निर्धारयिष्यति ॥१०५॥**

**अन्वय :-** एवम् उच्चैः विवदमानयोः उभयोः पक्षयोः लोकः अवादीत् अमुं वादं राजा निर्धारयिष्यति ।

**ततः सुनन्दा लोकेन, सहिता नृपपर्षदि ।**
**जगाम सङ्घसहिताः, श्रमणा अपि ते ययुः ॥१०६॥**

**अन्वय :-** ततः लोकेन सहिता सुनन्दा नृपपर्षदि जगाम सङ्घ-सहिताः ते श्रमणाः अपि ययुः ।

**समास :-** (१) नृपपर्षदि – नृपस्य पर्षद् इति नृपपर्षद्, तस्यां नृपपर्षदि । (ष.त.पु.)

(२) सङ्घसहिताः – सङ्घेन सहिताः इति सङ्घसहिताः । (तृ.त.पु.)

**राज्ञो न्यषीदद्वामेन, सुनन्दा दक्षिणेन तु ।**
**श्रीमान्सङ्घः समस्तोऽपि, यथास्थानमथापरे ॥१०७॥**

**अन्वय :-** अथ सुनन्दा राज्ञः वामेन दक्षिणेन तु श्रीमान् समस्तः अपि सङ्घः अपरे यथास्थानं न्यषीदत् ।

**समास :-** (१) श्रीमान् - श्रियः सन्ति यस्य श्रीमान्। (तद्धित)

(२) यथास्थानम् - स्थानस्य योग्यम् इति यथास्थानम्। (अव्य. भा.)

**परिभाव्य द्वयोर्भाषामुत्तरं चावदन्नृपः ।**
**येनाहूतः समायाति, बालस्तस्य भवत्वसौ ॥१०८॥**

**अन्वय :-** नृपः द्वयोः भाषां परिभाव्य उत्तरं च अवदत् येन आहूतः बालः समायाति तस्य असौ भवतु।

**तं निर्णयममंसाताम्, तौ तु पक्षावुभावपि ।**
**इति चोचतुरादौ कः, सूनुमाह्वातुमर्हति ॥१०९॥**

**अन्वय :-** तौ उभौ अपि पक्षौ तं निर्णयम् अमंसातां तु इति च ऊचतुः आदौ कः सूनुम् आह्वातुम् अर्हति।

**स्त्रीगृह्याः प्रोचिरे पौरा, व्रतिनामेष बालकः ।**
**चिरसङ्घटितप्रेमा, तद्वचो नातिलङ्घते ॥११०॥**

**अन्वय :-** स्त्रीगृह्याः पौराः प्रोचिरे व्रतिनां चिरसङ्घटितप्रेमा एषः बालकः तद्वचः न अतिलङ्घते।

**समास :-** (१) स्त्रीगृह्याः-स्त्रीभिः गृह्याः इति स्त्रीगृह्याः। (तृ.त.पु.)

(२) चिरसंङ्घटितप्रेमा - (A) चिरेण संघटितम् इति चिरसङ्घटितम्। (प्रादि.क.)

(B) चिरसङ्घटितं प्रेम यस्य सः इति चिरसंघटितप्रेमा। (समा. ब. व्री.)

(३) तद्वचः-तेषां वचः इति तद्वचः, तद् तद्वचः। (ष.त.पु.)

**मातैवाह्वयतामादावियं दुष्करकारिणी ।**
**नारीति चानुकम्प्याऽपि, भवत्येतद्धि नान्यथा ॥१११॥**

**अन्वय :-** माता च दुष्करकारिणी इति इयम् एव आदौ आह्वयताम् नारी अनुकम्प्या एतद् अपि हि अन्यथा न भवति ।

**समास :-** (१) दुष्करकारिणी – (A) दुःखेन क्रियते इति दुष्करम् । (उप.त.पु.)

(B) दुष्करं करोति इति दुष्करकारिणी । (उप. त. पु.)

**ततः सुनन्दा बहुशो, बालक्रीडनकानि च ।**
**विविधानि च भक्ष्याणि, दर्शयन्त्येवमभ्यधात् ॥११२॥**

**अन्वय :-** ततः च बहुशः बालक्रीडनकानि विविधानि च भक्ष्याणि दर्शयन्ती सुनन्दा एवम् अभ्यधात् ।

**समास :-** (१) बालक्रीडनकानि – (A) बालस्य योग्यानि इति बालयोग्यानि । (ष.त.पु.)

(B) बालयोग्यानि क्रीडनकानि इति बालक्रीडनकानि तानि बालक्रीडनकानि । (म.प.लो.क.)

**हस्तिनोऽमी अमी★ अश्वाः, पत्तयोऽमी अमी रथाः ।**
**तव क्रीडार्थमानीतास्तदद् गृहाणैहि दारक ! ॥११३॥**

**अन्वय :-** अमी हस्तिनः अमी अश्वाः अमी पत्तयः अमी रथाः तव क्रीडार्थम् आनीताः दारक ! एहि तद् गृहाण ।

**समास :-** (१) क्रीडार्थम्–क्रीडायाः अर्थम् इति क्रीडार्थम् । (ष.त.पु.)

---

★ अदोमुमी १।२।३५ सूत्रेणाऽत्राऽसन्धिः।

श्री विजय नेमिसूरि-ज्ञान शा...
શાસન સમ્રાટ ભવન

**मोदका मण्डका द्राक्षाः, शर्कराश्चान्यदप्यदः ।**
**यदिच्छसि तदस्त्येव, गृह्यतामेहि दारक ! ॥११४॥**

**अन्वय :-** मोदकाः मण्डकाः द्राक्षाः शर्कराः च अन्यद् अपि अदः यद् इच्छसि तद् अस्ति एव दारक ! एहि गृह्यताम् ।

**तवायुष्मन् ! कृषीयाहम्, सर्वाङ्गमवतारणे ।**
**चिरं जीव चिरं नन्द, सुनन्दामाशु मोदय ॥११५॥**

**अन्वय :-** आयुष्मन् ! अहं तव अवतारणे सर्वाङ्गं कृषीय चिरं जीव चिरं नन्द सुनन्दाम् आशु मोदय ।

**समास :-** (१) सर्वाङ्गम् - सर्वं च तद् अङ्गं च इति सर्वाङ्गम्, तद् सर्वाङ्गम् । (वि.पू.क.)

**मम देवो मम पुत्रो, ममात्मा मम जीवितम् ।**
**त्वमेवासीति मां दीनाम्, परिष्वङ्गेण जीवय ॥११६॥**

**अन्वय :-** त्वम् एव मम देवः मम पुत्रः मम आत्मा मम जीवितम् असि इति दीनां मां परिष्वङ्गेण जीवय ।

**विलक्षां मा कृथा वत्स !, मां लोकस्यास्य पश्यतः ।**
**हृदयं मेऽन्यथा भावि, पक्ववालुङ्कवद् द्विधा ॥११७॥**

**अन्वय :-** वत्स ! अस्य लोकस्य पश्यतः मां विलक्षां मा कृथाः अन्यथा मे हृदयं पक्ववालुङ्कवद् द्विधा भावि ।

**समास :-** (१) पक्ववालुङ्कवद् - (A) पक्वं च तद् वालुङ्कं च इति पक्ववालुङ्कम् । (वि.पू.क.)

(B) पक्ववालुङ्कम् इव इति पक्ववालुङ्कवद् । (तद्धित)

**एहि हंसगते! वत्स!, ममोत्सङ्गं परिष्कुरु ।**
**कुक्षिवासावक्रयो मे, न लभ्यः किमियानपि ? ॥११८॥**

**अन्वय :-** हंसगते ! वत्स ! एहि मम उत्सङ्गं परिष्कुरु किम् इयान् अपि मे कुक्षिवासावक्रयः न लभ्यः ? ।

**समास :-** (१) हंसगते ! – हंसस्य गतिः इव गतिः यस्य सः इति हंसगतिः, तत्संबोधने हंसगते ! । (उप.ब.व्री.)

(२) कुक्षिवासावक्रयः – (A) कुक्षौ वासः इति कुक्षिवासः । (स.त.पु.)

(B) कुक्षिवासस्य अवक्रयः इति कुक्षिवासावक्रयः । (ष.त.पु.)

**एवं क्रीडनकैर्भक्ष्यप्रकारैश्चाटुकैरपि ।**
**सौनन्देयः सुनन्दायां, नाभ्यगच्छन्मनागपि ॥११९॥**

**अन्वय :-** एवं क्रीडनकैः चाटुकैः भक्ष्यप्रकारैः अपि सौनन्देयः मनाग् अपि सुनन्दायाः न अभ्यगच्छत् ।

**समास :-** (१) भक्ष्यप्रकारैः – भक्ष्याणां प्रकाराः इति भक्ष्यप्रकाराः, तैः भक्ष्यप्रकारैः । (ष.त.पु.)

(२) सौनन्देयः – सुनन्दायाः अपत्यम् इति सौनन्देयः । ङ्याप्त्यूङः ६।१।७०... एयण् (तद्धित)

**न मातुरुपकाराणाम्, कोऽपि स्यादनृणः पुमान् ।**
**एवं विदन्नपि सुधीर्वज्र एवमचिन्तयत् ॥१२०॥**

**अन्वय :-** मातुः उपकाराणां कः अपि पुमान् अनृणः न स्याद् एवं विदन् अपि सुधीः वज्रः एवम् अचिन्तयत् ।

**समास :-** (१) अनृणः - न विद्यते ऋणं यस्य सः इति अनृणः ।
(नञ्.ब.व्री.)
(२) सुधीः - पूर्ववत् ।

**यदि सङ्गमुपेक्षिष्ये, कृत्वा मातुः कृपामहम् ।**
**तदा स्यान्मम संसारो, दीर्घदीर्घतरः खलु ॥१२१॥**

**अन्वय :-** यदि अहं मातुः कृपां कृत्वा सङ्गम् उपेक्षिष्ये तदा खलु मम संसारः दीर्घदीर्घतरः स्यात् ।

**समास :-** (१) दीर्घदीर्घतरः - दीर्घाद् दीर्घतरः इति दीर्घदीर्घतरः ।
(प.त.पु.)

**इयं च धन्या माता, मेऽल्पकर्मा प्रव्रजिष्यति ।**
**उपेक्ष्यमस्या ह्यापातमात्रजं दुःखमप्यदः ॥१२२॥**

**अन्वय :-** मे इयं च धन्या अल्पकर्मा माता प्रव्रजिष्यति अस्याः हि आपातमात्रजम् अदः दुःखम् अपि उपेक्ष्यम् ।

**समास :-** (१) अल्पकर्मा - अल्पानि कर्माणि यस्याः सा इति अल्पकर्मा । (समा.ब.व्री.)
(२) आपातमात्रजम् - (A) आपातम् एव इति आपातमात्रम् । (मयू.व्यं.क.)
(B) आपातमात्रात् जातम् इति आपातमात्रजम् ।
(उप.त.पु.)

**दीर्घदर्शी विमृश्यैवम्, वज्रो वज्रदृढाशयः ।**
**प्रतिमास्थ इव स्थानान्न चचाल मनागपि ॥१२३॥**

**अन्वय :-** दीर्घदर्शी वज्रदृढाशयः वज्रः एवं विमृश्य प्रतिमास्थः इव स्थानात् मनाग् अपि न चचाल ।

**समास :-** (१) दीर्घदर्शी – दीर्घं पश्यति इति दीर्घदर्शी । (उप.त.पु.)

(२) वज्रदृढाशयः – (A) दृढः आशयः इति दृढाशयः । (वि.पू.क.)

(B) वज्र इव दृढाशयः यस्य सः इति वज्रदृढाशयः । (उप.ब.व्री.)

(३) प्रतिमास्थः – प्रतिमा इव तिष्ठति इति प्रतिमास्थः । (उप.त.पु.)

**राजोऽवादीत्सुनन्दे! त्वमपसर्प शिशुर्ह्यसौ ।**
**नागादाहूयमानस्त्वामजानन्निव मातरम् ॥१२४॥**

**अन्वय :-** राजा अवादीत् सुनन्दे ! त्वम् अपसर्प त्वां मातरम् अजानन् इव आहूयमानः हि असौ शिशुः न आगात् ।

**समास :-** (१) अजानन् – न जानन् इति अजानन् । (नञ्.त.पु.)

**ततो राज्ञा धनगिरिः, प्राप्तावसरमीरितः ।**
**रजोहरणमुत्क्षिप्य, जगादैवं मिताक्षरम् ॥१२५॥**

**अन्वय :-** ततः राज्ञा प्राप्तावसरम् ईरितः धनगिरिः रजोहरणम् उत्क्षिप्य मिताक्षरम् एवं जगाद ।

**समास :-***(१)प्राप्तावसरम् – प्राप्तः अवसरः यथा स्यात् तथा इति प्राप्तावसरम् । (समा.ब.व्री.)

---

* एतत्समासे यत्-तत्सर्वनामप्रयोगो नास्ति तथापि स बहुव्रीहिः कथ्यते, दृश्यताम् समाससुबोधिकायाम् नि. ६४

(२) रजोहरणम् - रजांसि ह्रियते अनेन इति रजोहरणम्, तद् रजोहरणम्। (उप.त.पु.)

(३) मिताक्षरम् - मितानि अक्षराणि यस्मिन् तद् इति मिताक्षरम्, तद् मिताक्षरम्। (समा.ब.व्री.)

**व्रते[३] चेद्[२] व्यवसायस्[५]ते[४], तत्त्वज्ञो[८]ऽसि[९] यदि[६] स्वयम्[७] ।**
**तद्[१०]रजोहरणं[१३] धर्मध्वजम्[१२]आदत्स्व[१४] मे[११]ऽनघ[१] ! ॥१२६॥**

**अन्वय :-** अनघ ! चेद् व्रते ते व्यवसायः यदि स्वयं तत्त्वज्ञः असि तद् मे धर्मध्वजं रजोहरणम् आदत्स्व ।

**समास :-** (१) तत्त्वज्ञः - तत्त्वं जानाति इति तत्त्वज्ञः । (उप.त.पु.)

(२) रजोहरणम् - पूर्ववत् ।

(३) धर्मध्वजम् - धर्मस्य ध्वजः इति धर्मध्वजः, तं धमर्ध्वजम् । (ष.त.पु.)

(४) अनघ ! - न सन्ति अघानि यस्मिन् सः इति अनघः, तत्संबोधने अनघ ! (नञ्.ब.व्री.)

**वज्रस्[७]तदै[१]व[२] कलभ[३], इ[४]वोत्क्षिप्तकरो[५] द्रुतम्[९] ।**
**दधाव[१०]ाभिधनगिरि[८], प्रक्वणत्पादघर्घरः[६] ॥१२७॥**

**अन्वय :-** तदा एव कलभः इव उत्क्षिप्तकरः प्रक्वणत्पादघर्घरः वज्रः अभिधनगिरि द्रुतं दधाव ।

**समास :-** (१) उत्क्षिप्तकरः - उत्क्षिप्तौ करौ येन सः इति उत्क्षिप्तकरः । (समा. ब.व्री.)

(२) अभिधनगिरि - धनगिरिम् अभि इति अभिधनगिरि । (अव्य.भा.)

(३) प्रक्वणत्पादघर्घरः – (A) पादयोः बद्धाः इति पादबद्धाः (स.त.पु.)

(B) पादबद्धाः घर्घराः इति पादघर्घराः । (म.प.लो.क.)

(C) प्रक्वणन्तः पादघर्घराः यस्य सः इति प्रक्वणत्पादघर्घरः । (समा.ब.व्री.)

**गत्वा[3] च[2] पितु[4]रुत्स[5]ङ्गमधिरुह्य[6] विशुद्धधीः[1] ।**
**तद्[8]रजोहरणं[9] लीलासरोजव[7]दुपाददे[10] ॥१२८॥**

**अन्वय :-** विशुद्धधीः च गत्वा पितुः उत्सङ्गम् अधिरुह्य लीलासरोजवत् तद् रजोहरणम् उपाददे ।

**समास :-** (१) विशुद्धधीः – विशुद्धा धीः यस्य सः इति विशुद्धधीः । (समा. ब.व्री.)

(२) रजोहरणम् – पूर्ववत्, तद् रजोहरणम् ।

(३) लीलासरोजवत् – (A) सरसि जातम् इति सरोजम् । (उप.त.पु.)

(B) लीलया गृहीतम् इति लीलागृहीतम् । (तृ.त.पु.)

(C) लीलागृहीतं सरोजम् इति लीलासरोजम् । (म.प.लो.क.)

(D) लीलासरोजम् इव इति लीलासरोजवत् । (तद्धित)

**वज्रेण[1] पाणिपद्माभ्याम्[2], रजोहरण[4]मुद्धृतम्[3] ।**
**विरराज[8] रोमगुच्छः[6], इव[7] प्रवचनश्रियः[5] ॥१२९॥**

**अन्वय :-** वज्रेण पाणिपद्माभ्याम् उद्धृतं रजोहरणं प्रवचनश्रियः रोमगुच्छः इव विरराज ।

**समास :-** (१) पाणिपद्माभ्याम् - पाणी इव पद्मे इति पाणिपद्मे, ताभ्यां पाणिपद्माभ्याम् । (अव.पू.क.)

(२) रजोहरणम् - पूर्ववत् ।

(३) रोमगुच्छः - रोम्णां गुच्छः इति रोमगुच्छः । (ष.त.पु.)

(४) प्रवचनश्रियः - प्रवचनमेव श्रीः इति प्रवचनश्रीः, तस्याः प्रवचनश्रियः । (अव.पू.क.)

**उल्लसत्कुन्दकलिकाकारदन्तद्युतिस्मितः ।**
**स रजोहरणाद् दृष्टिम्, नान्यत्रादान्मनागपि ॥१३०॥**

**अन्वय :-** उल्लसत्कुन्दकलिकाकारदन्तद्युतिस्मितः सः रजोहरणाद् अन्यत्र मनाग् अपि दृष्टिं न अदात् ।

**समास :-** (१) उल्लसत्कुन्दकलिकाकारदन्तद्युतिस्मितः -

(A) कुन्दस्य कलिकाः इति कुन्दकलिकाः । (ष.त.पु.)

(B) उल्लसन्त्यश्चेमाः कुन्दकलिकाश्च इति उल्लसत्कुन्दकलिकाः । (वि.पू.क.)

(C) उल्लसत्कुन्दकलिकाया: आकारः येषां ते इति उल्लसत्कुन्दकलिकाकाराः । (व्यधि.ब.व्री.)

(D) उल्लसत्कुन्दकलिकाकाराः दन्ताः इति उल्लसत्कुन्दकलिकाकारदन्ताः । (वि.पू.क.)

(E) उल्लसत्कुन्दकलिकाकारदन्तानां द्युतिः इति उल्लसत्कुन्दकलिकाकारदन्तद्युतिः । (ष.त.पु.)

(F) उल्लसत्कुन्दकलिकाकारदन्तद्युत्या स्मितः इति उल्लसत्कुन्दकलिकाकारदन्तद्युतिस्मितः । (तृ.त.पु.)

(२) रजोहरणाद् - रजोहरणम्-पूर्ववत्, तस्मात् रजोहरणाद् ।

**दिनात्यये पद्मिनीव, सद्यो म्लानिमुपेयुषी ।**
**हस्तविन्यस्तचिबुका, सुनन्दैवमचिन्तयत् ॥१३१॥**

**अन्वय :-** दिनात्यये पद्मिनी इव सद्यः म्लानिम् उपेयुषी हस्तविन्यस्तचिबुका सुनन्दा एवम् अचिन्तयत् ।

**समास :-** (१) दिनात्यये – दिनस्य अत्ययः इति दिनात्ययः, तस्मिन् दिनात्यये । (ष.त.पु.)

(२) हस्तविन्यस्तचिबुका – (A) हस्ते विन्यस्तः इति हस्तविन्यस्तः । (स.त.पु.)

(B) हस्तविन्यस्तः चिबुकः यया सा इति हस्तविन्यस्तचिबुका । (समा.ब.व्री.)

**भ्राता मम प्रव्रजितो, भर्ता प्रव्रजितोऽथ मे ।**
**प्रव्रजिष्यति पुत्रोऽपि, प्रव्रजाम्यहमप्यतः ॥१३२॥**

**अन्वय :-** मम भ्राता प्रव्रजितः भर्ता प्रव्रजितः अथ मे पुत्रः अपि प्रव्रजिष्यति ततः अहम् अपि प्रव्रजामि ।

**न मे भ्राता न मे भर्ता, न मे पुत्रोऽपि सम्प्रति ।**
**तन्ममापि परिव्रज्या, श्रेयसी गृहवासतः ॥१३३॥**

**अन्वय :-** मे भ्राता न मे भर्ता न सम्प्रति मे पुत्रः अपि न तत् मम अपि गृहवासतः परिव्रज्या श्रेयसी ।

**समास :-** (१) गृहवासतः – गृहे वासः इति गृहवासः, तस्मात् गृहवासतः । (स.त.पु.)

**स्वयमेवेति निर्णीय, सुनन्दा सदनं ययौ ।**
**वज्रमादाय वसतीम्, प्रययुर्मुनयोऽपि ते ॥१३४॥**

**अन्वय :-** इति स्वयम् एव निर्णीय सुनन्दा सदनं ययौ ते मुनयः अपि वज्रम् आदाय वसतीं प्रययुः ।

**व्रतेच्छुर्न पपौ स्तन्यम्, वज्रस्तावद्वया अपि ।**
**इत्याचार्यैः परिव्राज्य, साध्वीनां पुनरार्प्यत ॥१३५॥**

**अन्वय :-** व्रतेच्छुः तावद्वयाः अपि वज्रः स्तन्यं न पपौ इति आचार्यैः परिव्राज्य पुनः सः साध्वीनाम् आर्प्यत ।

**समास :-** (१) व्रतेच्छुः - व्रतम् इच्छति इति व्रतेच्छुः (उप.त.पु.)

(२) तावद्वयाः - (A) तत्प्रमाणं यस्य इति तावत् । (तद्धित)

(B) तावद् वयः यस्य सः इति तावद्वयाः । (समा.ब.व्री.)

**उद्यद्भाग्यविशेषेण, भववैराग्यभूद् भृशम् ।**
**सुनन्दोऽपि प्रवव्राज, तद्गच्छाचार्यसन्निधौ ॥१३६॥**

**अन्वय :-** सुनन्दा अपि उद्यद्भाग्यविशेषेण भृशं भववैराग्यभूत् तद्गच्छाचार्यसन्निधौ प्रवव्राज ।

**समास :-** (१) उद्यद्भाग्यविशेषेण - (A) उद्यद् च तद् भाग्यं च इति उद्यद्भाग्यम् । (वि.पू.क.)

(B) विशिष्टम् उद्यद्भाग्यम् इति उद्यद्भाग्यविशेषः, तेन उद्यद्भाग्यविशेषेण । (मयू.व्यं.क.)

(२) भववैराग्यभूत्- (A) विगतो रागः यस्मात् सः इति विरागः । (प्रादि.ब.व्री.)

(B) विरागस्य भावः इति वैरागम् (तद्धित) ।

(C) भवस्य वैरागम् इति भववैरागम् । (ष.त.पु.)

(D) नास्ति भववैरागं यस्याः सा इति अभववैरागा । (नञ्.ब.व्री.)

(E) अभववैरागा भववैरागा अभूत् इति भववैराग्यभूत् । (गति.त.पु.)

(३) गच्छाचार्यसन्निधौ - (A) गच्छस्य आचार्यः इति गच्छाचार्यः । (ष.त.पु.)

(B) गच्छाचार्यस्य सन्निधिः इति गच्छाचार्यसन्निधिः, तस्मिन् गच्छाचार्यसन्निधौ । (ष.त.पु.)

**पठदार्यामुखा[1]च्छृण्वन्न[2]ङ्गा[9]न्येकादशा[7]पि[8] हि[10] ।**
**पदानुसारी[4] भगवान्[5], वज्रो[6]ऽधीयाय[11] धीनिधिः[3] ॥१३७॥**

**अन्वय :-** पठदार्यामुखात् शृण्वन् धीनिधिः पदानुसारी भगवान् वज्रः एकादश अपि अङ्गानि हि अधीयाय ।

**समास :-** (१) पठदार्यामुखात् - (A) पठन्त्यश्चामूः आर्याश्च इति पठदार्याः । (वि.पू.क.)

(B) पठदार्याणां मुखम् इति पठदार्यामुखम्, तस्मात् पठदार्यामुखात् । (ष.त.पु)

(२) पदानुसारी - पदम् अनुसरतीत्येवंशीलः इति पदानुसारी । (उप.त.पु.)

(३) धीनिधिः-धियः निधिः इति धीनिधिः । (ष.त.पु.)

**अष्टवर्षो[4]ऽभवद्[5] वज्रो[3], यावदा[1]र्याप्रतिश्रये[2] ।**
**ततो[6] वसत्यामा[9]निन्ये[10], हर्षभाग्भि[7]र्महर्षिभिः[8] ॥१३८॥**

**अन्वय :-** यावद् आर्याप्रतिश्रये वज्रः अष्टवर्षः अभवत् ततः हर्षभाग्भिः महर्षिभिः वसत्याम् आनिन्ये ।

**समास :-** (१) अष्टवर्षः - अष्टौ वर्षाणि यस्य सः इति अष्टवर्षः । (संख्या.ब.व्री.)

(२) आर्याप्रतिश्रये - आर्यायाः प्रतिश्रयः इति आर्याप्रतिश्रयः, तस्मिन् आर्याप्रतिश्रये । (ष.त.पु.)

(३) हर्षभाग्भिः - हर्षं भजन्ते इति हर्षभाजः, तैः हर्षभाग्भिः । (उप.त.पु.)

(४) महर्षिभिः - पूर्ववत् ।

**अन्यदा[१] वज्रगुरवः[२], प्रत्[४]यवन्तीं[३] प्रतस्थिरे[५] ।**
**धाराधरो[८]ऽखण्डधार[९]मन्तराले[६] ववर्ष[१०] च[७] ॥१३९॥**

**अन्वय :-** अन्यदा वज्रगुरवः अवन्तीं प्रति प्रतस्थिरे अन्तराले च धाराधरः अखण्डधारं ववर्ष ।

**समास :-** (१) वज्रगुरवः - (A) वज्रेण युक्ताः इति वज्रयुक्ताः । (तृ.त.पु.)

(B) वज्रयुक्ताः गुरवः इति वज्रगुरवः । (म.प.लो.क.)

(२) धाराधरः - धारां धरति इति धाराधरः । (उप.त.पु.)

(३) अखण्डधारम् - (A) नास्ति खण्डं यस्यां सा इति अखण्डा । (नञ्.ब.व्री.)

(B) अखण्डा धारा यस्मिन् यथा स्यात् तथा इति अखण्डधारम् तद् अखण्डधारम् । (समा.ब.व्री.)

**यक्षमण्डपिकाप्राये[४], स्थाने[५] क्वा[१]प्य[२]स्रवज्जले[३] ।**
**आचार्या[६] वज्रगुरव[७]स्ते तस्थु[९]ः सपरिच्छदा[८]ः ॥१४०॥**

**अन्वय :-** क्व अपि अस्रवज्जले यक्षमण्डपिकाप्राये स्थाने आचार्याः वज्रगुरवः सपरिच्छदाः तस्थुः ।

**समास :-** (१) यक्षमण्डपिकाप्राये - (A) यक्षस्य मण्डपिका इति यक्षमण्डपिका । (ष.त.पु.)

(B) यक्षमण्डपिकया प्रायः इति यक्षमण्डपिकाप्रायः, तस्मिन् यक्षमण्डपिकाप्राये । (तृ.त.पु.)

(२) अस्रवज्जले - (A) न स्रवत् इति अस्रवत् (नञ्.त.पु.)

(B) अस्रवत् जलं यस्मिन् तद् इति अस्रवज्जलम्, तस्मिन् अस्रवज्जले । (समा.ब.व्री.)

(३) वज्रगुरवः - पूर्ववत् ।

(४) सपरिच्छदाः - परिच्छदेन सह वर्तन्ते ये ते इति सपरिच्छदाः । (सह.ब.व्री.)

**प्राग्जन्मसुहृदो[२] वज्रस्या[५]मरा[४] जृम्भका[३]स्तदा[१] ।**
**सत्त्वं[६] परीक्षितुं[७] तत्र[८], वणिग्मूर्तीर्विचक्रिरे[१०] ॥१४१॥**

**अन्वय :-** तदा प्राग्जन्मसुहृदः जृम्भकाः अमराः वज्रस्य सत्त्वं परीक्षितुं तत्र वणिग्मूर्तीः विचक्रिरे ।

**समास :-** (१) प्राग्जन्मसुहृदः - (A) प्राग् चेदं जन्म च इति प्राग्जन्म । (वि.पू.क.)

(B) प्राग्जन्मनः सुहृदः इति प्राग्जन्मसुहृदः । (ष.त.पु.)

(२) वणिग्मूर्तीः - वणिजां मूर्तयः इति वणिग्मूर्तयः, ताः वणिग्मूर्तीः । (ष.त.पु.)

**उत्पर्याणितबद्धाश्ववृषभं[4] चरदौष्ट्रकम्[5] ।**
**मण्डलीकृतशकटम्[6], सन्निवेशितकेणिकम्[7] ॥१४२॥**

**जवनच्छन्नविक्रेयवस्तुगोणीपरम्परम्[8] ।**
**राद्धान्नोत्तीर्णपात्रीकम्[9], भुञ्जानजनसङ्कुलम्[10] ॥१४३॥**

**तृणप्रावरणच्छन्नसञ्चरत्कर्मकृज्जनम्[11] ।**
**आवासं[12] ते[2] दिविषदो[3], वणिग्रूपा[1] विचक्रिरे[13] ॥१४४॥**

**(त्रिभिर्विशेषकम्)**

**अन्वय :-** वणिग्रूपाः ते दिविषदः उत्पर्याणितबद्धाश्ववृषभं चरदौष्ट्रकं मण्डलीकृतशकटं सन्निवेशितकेणिकं जवनच्छन्नविक्रेयवस्तुगोणीपरम्परं राद्धान्नोत्तीर्णपात्रीकं भुञ्जानजनसङ्कुलं तृणप्रावरणच्छन्नसञ्चरत्कर्मकृज्जनम् आवासं विचक्रिरे ।

"केणिका - वस्त्रकृतगृहम्" तम्बु इति भाषायाम् । केणिका पटकुट्यपि ॥६८१॥ गुणलयनिकार्यां स्यात् । इत्यभिधाने । (६८२)

**समास :-** (१) उत्पर्याणितबद्धाश्ववृषभम् - (A) उन्नतं पर्याणम् इति उत्पर्याणम् । (प्रादि कर्म.)

(B) उत्पर्याणं कृताः इति उत्पर्याणिताः (नाम-धातु + क्त प्रत्यय)

(C) उत्पर्याणिताश्च ते बद्धाश्च इति उत्पर्याणित-बद्धाः (वि.उभ.क.)

(D) उत्पर्याणितबद्धाः अश्वाः वृषभाः यस्मिन् सः इति उत्पर्याणितबद्धाश्ववृषभः, तम् उत्पर्याणितबद्धाश्ववृषभम् । (समा०बहु.प.ब.व्री.)

(२) चरदौष्ट्रकम् - (A) उष्ट्राणां समूहः इति औष्ट्रकम् । (तद्धित) गोत्रोक्षवत्सोष्ट्र० ६।१।१२ अकञ् ।

(B) चरद् औष्ट्रकं यस्मिन् सः इति चरदौष्ट्रकः, तं चरदौष्ट्रकम् । (समा.ब.व्री.)

(३) मण्डलीकृतशकटम् - (A) न मण्डलानि इति अमण्डलानि । (नञ्.त.पु.)

(B) अमण्डलानि मण्डलानि कृतानि इति मण्डलीकृतानि । (गति.त.पु.)

(C) मण्डलीकृतानि शकटानि यस्मिन् सः इति *मण्डलीकृतशकटः*, तं मण्डलीकृतशकटम् । (समा.ब.व्री.)

(४) सन्निवेशितकेणिकम् - (A) सन्निवेशं कृताः इति सन्निवेशिताः । (नामधातु + क्त प्रत्ययः)

(B) सन्निवेशिताः केणिकाः यस्मिन् सः इति सन्निवेशितकेणिकः, तं सन्निवेशितकेणिकम् । (समा.ब.व्री.)

(५) जवनच्छन्नविक्रेयवस्तुगोणीपरम्परम्-

(A) जवनैः छन्ना इति जवनच्छन्ना । (तृ.त.पु.)

(B) विक्रेयाणि च तानि वस्तूनि च इति विक्रेयवस्तूनि । (वि.पू.क.)

(C) विक्रेयवस्तूनां गोण्यः इति विक्रेयवस्तुगोण्यः ।
(ष.त.पु.)

(D) विक्रेयवस्तुगोणीनां परम्परा इति विक्रेय-
वस्तुगोणीपरम्परा । (ष.त.पु.)

(E) जवनच्छन्ना विक्रेयवस्तुगोणीपरम्परा यस्मिन्
सः इति जवनच्छन्नविक्रेयवस्तुगोणीपरम्परः,
तं जवनच्छन्नविक्रेयवस्तुगोणीपरम्परम् ।
(समा.ब.व्री.)

(६) राद्धान्नोत्तीर्णपात्रीकम् - (A) राद्धानि च तानि
अन्नानि च इति राद्धान्नानि । (वि.पू.क.)

(B) उत्तीर्णाश्चामूः पात्र्यश्च इति उत्तीर्णपात्र्यः ।
(वि.पू.क.)

(C) राद्धान्नानाम् उत्तीर्णपात्र्यः यस्मिन् सः इति
राद्धान्नोतीर्णपात्रीकः, तं राद्धान्नोत्तीर्णपात्री-
कम् । (व्य.ब.व्री.)

(७) भुञ्जानजनसंकुलम् - (A) भुञ्जानाश्च ते जनाश्च इति
भुञ्जानजनाः । (वि.पू.क.)

(B) भुञ्जानजनानां संकुलं यस्मिन् सः इति
भुञ्जानजनसंकुलः, तं भुञ्जानजनसंकुलम् ।
(व्यधि.ब.व्री.)

(८) तृणप्रावरणच्छन्नसञ्चरत्कर्मकृज्जनम् - (A) तृणैः
निर्मितानि इति तृणनिर्मितानि । (तृ.त.पु.)

(B) तृणनिर्मितानि प्रावरणानि इति तृणप्रावरणानि । (म.प.लो.क.)

(C) तृणप्रावरणैः छन्नः इति तृणप्रावरणच्छन्नः । (तृ.त.पु.)

(D) कर्म कुर्वन्ति इति कर्मकृतः । (उप.त.पु.)
कर्मकृतश्चामी जनाश्च इति कर्मकृज्जनाः । (वि.पू.क.)

(F) सञ्चरन्तः कर्मकृज्जनाः यस्मिन् सः इति सञ्चरत्कर्मकृज्जनः । (समा.ब.व्री.)

(G) तृणप्रावरणच्छन्नश्चासौ सञ्चरत्कर्मकृज्जनश्च इति तृणप्रावरणच्छन्नसञ्चरत्कर्मकृज्जनः, तं तृण-प्रावरणच्छन्नसञ्चरत्कर्मकृज्जनम् । (वि.उभ.क.)

(९) दिविषदः- दिवि सीदन्ति इति दिविषदः । (उप.त.पु.)

(१०) वणिग्रूपा :- वणिजः रूपं येषां ते इति वणिग्रूपाः । (व्यधि.ब.व्री.)

**वारिदे[1] विरतप्राये[2], ताना[4]चार्या[5]न्दिवौकस[3]ः ।**
**न्यमन्त्रयन्त[8] भिक्षार्थम्[7], ह्रस्ववन्दनपूर्वकम्[6] ॥१४५॥**

**अन्वय :-** वारिदे विरतप्राये दिवौकसः तान् आचार्यान् ह्रस्ववन्दन-पूर्वकं भिक्षार्थं न्यमन्त्रयन्त ।

**समास :-** (१) वारिदे - वारि ददाति इति वारिदः, तस्मिन् वारिदे । (उप.त.पु.)

(२) विरतप्राये - विरतेन प्रायः इति विरतप्रायः, तस्मिन् विरतप्राये । (तृ.त.पु.)

(३) दिवौकस :- दिवा ओकः येषां ते इति दिवौकसः ।
(समा.ब.व्री.)

(४) भिक्षार्थम् – भिक्षायाः अर्थम् इति भिक्षार्थम् ।
(ष.त.पु.)

(५) ह्रस्ववन्दनपूर्वकम्- (A) ह्रस्वं च तद् वन्दनं च इति ह्रस्ववन्दनम् । (वि.पू.क.)
(B) ह्रस्ववन्दनेन पूर्वकम् इति ह्रस्ववन्दनपूर्वकम् ।
(तृ.त.पु.)

**निवृत्तामिव विज्ञाय, वृष्टिमाचार्यपुङ्गवाः ।**
**वज्रमादिदिशुर्भिक्षाऽऽनयने विनयोज्ज्वलम् ॥१४६॥**

**अन्वय :-** आचार्यपुङ्गवाः वृष्टिं निवृत्ताम् इव विज्ञाय विनयोज्ज्वलं वज्रं भिक्षाऽऽनयने आदिदिशुः ।

**समास :-** (१) आचार्यपुङ्गवाः – आचार्याश्चामी पुङ्गवाश्च इति आचार्यपुङ्गवाः । (वि.उत्त.क.)

(२) भिक्षाऽऽनयने – भिक्षायाः आनयनम् इति भिक्षाऽऽनयनम्, तस्मिन् भिक्षाऽऽनयने ।(ष.त.पु.)

(३) विनयोज्ज्वलम् – विनयेन उज्ज्वलः इति विनयोज्ज्वलः, तं विनयोज्ज्वलम् । (तृ.त.पु.)

**वज्रोऽथावश्यि( श्य )कीं कृत्वा, द्वितीयमुनिना सह ।**
**विहर्तुं निरगादीर्याशुद्धिमध्वनि चिन्तयन् ॥१४७॥**

**अन्वय :-** अथ वज्रः आवश्यि(श्य)कीं कृत्वा द्वितीयमुनिना सह अध्वनि ईर्याशुद्धिं चिन्तयन् विहर्तुं निरगाद् ।

**समास :-** (१) द्वितीयमुनिना – द्वितीयश्चासौ मुनिश्च इति द्वितीयमुनिः, तेन द्वितीयमुनिना । (वि.पू.क.)

(२) ईर्याशुद्धिम् - ईर्यायाः शुद्धिः इति ईर्याशुद्धिः, तां ईर्याशुद्धिम् । (ष.त.पु.)

**तुषारा[३]न्पततो[४] दृष्ट्वा[५], त्रसरेणुनिभा[१]नपि[२] ।**
**वज्रो[९] निववृते[११] च[८] द्राग्[१०]भीतो[७]ऽप्कायविराधनात्[६] ॥१४८॥**

**अन्वय :-** त्रसरेणुनिभान् अपि तुषारान् पततः दृष्ट्वा अप्कायविराधनात् भीतः च वज्रः द्राग् निववृते ।

**समास :-** (१) त्रसरेणुनिभान्–(A) त्रसानां रेणवः इति त्रसरेणवः । (ष.त.पु.)

(B) त्रसरेणुभिः निभाः इति त्रसरेणुनिभाः, तान् त्रसरेणुनिभान् । (तृ.त.पु.)

(२) अप्कायविराधनात्– (A) आपः काया यस्य सः इति अप्कायः । (समा.ब.व्री.)

(B) अप्कायस्य विराधनम् इति अप्कायविराधनम्, तस्मात् अप्कायविराधनात् । (ष.त.पु.)

**तुषारमात्रा[१]मप्य[२]म्बुवृष्टिं[४] देवा[१०] निरुध्य[५] ताम्[३] ।**
**आह्वासत[१३] पुनर्[११]वज्रम्[१२], वृष्टि[६]र्नास्ती[७]ति भाषिण[९]ः ॥१४९॥**

**अन्वय :-** तुषारमात्राम् अपि ताम् अम्बुवृष्टिं निरुध्य वृष्टिः न अस्ति इति भाषिणः देवाः पुनः वज्रम् आह्वासत ।

**समास :-** (१) तुषारमात्राम् – तुषारस्य मात्रा यस्याः सा इति तुषारमात्रा, तां तुषारमात्राम् । (व्यधि.ब.व्री.)

(२) अम्बुवृष्टिम् – अम्बुनः वृष्टिः इति अम्बुवृष्टिः, ताम् अम्बुवृष्टिम् । (ष.त.पु.)

**वज्रस्[४]तदुपरोधेन[२], वृष्ट्यभावेन[१] चा[३]चलत्[५] ।**
**जगाम[९] च[७] तदावासम्[८], भक्तपानादिसुन्दरम्[६] ॥१५०॥**

**अन्वय :-** वृष्ट्यभावेन तदुपरोधेन च वज्रः अचलत् भक्तपानादि-सुन्दरं च तदावासं जगाम ।

**समास :-** (१) तदुपरोधेन – तेषाम् उपरोधः इति तदुपरोधः, तेन तदुपरोधेन । (ष.त.पु.)

(२) वृष्ट्यभावेन – वृष्टेः अभावः इति वृष्ट्यभावः, तेन वृष्ट्यभावेन । (ष.त.पु.)

(३) तदावासम् – तेषाम् आवासः इति तदावासः, तं तदावासम् । (ष.त.पु.)

(४) भक्तपानादिसुन्दरम् – (A) भक्तं च पानं च इति भक्तपाने । (इ.द्व.)

(B) भक्तपाने आदौ येषां ते इति भक्तपानादयः । (व्यधि.ब.व्री.)

(C) भक्तपानादिभिः सुन्दरः इति भक्तपानादिसुन्दरः, तं भक्तपानादिसुन्दरम् । (तृ.त.पु.)

**ससम्भ्रमेषु[२] देवेषु[४], तेषु[३] भक्तादिदित्सया[१] ।**
**द्रव्यक्षेत्रकालभावै[६]रुपयोग[७]मदत्त[८] सः[५] ॥१५१॥**

**अन्वय :-** भक्तादिदित्सया ससम्भ्रमेषु तेषु देवेषु सः द्रव्यक्षेत्र-कालभावैः उपयोगम् अदत्त ।

**समास :-** (१) ससम्भ्रमेषु – सम्भ्रमेण सह वर्तन्ते ये ते इति ससम्भ्रमाः, तेषु ससम्भ्रमेषु । (सह.ब.व्री.)

(२) भक्तादिदित्सया – (A) भक्तम् आदौ येषां तानि इति भक्तादीनि । (व्यधि.ब.व्री.)

(B) *दातुम् इच्छा इति दित्सा (इच्छार्थक सन् + अ प्रत्ययः)*

(C) भक्तादीनां दित्सा इति भक्तादिदित्सा, तया भक्तादिदित्सया । (ष.त.पु.)

(३) द्रव्यक्षेत्रकालभावैः – द्रव्यं च क्षेत्रं च कालश्च भावश्च इति द्रव्यक्षेत्रकालभावाः, तैः द्रव्यक्षेत्रकालभावैः । (इ.द्व.)

**कूष्माण्डकादिकं[3] द्रव्यम्[4], कुतो[5] राद्ध[2]मसम्भवि[1] ।**
**इदम्[6]उज्जयिनीक्षेत्रम्[7], स्वभावा[8]दपि[9] कर्कशम्[10] ॥१५२॥**
**प्रावृषि[13] प्रथमायां[11] च[12], द्रव्यस्य[15]अस्य[14] कथा[16]पि[17] का[18] ।**
**दातारो[19]ऽपि[20]अनिमेषाक्षा[21], अभूस्पृक्चरणा[22] इति[23] ॥१५३॥**
**नियतं[24] देवपिण्डो[26]ऽयम्[25], साधूनां[27] न[29] हि[28] कल्पते[30] ।**
**तस्माद[31]नात्तपिण्डो[32]ऽपि[33], व्रजामि[35] गुरु सन्निधौ[34] ॥१५४॥**

**( त्रिभिर्विशेषकम् )**

**अन्वय :-** असम्भवि राद्धं कूष्माण्डकादिकं द्रव्यं कुतः ? इदम् उज्जयिनीक्षेत्रं स्वभावात् अपि कर्कशम्, प्रथमायां च प्रावृषि अस्य द्रव्यस्य कथा अपि का ? दातारः अपि अनिमेषाक्षाः अभूस्पृक्चरणाः इति नियतम् अयं

देवपिण्डः, साधूनां हि न कल्पते तस्मात् अनात्तपिण्डः अपि गुरुसन्निधौ व्रजामि ।

**समास :-** (१) कूष्माण्डकादिकम् – कूष्माण्डकाः आदौ यस्मिन् तद् कूष्माण्डकादिकम् । (व्य.ब.व्री.)

(२) असम्भवि–न सम्भवि इति असम्भवि । (नञ्.त.पु.)

(३) उज्जयिनीक्षेत्रम् – (A) उज्जयिनी नाम यस्य तद् इति उज्जयिनीनाम, (समा.ब.व्री.)

(B) उज्जयिनीनाम क्षेत्रम् इति उज्जयिनीक्षेत्रम् । (म.प.लो.क.)

(४) अनिमेषाक्षाः – (A) नास्ति निमेषः ययोस्ते इति अनिमेषे । (नञ्.ब.व्री.)

(B) अनिमेषे अक्षिणी येषां ते इति अनिमेषाक्षाः । (समा.ब.व्री.)

(५) अभूस्पृक्चरणाः – (A) भुवं स्पृशतः इति भूस्पृशौ । (उप.त.पु.)

(B) भूस्पृशौ चरणौ इति भूस्पृक्चरणौ । (वि.पू.क.)

(C) न स्तः भूस्पृक्चरणौ येषां ते अभूस्पृक्चरणाः । (नञ्.ब.व्री.)

(६) देवपिण्डः–देवस्य पिण्डः इति देवपिण्डः । (ष.त.पु.)

(७) अनात्तपिण्डः–(A) न आत्तः इति अनात्तः । (नञ्त.पु.)

(B) अनात्तः पिण्डः येन सः इति अनात्तपिण्डः । (समा.ब.व्री.)

(८) गुरुसन्निधौ – गुरोः सन्निधिः इति गुरुसन्निधिः, तस्मिन् गुरुसन्निधौ । (ष.त.पु.)

**इत्यनादाय तद्भिक्षाम्, वज्रस्वामी न्यवर्तत ।**
**प्रत्यक्षीभूय तैश्चाथो, जगदे विस्मितैः सुरैः ॥१५५॥**

**अन्वय :-** इति तद्भिक्षाम् अनादाय वज्रस्वामी न्यवर्तत अथ च विस्मितैः तैः सुरैः प्रत्यक्षीभूय जगदे ।

**समास :-** (१) अनादाय – न आदाय इति अनादाय । (नञ्.त.पु.)
(२) तद्भिक्षाम् – तेषां भिक्षा इति तद्भिक्षा, तां तद्भिक्षाम् । (ष.त.पु.)
(३) वज्रस्वामी – पूर्ववत् ।
(४) प्रत्यक्षीभूय – (A) न प्रत्यक्षम् इति अप्रत्यक्षम् । (नञ्.त.पु.) (B) अप्रत्यक्षं प्रत्यक्षं भूत्वा इति प्रत्यक्षीभूय । (गति.त.पु.)

**वयं हि जृम्भका देवाः, प्राग्जन्मसुहृदस्तव ।**
**त्वां द्रष्टुमागमामेह, त्वमद्यापि हि नः सुहृत् ॥१५६॥**

**अन्वय :-** हि वयं तव प्राग्जन्मसुहृदः जृम्भकाः देवाः त्वां द्रष्टुम् इह आगमाम हि अद्यापि त्वं नः सुहृत् (असि) ।

**समास :-** (१) प्राग्जन्मसुहृदः – पूर्ववत् ।

**अथ वैक्रियलब्ध्याख्याम्, विद्यां तोषभृतोऽमराः ।**
**निष्क्रयं क्लृप्तमायाया, इव वज्राय ते ददुः ॥१५७॥**

**अन्वय :-** अथ तोषभृतः ते अमराः क्लृप्तमायायाः निष्क्रयम् इव वैक्रियलब्ध्याख्यां विद्यां वज्राय ददुः ।

निष्क्रयम्–प्रत्युपकारम् । "बदलो" इति भाषायाम् ।

**समास :-** (१) वैक्रियलब्ध्याख्याम् – **(A)** वैक्रियं (शरीरं) करोति इति वैक्रियकृत् । (उप.त.पु.)

(B) वैक्रियकृत् लब्धिः इति वैक्रियलब्धिः । (म.प.लो.क.)

(C) वैक्रियलब्धिः आख्या यस्याः सा इति वैक्रियलब्ध्याख्या, तां वैक्रियलब्ध्याख्याम् । (समा.ब.व्री.)

(२) तोषभृतः – तोषं बिभ्रति इति तोषभृतः । (उप.त.पु.)

(३) क्लृप्तमायायाः – क्लृप्ता चासौ माया च इति क्लृप्तमाया, तस्याः क्लृप्तमायायाः । (वि.पू.क.)

**ज्येष्ठे[3] मा[4]स्यन्यदा[1] वज्रो[7], विहरं[6]श्च[2] बहिर्भुवि[5] ।**
**नैगमीभूय[10] तै[8]र्देवै[9]र्घृतपूरै[11]र्न्यमन्त्रयत[12] ॥१५८॥**

**अन्वय :-** अन्यदा च ज्येष्ठे मासि बहिर्भुवि विहरन् वज्रः तैः देवैः नैगमीभूय घृतपूरैः न्यमन्त्रयत ।

**समास :-** (१) बहिर्भुवि – भुवः बहिः इति बहिर्भूः, तस्यां बहिर्भुवि । (ष.त.पु.)

(२) नैगमीभूय – **(A)** न नैगमाः इति अनैगमाः । (नञ्.त.पु.)

(B) अनैगमाः नैगमाः भूत्वा इति नैगमीभूय । (गति.त.पु.)

**वज्रो[4] गत्वा[6] तदावासे[5], देवपिण्ड[8] च[9] पूर्ववत्[7] ।**
**ज्ञात्वा[10] न[12] खलु[1] जग्राहो[13]पयोगविदुरो[2] हि[11] सः[3] ॥१५९॥**

**अन्वय :-** खलु उपयोगविदुरः सः वज्रः तदावासे गत्वा पूर्ववत् च देवपिण्डं ज्ञात्वा हि न जग्राह ।

**समास :-** (१) तदावासे - पूर्ववत् ।

(२) देवपिण्डम् - पूर्ववत् ।

(३) पूर्ववत् - पूर्वम् इव इति पूर्ववत् । (तद्धित)

(४) उपयोगविदुरः - उपयोगे विदुरः इति उपयोगविदुरः । (स.त.पु.)

**वज्राय पूर्वसुहृदे, विद्यामाकाशगामिनीम् ।**
**प्रददुस्तोषभाजस्ते, स्वं स्वं स्थानमथो ययुः ॥१६०॥**

**अन्वय :-** अथो तोषभाजः ते पूर्वसुहृदे वज्राय आकाशगामिनीं विद्यां प्रददुः स्वं स्वं स्थानं ययुः ।

**समास :-** (१) पूर्वसुहृदे - पूर्वस्य (जन्मनः) सुहृद् इति पूर्वसुहृद्, तस्मै पूर्वसुहृदे । (ष.त.पु.)

(२) आकाशगामिनीम् - आकाशे गमयति इत्येवंशीला इति आकाशगामिनी, ताम् आकाशगामिनीम् । (उप.त.पु.)

(३) तोषभाजः - तोषं भजन्ते इति तोषभाजः । (उप.त.पु.) भजो विण् ५।१।१४६ विण् प्रत्ययः ।

**ततो विहरतो गच्छमध्ये वज्रस्य चाभवत् ।**
**पदानुसारिलब्ध्यात्ता, सुस्थिरैकादशाङ्ग्यपि ॥१६१॥**

**अन्वय :-** ततः च गच्छमध्ये विहरतः वज्रस्य पदानुसारिलब्ध्या आत्ता एकादशाङ्गी अपि सुस्थिरा अभवत् ।

**समास :-** (१) गच्छमध्ये - गच्छस्य मध्यम् इति गच्छमध्यम्, तस्मिन् गच्छमध्ये । (ष.त.पु.)

(२) पदानुसारिलब्ध्या - पूर्ववत् ।

(३) सुस्थिरा - शोभना स्थिरा इति सुस्थिरा । (सु.पू.क.)

(४) एकादशाङ्गी - पूर्ववत् ।

**अधीयमानमश्रौषीद्यद्यत्पूर्वगताद्यपि ।**
**तत्तज्जग्राह भगवान्, वज्रो मेधाविनां वरः ॥१६२॥**

**अन्वय :-** मेधाविनां वरः भगवान् वज्रः यद् यद् अधीयमानम् अपि पूर्वगतादि अश्रौषीद् तद् तद् जग्राह ।

**समास :-** (१) पूर्वगतादि - (A) पूर्वेषु गतम् इति पूर्वगतम् । (स.त.पु.)

(B) पूर्वगतम् आदौ यस्मिन् तद् इति पूर्वगतादि, तद् पूर्वगतादि । (व्यधि.ब.व्री.)

(२) मेधाविनाम् - मेधा अस्ति येषाम् इति मेधाविनः, तेषां मेधाविनाम् । (तद्धित) ।

**यदा पठेति स्थविरा, वज्रं स्माहुस्तदा हि सः ।**
**किंचिद् गुणगुणारवम्, निद्रालुरिव निर्ममे ॥१६३॥**

**अन्वय :-** यदा स्थविराः पठ इति वज्रम् आहुः स्म तदा हि सः निद्रालुः इव किंचिद् गुणगुणारवं निर्ममे ।

**समास :-** (१) गुणगुणारवम् - गुणगुणः आरवः इति गुणगुणारवः, तं गुणगुणारवम् । (वि.पू.क.)

**स्थविराज्ञाभङ्गभीरुः, स्वशक्तिं चाप्रकाशयन् ।**
**अव्यक्तमुद्गृणन्किंचित्, सोऽश्रौषीत्पठतोऽपरान् ॥१६४॥**

**अन्वय :-** स्थविराज्ञाभङ्गभीरुः स्वशक्तिं च अप्रकाशयन् किंचित् अव्यक्तम् उद्गृणन् सः पठतः अपरान् अश्रौषीद् ।

**समास :-** (१) स्थविराज्ञाभङ्गभीरुः - (A) स्थविराणाम् आज्ञा इति स्थविराज्ञा । (ष.त.पु.)
(B) स्थविराज्ञायाः भङ्गः इति स्थविराज्ञाभङ्गः । (ष.त.पु.)
(C) स्थविराज्ञाभङ्गाद् भीरुः इति स्थविराज्ञाभङ्ग-भीरुः । (पं.त.पु.)
(२) स्वशक्तिम् - स्वस्य शक्तिः इति स्वशक्तिः, तां स्वशक्तिम् । (ष.त.पु.)
(३) अप्रकाशयन् - न प्रकाशयन् इति अप्रकाशयन् । (नञ्.त.पु.)
(४) अव्यक्तम् - न व्यक्तम् इति अव्यक्तम्, तद् अव्यक्तम्। (नञ्.त.पु.)

**अन्यस्मिन्नह्नि मध्याह्ने, भिक्षार्थं साधवो ययुः ।**
**आचार्यमिश्रा अपि ते, बहिर्भूमौ विनिर्ययुः ॥१६५॥**

**अन्वय :-** अन्यस्मिन् अह्नि मध्याह्ने साधवः भिक्षार्थं ययुः ते आचार्यमिश्राः अपि बहिर्भूमौ विनिर्ययुः ।
मिश्रः-गौरववाची ।

**समास :-** (१) मध्याह्ने - अह्नः मध्यम् इति मध्याह्नः, तस्मिन् मध्याह्ने । (ष.त.पु.)

(२) भिक्षार्थम् - पूर्ववत् ।

(३) आचार्यमिश्राः - आचार्याश्चामी मिश्राश्च इति आचार्यमिश्राः । (विशे.उत्त.क.)

(४) बहिर्भूमौ - भूमेः बहिः इति बहिर्भूमिः, तस्यां बहिर्भूमौ । (पं.त.पु.)

**तस्थौ[६] तु[२] वज्र[१] एकाकी[५], पश्चाद्[७]वसतिरक्षकः[३] ।**
**स[८] साधूनां[९] मण्डलेन[११], वेष्टिकाः[१०] [४]सन्न्यवीविशत्[१४] ॥१६६॥**

**अन्वय :-** वज्रः तु वसतिरक्षकः एकाकी तस्थौ पश्चाद् सः साधूनां वेष्टिकाः मण्डलेन सन् न्यवीविशत् ।

**समास :-** (१) वसतिरक्षकः - वसतिं रक्षतीति वसतिरक्षकः । (उप.त.पु.)

(२) एकाकी - एक एव इति एकाकी । (तद्धित) एकादाकिन० ७।३।२७ इति आकिन् ।

**आचार्य[१] इव[३] शिष्याणाम्[२], तासां[६] मध्ये[७] निषद्य[८] सः[५] ।**
**वाचनां[९] दातुम्[१०]आरेभे[११], प्रावृडम्भोधरध्वनिः[४] ॥१६७॥**

**अन्वय :-** आचार्यः शिष्याणाम् इव प्रावृडम्भोधरध्वनिः सः तासां मध्ये निषद्य वाचनां दातुम् आरेभे ।

**समास :-** (१) प्रावृडम्भोधरध्वनिः - (A) अम्भः धरति इति अम्भोधरः । (उप.त.पु.)

(B) प्रावृषः अम्भोधरः इति प्रावृडम्भोधरः । (ष.त.पु.)

(C) प्रावृडम्भोधरस्य ध्वनिः इव ध्वनिः यस्य सः
इति प्रावृडम्भोधरध्वनिः । (उप.ब.व्री.)

**एकादशानामङ्गानामपि पूर्वगतस्य च ।**
**वाचनां पुनरागच्छन्, गुरुः शुश्राव दूरतः ॥१६८॥**

**अन्वय :-** पुनः आगच्छन् गुरुः दूरतः एकादशानाम् अङ्गानां पूर्वगतस्य अपि च वाचनां शुश्राव ।

**समास :-** (१) पूर्वगतस्य - पूर्ववत् ।

**वसतिद्वारमायातः, श्रुत्वा गहगहारवम् ।**
**आचार्योऽचिन्तयत्किं नु, साधवः शीघ्रमागताः ॥१६९॥**

**अन्वय :-** वसतिद्वारम् आयातः आचार्यः गहगहारवं श्रुत्वा अचिन्तयत् किं नु साधवः शीघ्रम् आगताः ?

**समास :-** (१) वसतिद्वारम् - वसतेः द्वारम् इति वसतिद्वारम् तद् वसतिद्वारम् । (ष.त.पु.)

(२) गहगहारवम् - गह गह आरवः इति गहगहारवः, तं गहगहारवम् । (वि.पू.क.)

**अस्मदागमनममी, पालयन्तो महर्षयः ।**
**स्वाध्यायं कुर्वते भिक्षामुपादाय समागताः ॥१७०॥**

**अन्वय :-** अस्मदागमनं पालयन्तः भिक्षाम् उपादाय समागताः अमी महर्षयः स्वाध्यायं कुर्वते ।

**समास :-** (१) अस्मदागमनम् - अस्माकम् आगमनम् इति अस्मदागमनम्, तद् अस्मदागमनम् । (ष.त.पु.)

(२) महर्षयः - पूर्ववत् ।

(३) स्वाध्यायम् - पूर्ववत् ।

**आचार्याश्च विदाञ्चक्रुः, क्षणं स्थित्वा विमृश्य च ।**
**यथैष वज्रबालर्षेर्वाचनां ददतो ध्वनिः ॥१७१॥**

**अन्वय :-** आचार्याः च क्षणं स्थित्वा विमृश्य च वाचनां ददतः वज्रबालर्षेः यथा एष ध्वनिः (इति) विदाञ्चक्रुः ।

**समास :-** (१) वज्रबालर्षेः - (A) वज्रः नाम यस्य सः वज्रनामा । (समा.ब.व्री.)

(B) बालश्चासौ ऋषिश्च इति बालर्षिः । (वि.पू.क.)

(C) वज्रनामा चासौ बालर्षिश्च इति वज्रबालर्षिः, तस्य वज्रबालर्षेः । (म.प.लो.क.)

**असौ पूर्वगतस्यैकादशाङ्ग्या अपि वाचनाम् ।**
**यद्दत्ते तत्किमध्यैष्ट, गर्भस्थो विस्मयामहे ॥१७२॥**

**अन्वय :-** असौ पूर्वगतस्य एकादशाङ्ग्याः अपि वाचनां यद् दत्ते तत् गर्भस्थः किम् अध्यैष्ट (इति) विस्मयामहे ।

**समास :-** (१) पूर्वगतस्य - पूर्ववत् ।

(२) एकादशाङ्ग्याः - एकादशाङ्गी - पूर्ववत्, तस्याः *एकादशाङ्ग्याः ।*

(३) गर्भस्थः - गर्भे तिष्ठति इति गर्भस्थः । (उप.त.पु.)

**स्थविरैः पाठ्यमानोऽयमत एवालसायते ।**
**बाल्यात्पाठालस इति, ज्ञात्वाशिष्मं तदा वयम् ॥१७३॥**

**अन्वय :-** अत एव स्थविरैः पाठ्यमानः अयम् अलसायते तदा *बाल्यात् पाठालसः इति ज्ञात्वा वयम् अशिष्म ।*

**समास** :- (१) अलसायते – अलसः इव आचरति इति अलसायते ।
(नामधातु)

(२) पाठालसः – पाठे अलसः इति पाठालसः । (स.त.पु.)

**अस्मदाकर्णनाशङ्की, लज्जितो मा स्म भूदसौ ।**
**रोमाञ्चिताः शिष्यगुणैराचार्या इत्यपासरन् ॥१७४॥**

**अन्वय** :- अस्मदाकर्णनाशङ्की असौ लज्जितः मा भूत् स्म इति शिष्यगुणैः रोमाञ्चिताः आचार्याः अपासरन् ।

**समास** :- (१) अस्मदाकर्णनाशङ्की– (A) अस्माकम् आकर्णनम् इति अस्मदाकर्णनम् । (ष.त.पु.)

(B) अस्मदाकर्णनम् आशङ्कते इति अस्मदाकर्ण-नाशङ्की । (उप.त.पु.)

(२) शिष्यगुणैः – शिष्यस्य गुणाः इति शिष्यगुणाः, तैः शिष्यगुणैः । (ष.त.पु.)

**शब्देन महताचार्याश्चक्रुर्नैषेधिकीमथ ।**
**गुरूणां शब्दमाकर्ण्योदस्थाद्वज्रोऽपि विष्टरात् ॥१७५॥**

**अन्वय** :- अथ आचार्याः महता शब्देन नैषेधिकीं चक्रुः गुरूणां शब्दम् आकर्ण्य वज्रः अपि विष्टरात् उदस्थाद् ।

**उपेत्य जिह्मितगतिर्न यावत्प्राविशद् गुरुः ।**
**तावत्ता वेष्टिकाः स्वस्वस्थाने वज्रो मुमोच च ॥१७६॥**

**अन्वय** :- उपेत्य च जिह्मितगतिः गुरुः यावत् न प्राविशद् तावत् वज्रः ताः वेष्टिकाः स्वस्वस्थाने मुमोच ।

**समास :-** (१) जिह्मितगतिः – जिह्मिता गतिः यस्य सः इति जिह्मितगतिः । (समा.ब.व्री.)

(२) स्वस्वस्थाने – (A) स्वस्वम् पूर्ववत् ।

(B) स्वस्वस्य स्थानम् इति स्वस्वस्थानम्, तस्मिन् स्वस्वस्थाने । (ष.त.पु.)

**अभ्येत्य[१] च[२] गुरोर्[३]दण्ड[४]माददे[५]ऽह्रिं[११] ममार्ज[१३] च[१२] ।**
**तद्[८]रजो वन्दने[७]नोच्चैः[६], स्वभालम[९]वगुण्डयन्[१०] ॥१७७॥**

**अन्वय :-** अभ्येत्य च गुरोः दण्डम् आददे उच्चैः वन्दनेन तद्रजः स्वभालम् अवगुण्डयन् अंह्रिं च ममार्ज ।

**समास :-** (१) स्वभालम् – स्वस्य भालम् इति स्वभालम्, तद् स्वभालम् । (ष.त.पु.)

(२) तद्रजः – तस्य रजः इति तद्रजः तद् तद्रजः । (ष.त. पु.)

**आसनस्थस्य[१] च[२] गुरोः[३], पादौ[४] प्रासुकवारिणा[५] ।**
**क्षालयामास[६] शिरसा[९], ववन्दे[१०] पादवारि[७] च[८] ॥१७८॥**

**अन्वय :-** आसनस्थस्य च गुरोः पादौ प्रासुकवारिणा क्षालयामास पादवारि च शिरसा ववन्दे ।

**समास :-** (१) आसनस्थस्य – आसने तिष्ठतीति आसनस्थः, तस्य आसनस्थस्य । (उप.त.पु.)

(२) प्रासुकवारिणा – (A) प्रासुकम् – पूर्ववत् ।

(B) प्रासुकं च तद् वारि च इति प्रासुकवारि, तेन प्रासुकवारिणा । (वि.पू.क.)

*(३) पादवारि –पादयोः वारि इति पादवारि तद् पादवारि ।* (ष.त.पु.)

**आचार्याश्चिन्तयामासुर्महात्मा बालकोऽप्यसौ ।**
**श्रुतसागरपारीणो, रक्ष्योऽवज्ञास्पदीभवन् ॥१७९॥**

**अन्वय :-** आचार्याः चिन्तयामासुः श्रुतसागरपारीणः असौ बालकः अपि महात्मा अवज्ञास्पदीभवन् रक्ष्यः ।

**समास :-** (१) महात्मा – पूर्ववत् ।

(२) श्रुतसागरपारीणः – (A) श्रुतमेव सागरः इति श्रुतसागरः । (अव.पू.क.)

(B) पारं गच्छति इति पारीणः । (तद्धित)

(C) श्रुतसागरस्य पारीणः इति श्रुतसागरपारीणः । (ष.त.पु.)

(३) अवज्ञास्पदीभवन् – (A) अवज्ञायाः आस्पदम् इति अवज्ञास्पदम् । (ष.त.पु.)

(B) न अवज्ञास्पदम् इति अनवज्ञास्पदम् । (नञ्.त.पु.)

(C) अनवज्ञास्पदम् अवज्ञास्पदं भवन् इति अवज्ञास्पदीभवन् । (गति.त.पु.)

**अजानन्तोऽस्य माहात्म्यम्, बालस्याप्यन्यसाधवः ।**
**कुर्वन्ति न यथावज्ञाम् प्रयतिष्यामहे तथा ॥१८०॥**

**अन्वय :-** अस्य बालस्य माहात्म्यम् अजानन्तः अपि अन्यसाधवः यथा अवज्ञां न कुर्वन्ति तथा प्रयतिष्यामहे ।

**समास :-** (१) अजानन्तः – न जानन्तः इति अजानन्तः । (नञ्.त.पु.)

(२) माहात्म्यम् – महात्मा–पूर्ववत्, महात्मनः भावः इति माहात्म्यम्, तद् माहात्म्यम् । (तद्धित)

(३) अन्यसाधवः – अन्ये च ते साधवश्च इति अन्यसाधवः । (वि.पू.क.)

**इत्याचार्या विभावर्याम्, शिष्येभ्योऽकथयन्निति ।**
**यास्यामो ग्रामममुकम्, द्वित्राहं तत्र नः स्थितिः ॥१८१॥**

**अन्वय :-** इति अमुकं ग्रामं यास्यामः तत्र नः द्वित्राहं स्थितिः इति आचार्याः विभावर्यां शिष्येभ्यः अकथयन् ।

**समास :-** (१) द्वित्राहम् – (A) द्वे वा त्रीणि वा इति द्वित्राणि । (संख्या.ब.व्री.)

(B) द्वित्राणाम् अह्नां समाहारः इति द्वित्राहम्, तद् द्वित्राहम् । (द्विगु.क.)

**व्यजिज्ञपन् गुरुं योगप्रतिपन्नाश्च साधवः ।**
**भगवन्! वाचनाचार्यस्तत्कोऽस्माकं भविष्यति ?॥१८२॥**

**अन्वय :-** योगप्रतिपन्नाः च साधवः गुरुं व्यजिज्ञपन् भगवन् ! तत् अस्माकं वाचनाचार्यः कः भविष्यति ?

**समास :-** (१) योगप्रतिपन्नाः–योगं प्रतिपन्नाः इति योगप्रतिपन्नाः । (द्वि.त.पु.)

(२) वाचनाचार्यः- (A) वाचनां दत्ते इति वाचनादायकः । (उप.त.पु.)

(B) वाचनादायकः आचार्यः इति वाचनाचार्यः । (म.प.लो.क.)

**व्रजो[3] वो[1] वाचनाचार्यो[2], भविते[4]त्यादि[5]शद्[7] गुरु[6]: ।**
**भक्तत्वाद[8]विचार्यैव[9,10] प्रत्यपद्यन्त[13] ते[11] तथा[12] ।।१८३।।**

**अन्वय :-** वः वाचनाचार्यः वज्रः भविता इति गुरुः आदिशद् भक्तत्वाद् अविचार्य एव ते तथा प्रत्यपद्यन्त ।

**समास :-** (१) वाचनाचार्यः – पूर्ववत् ।
(२) अविचार्य – न विचार्य इति अविचार्य ।
(नञ्.त.पु.)

**प्रातःकृत्यं[4] कायोत्सर्गवाचनाग्रहणादिकम्[3] ।**
**कर्तुं[5] ते[1] साधवो[2] वज्रम्[7], निषद्यायां[6] न्यषादयन्[8] ।।१८४।।**

**अन्वय :-** ते साधवः कायोत्सर्गवाचनाग्रहणादिकम् प्रातःकृत्यं कर्तुं निषद्यायां वज्रं न्यषादयन् ।

**समास :-** (१) कायोत्सर्गवाचनाग्रहणादिकम् – (A) कायः उत्सृज्यतेऽस्मिन् इति कायोत्सर्गः । (उप.त.पु.)
(B) वाचनायाः ग्रहणम् इति वाचनाग्रहणम् । (ष.त.पु.)
(C) कायोत्सर्गश्च वाचनाग्रहणं च इति कायोत्सर्ग-वाचनाग्रहणे । (इ.द्वन्द्व.)
(D) कायोत्सर्गवाचनाग्रहणे आदौ यस्मिन् तद् इति कायोत्सर्गवाचनाग्रहणादिकम्, तद् कायोत्सर्ग-वाचनाग्रहणादिकम् । (व्यधि.ब.व्री.)

**गुर्वाज्ञा[1]ऽस्ती[2]ति[3] वज्रो[4]ऽपि[5], निषद्याया[6]मुपाविशत्[7] ।**
**आचार्यस्य[10]एव[11] विनयम्[13], तस्यां[12]कार्षुश्च[8,9] साधवः ।।१८५।।**

**अन्वय :-** गुर्वाज्ञा अस्ति इति वज्रः अपि निषद्यायाम् उपाविशत्
साधवः च आचार्यस्य इव तस्य विनयम् अकार्षुः ।

**समास :-** (१) गुर्वाज्ञा – गुरोः आज्ञा इति गुर्वाज्ञा । (ष.त.पु.)

**सर्वेषामपि साधूनामानुपूर्व्या परिस्फुटान् ।**
**संक्रान्त्या वज्रलेपाभान्, वज्रोऽप्यालापकान्ददौ ॥१८६॥**

**अन्वय :-** वज्रः अपि सर्वेषाम् अपि साधूनां संक्रान्त्या आनुपूर्व्या परिस्फुटान् वज्रलेपाभान् आलापकान् ददौ ।

**समास :-** (१) आनुपूर्व्या – (A) पूर्वस्यानुक्रमेण इति अनुपूर्वम् । (अव्य.भा.)

(B) अनुपूर्वस्य भावः कर्म वा आनुपूर्वी, तया आनुपूर्व्या । (तद्धित) अ(अण्) + ई(ङी) ।

(२) वज्रलेपाभान् – (A) वज्रस्य लेपः इति वज्रलेपः । (ष.त.पु.)

(B) वज्रलेपेन आभाः इति वज्रलेपाभाः, तान् वज्रलेपाभान् । (तृ.त.पु.)

**ये अल्पमेधसस्तेऽपि, साधवोऽध्येतुमागमन् ।**
**उपचक्रमिरे वज्रादादायादाय वाचनाम् ॥१८७॥**

**अन्वय :-** ये अल्पमेधसः ते साधवः अपि आगमन् वज्राद् वाचनाम् आदाय आदाय अध्येतुम् उपचक्रमिरे ।

**समास :-** (१) अल्पमेधसः – अल्पा मेधा येषां ते इति अल्पमेधसः । (समा.ब.व्री.)

**अमोघवाचनो वज्रो, बभूवातिजडेष्वपि ।**
**तन्नव्यमद्भुतं दृष्ट्वा, गच्छैः सर्वो विसिष्मिये ॥१८८॥**

**अन्वय :-** अतिजडेषु अपि वज्रः अमोघवाचनः बभूव तद् नव्यम् अद्भुतं दृष्ट्वा सर्वः गच्छः विसिष्मिये ।

**समास :-** (१) अमोघवाचनः - (A) न मोघा इति अमोघा । (नञ्.त.पु.)

(B) अमोघा वाचना यस्य सः इति अमोघवाचनः । (समा.ब.व्री.)

(२) अतिजडेषु - अतिशयेन जडाः इति अतिजडाः, तेषु अतिजडेषु । (प्रादि.कर्म.)

**आलापान्साधवः पूर्वमधीतानस्फुरानपि ।**
**संवादार्थमपृच्छंश्च, वज्रोऽप्याख्यत्तथैव तान् ॥१८९॥**

**अन्वय :-** साधवः पूर्वम् अधीतान् अपि अस्फुरान् आलापान् संवादार्थम् अपृच्छन् वज्रः अपि च तथैव तान् आख्यात् ।

**समास :-** (१) अस्फुरान्-न स्फुराः इति अस्फुराः, तान् अस्फुरान् । (नञ्.त.पु.)

(२) संवादार्थम् - संवादस्य अर्थम् इति संवादार्थम् । (ष.त.पु.)

**तावदेकवाचनया, वज्रात्पेठुर्महर्षयः ।**
**अप्यनेकवाचनाभिर्यावन्न गुरुसन्निधौ ॥१९०॥**

**अन्वय :-** महर्षयः गुरुसन्निधौ अनेकवाचनाभिः अपि यावत् न पेठुः तावत् वज्रात् एकवाचनया (पेठुः) ।

**समास :-** (१) एकवाचनया - एका वाचना इति एकवाचना, तया एकवाचनया । (वि.पू.क.)

(२) महर्षयः – पूर्ववत् ।

(३) अनेकवाचनाभिः – (A) न एकाः इति अनेकाः । (नञ्.त.पु.)

(B) अनेकाश्चामूः वाचनाश्च इति अनेकवाचनाः, ताभिः अनेकवाचनाभिः । (वि.पू.क.)

(४) गुरुसन्निधौ – पूर्ववत् ।

**ते[1]ऽभ्यधुः[4] साधवो[2]ऽन्योऽन्यम्[3], गुरु[6]र्यदि[5] विलम्बते[7] ।**
**वज्रपार्श्वे[9] तदा[8] शीघ्रम्[11], श्रुतस्कन्धः[10] समाप्यते[12] ॥१९१॥**

अन्वय :- ते साधवः अन्योन्यम् अभ्यधुः यदि गुरुः विलम्बते तदा वज्रपार्श्वे श्रुतस्कन्धः शीघ्रं समाप्यते ।

समास :- (१) अन्योऽन्यम् – अन्यः अन्यः इति अन्योऽन्यम्, तद् अन्योऽन्यम् । (इ.द्व.)

(२) वज्रपार्श्वे – वज्रस्य पार्श्वम् इति वज्रपार्श्वम्, तस्मिन् वज्रपार्श्वे । (ष.त.पु.)

(३) श्रुतस्कन्धः – श्रुतमेव स्कन्धः इति श्रुतस्कन्धः । (अव.पू.क.)

**गुरुभ्यो[3]ऽभ्यधिकं[4] वज्रम्[5], मेनिरे[6] मुनयो[1] गुणैः[2] ।**
**एकगुरुदीक्षिते[8] हि[7], सुगुणे[9] मोदते[11] गणः[10] ॥१९२॥**

अन्वय :- मुनयः गुणैः गुरुभ्यः अभ्यधिकं वज्रं मेनिरे हि एकगुरुदीक्षिते सुगुणे गणः मोदते ।

समास :- (१) अभ्यधिकम् – अभितः अधिकः यस्मिन् कर्मणि यथा स्यात्तथा इति अभ्यधिकम् । (सुप्सुप् स.)

(२) एकगुरुदीक्षिते – (A) एकश्चासौ गुरुश्च इति एकगुरुः । (वि.पू.क.)

(B) एकगुरुणा दीक्षितः इति एकगुरुदीक्षितः, तस्मिन् एकगुरुदीक्षिते । (तृ.त.पु.)

(३) सुगुणे–शोभनाः गुणाः यस्य सः इति सुगुणः, तस्मिन् सुगुणे । (अव्य.ब.व्री.)

**आचार्या[१]श्चिन्तयामा[३]सुरेता[४]वद्भिश्च[२] वासरैः[५] ।**
**वज्रो[७]ऽस्मत्परिवारस्य[८], भावी[१०] ज्ञातगुणः[९] खलु[६] ॥१९३॥**

**अन्वय :-** आचार्याः च चिन्तयामासुः एतावद्भिः वासरैः खलु वज्रः अस्मत्परिवारस्य ज्ञातगुणः भावी ।

**समास :-** (१) एतावद्भिः – एतत् प्रमाणं येषां तानि इति एतावन्ति, तैः एतावद्भिः । (तद्धित)

(२) अस्मत्परिवारस्य – अस्माकम् परिवारः इति अस्मत्परिवारः, तस्य अस्मत्परिवारस्य । (ष.त.पु.)

(३) ज्ञातगुणः – ज्ञाताः गुणाः यस्य सः इति ज्ञातगुणः । (समा.ब.व्री.)

**वज्र[७]मध्यापयामो[८]ऽथो[१]ऽनधीतं[५] तद्[६]यद[४]स्य[२] हि[३] ।**
**उपेत्य[१३] पाठ्यतां[१४] याति[१५], गुरोः[१२] शिष्यो[११]ऽमलै[९]र्गुणैः[१०] ॥१९४॥**

**अन्वय :-** अथ अस्य हि यद् अनधीतं तद् वज्रम् अध्यापयामः अमलैः गुणैः शिष्यः गुरोः उपेत्य पाठ्यतां याति ।

**समास :-** (१) अनधीतम् – न अधीतम् इति अनधीतम् । (नञ्.त.पु.)

(२) अमलैः – नास्ति मलं येषां ते इति अमलाः, तैः अमलैः । (नञ्.ब.व्री.)

**चिन्तयित्वै[३]वं[२]माचार्याः[१], कथिते[४]ऽह्नि[५] समाययुः[६] ।**
**मुनयो[९] वज्रसहिता[७]स्तत्पादांश्च[१०][८] ववन्दिरे[११] ॥१९५॥**

**अन्वय :-** आचार्याः एवं चिन्तयित्वा कथिते अह्नि समाययुः वज्रसहिताः च मुनयः तत्पादान् ववन्दिरे ।

**समास :-** (१) वज्रसहिताः – **वज्रेण सहिताः** इति वज्रसहिताः । (तृ.त.पु.)

(२) तत्पादान् – **तेषाम् पादाः** इति तत्पादाः, तान् तत्पादान् । (ष.त.पु.)

**किं[१] वः[२] स्वाध्यायनिर्वाहो[३], भवती[४]ति[५] गुरूदिते[६] ।**
**बभाषिरे[१०] देवगुरुप्रसादा[८]दिति[९] साधवः[७] ॥१९६॥**

**अन्वय :-** किं वः स्वाध्यायनिर्वाहः भवति इति गुरूदिते साधवः देवगुरुप्रसादात् इति **बभाषिरे** ।

**समास :-** (१) स्वाध्यायनिर्वाहः – **(A)** स्वाध्यायः – पूर्ववत् ।

(B) स्वाध्यायस्य **निर्वाहः** इति स्वाध्यायनिर्वाहः । (ष.त.पु.)

(२) गुरूदिते – **गुरुणा उदितम्** इति गुरूदितम्, तस्मिन् गुरूदिते । (तृ.त.पु.)

(३) देवगुरुप्रसादात् – **(A)** देवाश्च गुरवश्च इति देवगुरवः । (इ.द्व.)

(B) देवगुरूणां **प्रसादः** इति देवगुरुप्रसादः, तस्मात् देवगुरुप्रसादात् । (ष.त.पु.)

**वन्दित्वा पुनराचार्यान्शिष्याः सर्वे व्यजिज्ञपन् ।**
**अस्माकं वाचनाचार्यो, वज्रोऽभूद्युष्मदाज्ञया ॥१९७॥**

**अन्वय :-** पुनः वन्दित्वा सर्वे शिष्याः आचार्यान् व्यजिज्ञपन् युष्मदाज्ञया वज्रः अस्माकं वाचनाचार्यः अभूत् ।

**समास :-** (१) वाचनाचार्यः – पूर्ववत् ।

(२) युष्मदाज्ञया – युष्माकम् आज्ञा इति युष्मदाज्ञा, तया युष्मदाज्ञया । (ष.त.पु.)

**वज्रश्चिरमवज्ञातोऽस्माभिरज्ञाततद्गुणैः ।**
**इदानीं भगवत्पादा, इव बालोऽप्ययं हि नः ॥१९८॥**

**अन्वय :-** अज्ञाततद्गुणैः अस्माभिः वज्रः चिरम् अवज्ञातः इदानीम् बालः अपि अयं हि नः भगवत्पादा इव (भवतु) ।

**समास :-** (१) अज्ञाततद्गुणैः – (A) तस्य गुणाः इति तद्गुणाः । (ष.त.पु.)

(B) न ज्ञाताः इति अज्ञाताः । (नञ्.त.पु.)

(C) अज्ञाताः तद्गुणाः यैः ते इति अज्ञाततद्गुणाः, तैः अज्ञाततद्गुणैः । (समा.ब.व्री.)

**बालोऽप्ययंस्त्वेष गच्छस्य, गुरुर्गुरु गुणान्वितः ।**
**प्रदीपः कुन्दकलिकामात्रोऽप्युद्द्योतयेद् गृहम् ॥१९९॥**

**अन्वय :-** कुन्दकलिकामात्रः अपि प्रदीपः गृहम् उद्द्योतयेद् गुरुगुणान्वितः एष बालः अपि गच्छस्य गुरुः अस्तु ।

**समास :-** (१) गुरुर्गुणान्वितः – (A) गुरवश्च इमे गुणाश्च इति गुरुगुणाः । (वि.पू.क.)

(B) गुरुगुणैः अन्वितः इति गुरुगुणान्वितः । (तृ.त.पु.)

(२) कुन्दकलिकामात्रः (A) कुन्दस्य कलिका इति कुन्दकलिका । (ष.त.पु.)

(B) कुन्दकलिका एव इति कुन्दकलिकामात्रः । (मयू.व्यं.कर्म.)

**आचार्यवर्या[1] जग[2]दुर्भवत्वे[5]वं[4] तपोधना[3]:! ।**
**किन्त्व[6]सौ[11] नाव[12]मन्तव्यो,[13] विद्यावृद्धो[10]ऽर्भको[7]ऽपि[8] हि[9] ॥२००॥**

**अन्वय :-** आचार्यवर्याः जगदुः तपोधनाः ! एवं भवतु किन्तु अर्भकः अपि हि विद्यावृद्धः असौ न अवमन्तव्यः ।

**समास :-** (१) आचार्यवर्याः – आचार्येषु वर्याः इति आचार्यवर्याः । (स.त.पु.)

(२) तपोधनाः! – तपः धनम् येषां ते इति तपोधनाः, तत्सम्बोधनं तपोधनाः! । (समा.ब.व्री.)

(३) विद्यावृद्धः–विद्यया वृद्धः इति विद्यावृद्धः । (तृ.त.पु.)

**अगमाम[16] वयं[13] ग्राम[15]माचार्यो[10]ऽयं[9] च[14] वो[11]ऽर्पित[12]: ।**
**अत[7] एव[8] यथा[1] वित्थ[6], यूय[2]मस्ये[3]दृशान्[4] गुणान्[5] ॥२०१॥**

**अन्वय :-** यथा यूयम् अस्य ईदृशान् गुणान् वित्थ अत एव अयम् आचार्यः वः अर्पितः वयं च ग्रामम् अगमाम ।

**अन्यथा[1] वाचनाचार्यपदवीं[3] नाय[4]म[2]र्हति[5] ।**
**गुर्व[8]दत्तं यतो[6]ऽनेन[7], कर्णश्रुत्या[10]ऽऽददे[11] श्रुतम्[9] ॥२०२॥**

**अन्वय :-** अन्यथा अयं वाचनाचार्यपदवीं न अर्हति यतः अनेन गुर्वदत्तं श्रुतं कर्णश्रुत्या आददे ।

**समास :-** (१) वाचनाचार्यपदवीम् – (A) वाचनाचार्यः – पूर्ववत् ।
(B) वाचनाचार्यस्य पदवी इति वाचनाचार्यपदवी, तां वाचनाचार्यपदवीम् । (ष.त.पु.)
(२) गुर्वदत्तम् – (A) न दत्तम् इति अदत्तम् । (नञ्.त.पु.)
(B) गुरुणा अदत्तम् इति गुर्वदत्तम्, तद् गुर्वदत्तम् । (तृ.त.पु.)
(३) कर्णश्रुत्या – कर्णेन श्रुतिः इति कर्णश्रुतिः, तया कर्णश्रुत्या । (तृ.त.पु.)

**सङ्क्षेपानुष्ठानरूपोत्सारकल्पो[3]ऽस्य[2] संयता[1]! ।**
**कार्य[4] आचार्यपदवीयोग्यो[8] ह्ये[6]ष[7] ततो[5] भवेत्[9] ॥२०३॥**

**अन्वय :-** संयताः ! अस्य सङ्क्षेपानुष्ठानरूपोत्सारकल्पः कार्यः ततः हि एषः आचार्यपदवीयोग्यः भवेत् ।

**समास :-** (१) संक्षेपानुष्ठानरूपोत्सारकल्पः – (A) संक्षेपेण कृतम् इति संक्षेपकृतम् । (तृ.त.पु.)
(B) संक्षेपकृतम् अनुष्ठानम् इति संक्षेपानुष्ठानम् । (म.प.लो.क.)
(C) संक्षेपानुष्ठानमेव इति संक्षेपानुष्ठानरूपः। (तद्धित)
(D) संक्षेपानुष्ठानरूपः उत्सारः इति संक्षेपानुष्ठान-रूपोत्सारः । (वि.पू.क.)
(E) संक्षेपानुष्ठानरूपोत्सारेण (कृतः) कल्पः इति संक्षेपानुष्ठानरूपोत्सारकल्पः । (तृ.त.पु.)

(२) आचार्यपदवीयोग्यः - (A) आचार्यस्य पदवी इति आचार्यपदवी। (ष.त.पु.)

(B) आचार्यपदव्याः योग्यः इति आचार्य-पदवीयोग्यः। (ष.त.पु.)

**ततश्च[1,2] प्राग[6]पठितम्[7], श्रुत[9]मर्थसमन्वितम्[8]।**
**शीघ्र[10]मध्यापयामास[11], वज्रं[5] गुरु[4]रुदारधीः[3] ॥२०४॥**

**अन्वय :-** ततः च उदारधीः गुरुः वज्रं प्राग् अपठितम् अर्थ-समन्वितं श्रुतं शीघ्रम् अध्यापयामास।

**समास :-** (१) अपठितम् - न पठितम् इति अपठितम्, तद् अपठितम्। (नञ्.त.पु.)

(२) अर्थसमन्वितम् - अर्थेन समन्वितम् इति अर्थसमन्वितम्। (तृ.त.पु.)

(३) उदारधीः - उदारा धीः यस्य सः इति उदारधीः। (समा.ब.व्री.)

**साक्षिमात्रीकृतगुरु[4]र्वज्रो[5] गुर्वर्पितं[6] श्रुतम्[8]।**
**प्रतिबिम्ब[2]मिवा[3]दर्शः[1], सर्वं[7] जग्राह[10] लीलया[9] ॥२०५॥**

**अन्वय :-** आदर्शः प्रतिबिम्बम् इव साक्षिमात्रीकृतगुरुः वज्रः गुर्वर्पितं सर्वं श्रुतं लीलया जग्राह।

**समास :-** (१) साक्षिमात्रीकृतगुरुः - (A) साक्षी एव इति साक्षिमात्रः। (मयू.व्यं.कर्म.)

(B) न साक्षिमात्रः इति असाक्षिमात्रः। (नञ्.त.पु.)

(C) असाक्षिमात्रः साक्षिमात्रः कृतः इति साक्षिमात्रीकृतः। (गति.त.पु.)

(D) साक्षिमात्रीकृतः गुरुः येन सः इति साक्षिमात्रीकृतगुरुः । (समा.ब.व्री.)

(२) गुर्वर्पितम् - गुरुणा अर्पितम् इति गुर्वर्पितम्, तद् गुर्वर्पितम् । (तृ.त.पु.)

**श्रुतज्ञो[3]ऽभूत्[4]तथा[2] वज्रो[1], यथा[5] तस्य[6] गुरोर[7]पि[8] ।**
**दुर्भेदचिरसन्देहलोष्ठमुद्गरतां[9] ययौ[10] ॥२०६॥**

**अन्वय :-** वज्रः तथा श्रुतज्ञः अभूत् यथा तस्य गुरोः अपि दुर्भेदचिरसन्देहलोष्ठमुद्गरतां ययौ ।

**समास :-** (१) श्रुतज्ञः - श्रुतं जानाति इति श्रुतज्ञः । (उप.त.पु.)

(२) दुर्भेदचिरसन्देहलोष्ठमुद्गरताम् - (A) दुःखेन भिद्यन्ते इति दुर्भेदाः । (उप.त.पु.)

(B) चिरेण स्थिताः इति चिरस्थिताः । (प्रादि.कर्म.)

(C) चिरस्थिताः सन्देहाः इति चिरसन्देहाः । (म.प.लो.क.)

(D) दुर्भेदाश्चामी चिरसन्देहाश्च इति दुर्भेदचिरसन्देहाः । (वि.पू.क.)

(E) दुर्भेदचिरसन्देहा एव लोष्ठानि इति दुर्भेदचिर-सन्देहलोष्ठानि । (अव.पू.क.)

(F) दुर्भेदचिरसन्देहलोष्ठानि भिनत्ति इति दुर्भेदचिरसन्देहलोष्ठभेदकः । (उप.त.पु.)

(G) दुर्भेदचिरसन्देहलोष्ठभेदकः मुद्गरः इति दुर्भेद-चिरसन्देहलोष्ठमुद्गरः । (म.प.लो.क.)

(H) दुर्भेदचिरसन्देहलोष्ठमुद्गरस्य भावः इति दुर्भेद-

चिरसन्देहलोष्ठमुद्गरता, तां दुर्भेदचिरसन्देहलोष्ठ-मुद्गरताम् । (तद्धित)

**दृष्टिवादो[3]ऽपि[4] हृदये[2] यावन्मात्रो[5]ऽभवद्[6] गुरोः[1] ।**
**तावा[7]नुपाददे[10] वज्रेणा[8]म्भश्चुलुकलीलया[9] ॥२०७॥**

**अन्वय :-** गुरोः हृदये दृष्टिवादः अपि यावन्मात्रः अभवत् तावान् वज्रेण अम्भश्चुलुकलीलया उपाददे ।

**समास :-** (१) यावन्मात्रः - यावान् एव इति यावन्मात्रः। (म.व्यं.क.)

(२) अम्भश्चुलुकलीलया - (A) अम्भसा पूर्णः अम्भःपूर्णः । (तृ.त.पु.)

(B) अम्भःपूर्णः चुलुकः इति अम्भश्चुलुकः । (म.प.लो.क.)

(C) अम्भश्चुलुकस्य लीला इति अम्भश्चुलुकलीला, तया अम्भश्चुलुकलीलया । (ष.त.पु.)

**अन्यदा[1] विहरन्त[6]स्ते[8], ग्रामाद्[2] ग्रामं[3] पुरात्[4]पुरम्[5] ।**
**पुरं[11] दशपुरं[10] जग्मु[12]राचार्याः[9] सपरिच्छदाः[7] ॥२०८॥**

**अन्वय :-** अन्यदा ग्रामाद् ग्रामम् पुरात् पुरम् विहरन्तः सपरिच्छदाः ते आचार्याः दशपुरं पुरं जग्मुः ।

**समास :-** (१) सपरिच्छदाः - परिच्छदेन सह वर्तन्ते ये ते इति सपरिच्छदाः । (सह.ब.व्री.)

**तदा[1] चो[2]ज्जयनीपुर्याम्[3] सम्पूर्णदशपूर्वभृत्[4] ।**
**आचार्यो[5]ऽस्ति[6] तदै[7]तस्मादादेयो[11] दशपूर्व्यपि[10] ॥२०९॥**

**अन्वय :-** तदा च उज्जयनीपुर्यां सम्पूर्णदशपूर्वभृत् आचार्यः अस्ति तद् एतस्माद् दशपूर्वी अपि आदेया ।

**समास :-** (१) उज्जयनीपुर्याम् - (A) उज्जयनी नाम यस्याः सा इति उज्जयनीनामा । (समा.ब.व्री.)

(B) उज्जयनीनामा पुरी इति उज्जयनीपुरी, तस्याम् उज्जयनीपुर्याम् । (म.प.लो.क.)

(२) सम्पूर्णदशपूर्वभृत् - (A) दशानां पूर्वाणां समाहारः इति दशपूर्वम् । (द्विगु.क.)

(B) संपूर्णं च तद् दशपूर्वं च इति संपूर्णदशपूर्वम् । (वि.पू.क.)

(C) संपूर्णदशपूर्वं बिभर्ति इति संपूर्णदशपूर्वभृत् । (उप.त.पु.)

(३) दशपूर्वी - दशपूर्ववत् ।

**एकादशाङ्गीपाठो[२]ऽपि[३], येषां[१] कष्टायते[५] भृशम्[४] ।**
**ते[६]ऽस्मच्छिष्या[७] दशपूर्वग्रहणे[८] कथमी[९]शताम्[१०] ॥२१०॥**

**अन्वय :-** येषाम् एकादशाङ्गीपाठः अपि भृशं कष्टायते ते अस्मच्छिष्याः दशपूर्वग्रहणे कथम् ईशताम् ।

कष्टायते - कष्टाय क्रामति इति कष्टायते । कष्टकक्ष० ३।४।३१... क्यङ् ।

**समास :-** (१) एकादशाङ्गीपाठः - (A) एकादशाङ्गी - पूर्ववत् ।

(B) एकादशाङ्ग्याः पाठः इति एकादशाङ्गीपाठः (ष.त.पु.)

(२) दशपूर्वग्रहणे - (A) दशपूर्वम् - पूर्ववत् ।

(B) दशपूर्वस्य ग्रहणम् इति दशपूर्वग्रहणम्, तस्मिन् दशपूर्वग्रहणे । (ष.त.पु.)

**अथवाऽस्त्येव हुं वज्रः, कृतमीदृशचिन्तया ।**
**पदानुसारिलब्ध्या हि, दृष्टप्रत्यय एष नः ॥२११॥**

**अन्वय :-** अथवा ईदृशचिन्तया कृतं हुं नः पदानुसारिलब्ध्या दृष्टप्रत्ययः एष हि वज्रः अस्ति एव ।

**समास :-** (१) ईदृशचिन्तया-ईदृशी च सा चिन्ता च इति ईदृशचिन्ता, तया ईदृशचिन्तया । (वि.पू.क.)

(२) पदानुसारिलब्ध्या- (A) पदानि अनुसरति इत्येवंशीला इति पदानुसारिणी । (उप.त.पु.)

(B) पदानुसारिणी चासौ लब्धिश्च इति पदानु-सारिलब्धिः, तया पदानुसारिलब्ध्या । (वि.पू.क.)

(३) दृष्टप्रत्ययः- दृष्टः प्रत्ययः यस्मिन् सः इति दृष्ट-प्रत्ययः । (समा.ब.व्री.)

**इत्यादिशद् गुरुर्वज्रम्, त्वं वत्सोज्जयिनीं व्रज ।**
**तत्राधीष्व दशपूर्वीम्, भद्रगुप्तगुरोर्मुखात् ॥२१२॥**

**अन्वय :-** वत्स ! त्वम् उज्जयिनीं व्रज तत्र भद्रगुप्तगुरोः मुखात् दशपूर्वीम् अधीष्व इति गुरुः वज्रम् आदिशद् ।

**समास :-** (१) दशपूर्वीम् - दशपूर्वी-पूर्ववत्, तां दशपूर्वीम् ।

(२) भद्रगुप्तगुरोः - (A) भद्रगुप्तः नाम यस्य सः इति भद्रगुप्तनामा । (समा.ब.व्री.)

(B) भद्रगुप्तनामा गुरुः इति भद्रगुप्तगुरुः, तस्य भद्रगुप्तगुरोः । (म.प.लो.क.)

**अत्यल्पमेधसः[7] सर्वे[8], तव[6] सब्रह्मचारिणः[9] ।**
**न[12] ह्य[11]लम्भूष्णवो[10]ऽमुत्र[5], यत्रा[1]हम[2]पि[3] कुण्ठधीः[4] ।।२१३।।**

**अन्वय :-** यत्र अहम् अपि कुण्ठधीः अमुत्र तव अत्यल्पमेधसः सर्वे सब्रह्मचारिणः अलम्भूष्णवः हि न ।

**समास :-** (१) अत्यल्पमेधसः – (A) अतिशयेन अल्पा इति अत्यल्पा । (प्रादि.कर्म.)

(B) अत्यल्पा मेधा येषां ते इति अत्यल्पमेधसः । (समा.ब.व्री.)

(२) सब्रह्मचारिण : – समाने ब्रह्मणि (आगमे गुरुकुले वा व्रतं) चरन्तीत्येवंशीलाः इति सब्रह्मचारिणः । 'सब्रह्मचारी' ३।२।१५० इन् । (उप.त.पु.)

(३) कुण्ठधीः – कुण्ठा धीः यस्य सः इति कुण्ठधीः । (समा.ब.व्री.)

**अधीत्य[5] दश[3] पूर्वाणि[4], शीघ्र[6]मेहि[7] मदाज्ञया[2] ।**
**तव[9] सन्निहिताः[10] सन्तु[11], सौम्य[1] ! शासनदेवताः[8] ।।२१४।।**

**अन्वय :-** सौम्य ! मदाज्ञया दश पूर्वाणि अधीत्य शीघ्रम् एहि शासनदेवताः तव सन्निहिताः सन्तु ।

**समास :-** (१) मदाज्ञया – मम आज्ञा इति मदाज्ञा, तया मदाज्ञया । (ष.त.पु.)

(२) शासनदेवताः – (A) शासने अधिष्ठिताः इति शासनाधिष्ठिताः । (स.त.पु.)

(B) शासनाधिष्ठिताः देवताः इति शासनदेवताः । (म.प.लो.क.)

**त्वन्मुखाच्च प्रसरतु, दशपूर्वी महर्षिषु ।**
**हे वत्स! कूपादुदकमिवोपवनशाखिषु ॥२१५॥**

**अन्वय :-** हे वत्स ! च उपवनशाखिषु कूपाद् उदकम् इव महर्षिषु त्वन्मुखात् दशपूर्वी प्रसरतु ।

**समास :-** (१) त्वन्मुखात् – तव मुखम् इति त्वन्मुखम्, तस्मात् त्वन्मुखात् । (ष.त.पु.)

(२) दशपूर्वी – पूर्ववत् ।

(३) महर्षिषु – महर्षयः पूर्ववत्, तेषु महर्षिषु ।

(४) उपवनशाखिषु – (A) उपमितं वनेन इति उपवनम् । (प्रादि. त.पु.)

(B) उपवनस्य शाखिनः इति उपवनशाखिनः, तेषु उपवनशाखिषु । (ष.त.पु.)

**एवं सिंहगिरिर्वज्रमवन्तीं गन्तुमादिशत् ।**
**वर्तेते स्थविरः कल्प, इत्यृषी द्वौ च तत्समम् ॥२१६॥**

**अन्वय :-** एवं सिंहगिरिः स्थविरः कल्पः इति द्वौ ऋषी वर्तेते, तत्समं च, वज्रम् अवन्तीं गन्तुम् आदिशत् ।

**समास :-** (१) तत्समम् – ताभ्यां समम् इति तत्समम् । (तृ.त.पु.)

**शेषामिवाज्ञामादाय, मूर्ध्ना सिंहगिरेर्गुरोः ।**
**वज्रोऽगाद्भद्रगुप्तांह्रिपूतामुज्जयिनीं पुरीम् ॥२१७॥**

**अन्वय :-** वज्रः सिंहगिरेः गुरोः आज्ञां शेषाम् इव मूर्ध्ना आदाय भद्रगुप्तांह्रिपूताम् उज्जयिनीं पुरीम् अगाद् ।

**समास :-** (१) भद्रगुप्तांह्रिपूताम् - (A) भद्रगुप्तस्य अंह्री इति भद्रगुप्तांह्री । (ष.त.पु.)

(B) भद्रगुप्तांह्रिभ्यां पूता इति भद्रगुप्तांह्रिपूता, तां भद्रगुप्तांह्रिपूताम् । (तृ.त.पु.)

**प्राप्ते चोज्जयिनीपुर्याम्, सुनन्दानन्दने मुनौ ।**
**निरैक्षिष्ट भद्रगुप्ताचार्यः स्वप्नं शुभे क्षणे ॥२१८॥**

**अन्वय :-** सुनन्दानन्दने मुनौ च शुभे क्षणे उज्जयिनीपुर्यां प्राप्ते भद्रगुप्ताचार्यः स्वप्नं निरैक्षिष्ट ।

**समास :-** (१) उज्जयिनीपुर्याम् - पूर्ववत् ।

(२) सुनन्दानन्दने - सुनन्दायाः नन्दनः इति सुनन्दा-नन्दनः, तस्मिन् सुनन्दानन्दने । (ष.त.पु.)

(३) भद्रगुप्ताचार्यः - (A) भद्रगुप्तः नाम यस्य सः इति भद्रगुप्तनामा । (समा.ब.व्री.)

(B) भद्रगुप्तनामा आचार्यः इति भद्रगुप्ताचार्यः । (म.प.लो.क.)

**यदादाय मम करात्, क्षीरपूर्णं पतद्ग्रहम् ।**
**आगन्तुकोऽपिबत्कश्चित्, तृप्तिं च परमामगात् ॥२१९॥**

**अन्वय :-** यद् मम करात् क्षीरपूर्णं पतद्ग्रहम् आदाय कश्चिद् आगन्तुकः अपिबत् परमां च तृप्तिम् अगात् ।

**समास :-** (१) क्षीरपूर्णम्-क्षीरेण पूर्णः इति क्षीरपूर्णः तम् क्षीरपूर्णम् । (तृ.त.पु.)

(२) पतद्ग्रहम्-पतन्तं गृह्णाति इति पतद्ग्रहः, तम् पतद्ग्रहम् । (उप.त.पु.)

**शिष्येभ्यः कथयामास, गुरुः स्वप्नं च तं प्रगे ।**
**तस्यार्थं विविधं तेऽपि, यथाप्रज्ञं व्यचारयन् ॥२२०॥**

**अन्वय :-** गुरुः प्रगे तं स्वप्नं शिष्येभ्यः कथयामास ते अपि च तस्य विविधम् अर्थं यथाप्रज्ञं व्यचारयन् ।

**समास :-** (१) यथाप्रज्ञम् - प्रज्ञाम् अनतिक्रम्य इति यथाप्रज्ञम् । (अव्य.भा.)

**गुरुरूचे न जानीथातिथिः कोऽप्यागमिष्यति ।**
**स सार्थं सूत्रमस्मत्तः सर्वमादास्यते सुधीः ॥२२१॥**

**अन्वय :-** गुरुः ऊचे न जानीथ कोऽपि अतिथिः आगमिष्यति सुधीः सः अस्मत्तः सार्थं सर्वं सूत्रम् आदास्यते ।

**समास :-** (१) अतिथिः-न विद्यते तिथिः यस्य सः इति अतिथिः । (नञ्.ब.व्री.)

(२) सार्थम् - अर्थेन सह वर्तते यद् तद् इति सार्थम् । (सह.ब.व्री.)

(३) अस्मत्तः - अस्मभ्यम् इति अस्मत्तः । (तद्धित)

(४) सुधीः-पूर्ववत् ।

**वज्रो[१]ऽपि[२] नगरीद्वारे[३], शर्वरी[४]मतिवाह्य[५] च[७] ।**
**प्रभाते[६]ऽगाद्[९]भद्रगुप्ताचार्यवर्यप्रतिश्रयम्[८] ॥२२२॥**

**अन्वय :-** वज्रः अपि नगरीद्वारे शर्वरीम् अतिवाह्य प्रभाते च भद्रगुप्ताचार्यवर्यप्रतिश्रयम् अगाद् ।

**समास :-** (१) नगरीद्वारे – नगर्याः द्वारम् इति नगरीद्वारम्, तस्मिन् नगरीद्वारे । (ष.त.पु.)

(२) भद्रगुप्ताचार्यवर्यप्रतिश्रयम् – (A) भद्रगुप्ताचार्यः– पूर्ववत् ।

(B) भद्रगुप्ताचार्यश्चासौ वर्यश्च इति भद्रगुप्ताचार्यवर्यः। (वि.उत्त.क.)

(C) भद्रगुप्ताचार्यवर्यस्य प्रतिश्रयः इति भद्रगुप्ताचार्यवर्यप्रतिश्रयः, तं भद्रगुप्ताचार्यवर्यप्रतिश्रयम् । (ष.त.पु.)

**दूरतो[५] वज्र[६]मालोक्य[७], गुरु[४]रिन्दु[२]मिवा[३]र्णवः[१] ।**
**उल्लासं[११] कलयामास[१२], परं[१०] परमया[८] मुदा[९] ॥२२३॥**

**अन्वय :-** अर्णवः इन्दुम् इव गुरुः दूरतः वज्रम् आलोक्य परमया मुदा परम् उल्लासं कलयामास ।

**आचार्यो[१]ऽध्यायदहो[२]![३] मे[६], सौभाग्येना[५]स्य[४] धीरिति[७] ।**
**[९]किमालिङ्गा[१२]म्यह[१०]ममु[११]मङ्क[१३]मारोपयामि[१५] च[१४] ॥२२४॥**

**अन्वय :-** आचार्यः अध्यायद् अहो ! अस्य सौभाग्येन मे इति धीः अहम् किं अमुम् आलिङ्गामि अङ्कं च आरोपयामि ।

**समास :-** (१) सौभाग्येन – (A) सौभाग्यम् – पूर्ववत्, तेन सौभाग्येन ।

**प्रसिद्धिसदृशीं[3] वज्रस्या[4]कृतिं[5] परिभाव्य[6] च[8] ।**
**वज्रो[9]ऽयमि[7]ति[10] निश्चिक्ये[11], भद्रगुप्तो[1] महामुनिः[2] ॥२२५॥**

**अन्वय :-** भद्रगुप्तः महामुनिः प्रसिद्धिसदृशीं वज्रस्य आकृतिं परिभाव्य अयं च वज्रः इति निश्चिक्ये ।

**समास :-** (१) प्रसिद्धिसदृशीम् – प्रसिद्ध्या सदृशी इति प्रसिद्धि-सदृशी, तां प्रसिद्धिसदृशीम् । (तृ.त.पु.)

(२) महामुनिः–पूर्ववत् ।

**वन्दनाभिमुखं[3] वज्रम्[4], भद्रगुप्तो[2]ऽथ[1] सस्वजे[5] ।**
**बलीयसी[7] खलू[6]त्कण्ठा[8], विनयं[9] न[10] प्रतीक्षते[11] ॥२२६॥**

**अन्वय :-** अथ भद्रगुप्तः वन्दनाभिमुखं वज्रं सस्वजे खलु बलीयसी उत्कण्ठा विनयं न प्रतीक्षते ।

**समास :-** (१) वन्दनाभिमुखम् – (A) अभिप्रपन्नः मुखम् इति अभिमुखः । (त.पु.)

(B) वन्दनस्य अभिमुखः इति वन्दनाभिमुखः, तं वन्दनाभिमुखम् । (ष.त.पु.)

**आरो[8]प्याङ्के[7] भद्रगुप्ताचार्यो[5] वज्रम[6]भाषत[9] ।**
**अधितद्वदनाम्भोजम्[1], स्वनेत्रे[2] भृङ्गतां[3] नयन्[4] ॥२२७॥**

**अन्वय :-** अधितद्वदनाम्भोजं स्वनेत्रे भृङ्गतां नयन् भद्रगुप्ताचार्यो वज्रम् अङ्के आरोप्य अभाषत ।

**समास :-** (१) भद्रगुप्ताचार्यः – पूर्ववत् ।

(२) अधितद्वदनाम्भोजम् – (A) तस्य वदनम् इति तद्वदनम् । (ष.त.पु.)

(B) अम्भसि जातम् इति अम्भोजम् । (उप.त.पु.)

(C) तद्वदनम् एव अम्भोजम् इति तद्वदनाम्भोजम् । (अव.पू.क.)

(D) तद्वदनाम्भोजे इति अधितद्वदनाम्भोजम् । (अव्य.भा.)

(३) स्वनेत्रे – स्वस्य नेत्रे इति स्वनेत्रे ते स्वनेत्रे । (ष.त.पु.)

**कच्चित्सुखविहारस्ते, कच्चित्तेऽङ्गमनामयम् ।**
**कच्चित्तपस्ते निर्विघ्नम्, कच्चित्ते कुशली गुरुः ॥२२८॥**

**अन्वय :-** कच्चित् ते सुखविहारः कच्चित् ते अङ्गम् अनामयं कच्चित् ते तपः निर्विघ्नं कच्चित् ते गुरुः कुशली । कच्चित् – प्रश्नार्थकोऽव्ययः । "कच्चिदिष्टपरिप्रश्ने" ॥१५८॥ इत्यभिधाने ।

**समास :-** (१) सुखविहारः – सुखेन (कृतः) विहारः इति सुखविहारः । (तृ.त.पु.)

(२) अनामयम् – नास्ति आमयः यस्मिन् तद् इति अनामयम् । (नञ्.ब.व्री.)

(३) निर्विघ्नम् – निर्गताः विघ्नाः यस्मात् तद् इति निर्विघ्नम् । (प्रादि.ब.व्री.)

(४) कुशली–कुशलमस्ति यस्य इति कुशली ।(तद्धित)

**किं किंचित्कार्यमुद्दिश्य, विहारक्रमतोऽथवा ।**
**इहागतोऽसि वज्रर्षे !, कथयास्मान्प्रमोदय ॥२२९॥**

**अन्वय :-** वज्रर्षे ! किं किंचित् कार्यम् उद्दिश्य अथवा विहारक्रमतः इह आगतः असि कथय अस्मान् प्रमोदय ।

**समास :-** (१) विहारक्रमतः - विहारस्य क्रमः इति विहारक्रमः, तस्मात् विहारक्रमतः । (ष.त.पु.)

(२) वज्रर्षे ! - (A) वज्रः नाम यस्य सः इति वज्रनामा । (समा.ब.व्री.)

(B) वज्रनामा ऋषिः इति वज्रर्षिः, तत्सम्बोधनं - वज्रर्षे ! । (म.प.लो.क.)

**वन्दित्वा[2] भद्रगुप्तर्षिम्[1], वज्रो[5] विरचिताञ्जलिः[4] ।**
**उवाच[6] वदनद्वारविन्यस्तमुखवस्त्रिकः[3] ॥२३०॥**

**अन्वय :-** भद्रगुप्तर्षिं वन्दित्वा वदनद्वारविन्यस्तमुखवस्त्रिकः विरचिताञ्जलिः वज्रः उवाच ।

**समास :-** (१) भद्रगुप्तर्षिम् - (A) भद्रगुप्तः नाम यस्य सः इति भद्रगुप्तनामा । (समा.ब.व्री.)

(B) भद्रगुप्तनामा ऋषिः इति भद्रगुप्तर्षिः, तं भद्रगुप्तर्षिम् । (म.प.लो.क.)

(२) विरचिताञ्जलिः - विरचितः अञ्जलिः येन सः इति विरचिताञ्जलिः । (समा.ब.व्री.)

(३) वदनद्वारविन्यस्तमुखवस्त्रिकः -

(A) वदनस्य द्वारम् इति वदनद्वारम् । (ष.त.पु.)

(B) वदनद्वारे विन्यस्ता इति वदनद्वारविन्यस्ता । (स.त.पु.)

(C) मुखे स्थाप्या इति मुखस्थाप्या । (स.त.पु.)

(D) मुखस्थाप्या वस्त्रिका इति मुखवस्त्रिका ।
(म.प.लो.क.)

(E) वदनद्वारविन्यस्ता मुखवस्त्रिका येन सः इति
वदनद्वारविन्यस्तमुखवस्त्रिकः । (समा.ब.व्री.)

**यद्यत्सुखविहारादि, पूज्यपादैरपृच्छ्यत ।**
**तत्तत्तथैव देवानाम्, गुरूणां च प्रसादतः ॥२३१॥**

**अन्वय :-** पूज्यपादैः यद् यद् सुखविहारादि अपृच्छ्यत तद् तद्
देवानां गुरूणां च प्रसादतः तथैव (अस्ति) ।

**समास :-** (१) पूज्यपादैः – पूज्ये पादे येषां ते इति पूज्यपादाः, तैः
पूज्यपादैः । (समा.ब.व्री.)

(२) सुखविहारादि – (A) सुखविहारः पूर्ववत् ।

(B) सुखविहारः आदौ यस्मिन् तद् इति सुख-
विहारादि । (व्यधि.ब.व्री.)

**अध्येतुं दश पूर्वाणि, त्वामागां गुर्वनुज्ञया ।**
**तद्वाचनाप्रदानेन, प्रसीद भगवन्मयि ॥२३२॥**

**अन्वय :-** गुर्वनुज्ञया दश पूर्वाणि अध्येतुं त्वाम् आगां भगवन् !
तद्वाचनाप्रदानेन मयि प्रसीद ।

**समास :-** (१) गुर्वनुज्ञया – गुरोः अनुज्ञा इति गुर्वनुज्ञा, तया गुर्वनुज्ञया
। (ष.त.पु.)

(२) तद्वाचनाप्रदानेन – (A) तेषां वाचनाः इति
तद्वाचनाः । (ष.त.पु.)

(B) तद्वाचनानां प्रदानम् इति तद्वाचनाप्रदानम्, तेन तद्ववाचनाप्रदानेन । (ष.त.पु.)

**ततश्च दशपूर्वी तम्, भद्रगुप्तोऽध्यजीगपत् ।**
**गुरोरजनितक्लेशो, वज्रोऽथ दशपूर्व्यभूत् ॥२३३॥**

**अन्वय :-** ततः च भद्रगुप्तः तं दशपूर्वीम् अध्यजीगपत् गुरोः अजनितक्लेशः वज्रः अथ दशपूर्वी अभूत् ।

**समास :-** (१) दशपूर्वीम् - पूर्ववत् ।

(२) अजनितक्लेशः - (A) न जनितः इति अजनितः । (नञ्.त.पु.)

(B) अजनितः क्लेशः येन सः इति अजनितक्लेशः । (समा.ब.व्री.)

(३) दशपूर्वी- (A) दशपूर्वम् - पूर्ववत् ।

(B) दशपूर्वमधीतं येन इति दशपूर्वी । (तद्धित)

**यत्र चाध्येतुमारब्धम्, ग्राह्यानुज्ञापि तत्र हि ।**
**इति सिंहगिरेः पार्श्वे, वज्रो गन्तुमचिन्तयत् ॥२३४॥**

**अन्वय :-** यत्र च अध्येतुम् आरब्धं तत्र अपि हि सिंहगिरेः पार्श्वे गन्तुम् अनुज्ञा ग्राह्या इति वज्रः अचिन्तयत् ।

**इत्यापृच्छ्य भद्रगुप्तम्, वज्रो दशपुरं पुनः ।**
**अधीतदशपूर्वोऽगाद्, गृहीताम्बुरिवाम्बुदः ॥२३५॥**

**अन्वय :-** इति भद्रगुप्तम् आपृच्छ्य गृहीताम्बुः अम्बुदः इव अधीतदशपूर्वः वज्रः पुनः दशपुरम् अगाद् ।

**समास :-** (१) अधीतदशपूर्वः - (A) दशपूर्वम् - पूर्ववत् ।

(B) अधीतं दशपूर्वं येन सः इति अधीतदशपूर्वः ।
(समा.ब.व्री.)

(२) गृहीताम्बुः- गृहीतम् अम्बु येन सः इति गृहीताम्बुः।
(समा.ब.व्री.)

(३) अम्बुदः - अम्बु ददाति इति अम्बुदः । (उप.त.पु.)

**दशपूर्वार्णवागस्ते[२]र्वज्रस्यो[३]ऽभ्यागतस्य[१] तु[४] ।**
**पूर्वानुज्ञा[८] कृता[९] सिंहगिरिणा[६] गुरुणा[७] तदा[५] ॥२३६॥**

**अन्वय :-** अभ्यागतस्य दशपूर्वार्णवागस्तेः वज्रस्य तु तदा सिंह-गिरिणा गुरुणा पूर्वानुज्ञा कृता ।

**समास :-** (१) दशपूर्वार्णवागस्तेः - (A) दशपूर्वम् - पूर्ववत् ।

(B) दशपूर्वम् एव अर्णवः इति दशपूर्वार्णवः ।
(अव.पू.क.)

(C) दशपूर्वार्णवं पिबति इति दशपूर्वार्णव-पायकः । (उप.त.पु.)

(D) दशपूर्वार्णवपायकः अगस्तिः, इति दशपूर्वार्ण-वागस्तिः, तस्य दशपूर्वार्णवागस्तेः ।
(म.प.लो. क.)

(२) पूर्वानुज्ञा - पूर्वाणाम् अनुज्ञा पूर्वानुज्ञा । (ष.त.पु.)

**वज्रस्य[१] पूर्वानुज्ञायाम्[२], विदधे[७] जृम्भकामरैः[३] ।**
**महिमा[६] दिव्यकुसुमप्रकरादिभि[४]रद्भुतः[५] ॥२३७॥**

**अन्वय :-** वज्रस्य पूर्वानुज्ञायां जृम्भकामरैः दिव्यकुसुमप्रकरादिभिः अद्भुतः महिमा विदधे ।

**समास :-** (१) पूर्वानुज्ञायाम् – पूर्वानज्ञा–पूर्ववत्, तस्यां पूर्वानुज्ञायाम् । (ष.त.पु.)

(२) जृम्भकामरैः – (A) जृम्भकः जातिः येषां ते इति जृम्भकजातयः । (समा.ब.व्री.)

(B) जृम्भकजातयः अमराः इति जृम्भकामराः, तैः जृम्भकामरैः । (म.प.लो.क.)

(३) दिव्यकुसुमप्रकरादिभिः – (A) दिवि भवानि इति दिव्यानि । (तद्धित)

(B) दिव्यानि च तानि कुसुमानि च इति दिव्यकुसुमानि । (वि.पू.क.)

(C) दिव्यकुसुमानां प्रकरः इति दिव्यकुसुमप्रकरः । (ष.त.पु.)

(D) दिव्यकुसुमप्रकरः आदौ येषां ते इति दिव्यकुसुमप्रकरादयः, तैः दिव्यकुसुमप्रकरादिभिः । (व्यधि.ब.व्री.)

**अर्पयित्वा[४] सिंहगिर्याचार्यो[१] वज्रमुनेर्[२]गणम्[३] ।**
**प्रत्याख्या[६]यान्नपानादिं[५],कालं[७] कृत्वा[८] सुरो[९]ऽभवत्[१०] ॥२३८॥**

**अन्वय :-** सिंहगिर्याचार्यः वज्रमुनेः गणम् अर्पयित्वा अन्नपानादि प्रत्याख्याय कालं कृत्वा सुरः अभवत् ।

**समास :-** (१) सिंहगिर्याचार्यः – (A) सिंहगिरिः नाम यस्य सः इति सिंहगिरिनामा । (समा.ब.व्री.)

(B) सिंहगिरिनामा आचार्यः इति सिंहगिर्याचार्यः । (म.प.लो.क.)

(२) वज्रमुनेः – (A) वज्रमुनिः पूर्ववत्, तस्य वज्रमुनेः ।

(३) अन्नपानादि – (A) अन्नं च तद् पानं च इति अन्नपाने । (इ.द्व.)

(B) अन्नपाने आदौ यस्मिन् तद् इति अन्नपानादि तद् अन्नपानादि । (व्यधि.ब.व्री.)

**वज्रस्वाम्य[४]पि[५] भगवान्[३], मुनिपञ्चशतीवृतः[२] ।**
**विजहार[७] महीं[६] भव्यजनकैरवचन्द्रमाः[१] ॥२३९॥**

**अन्वय :-** भव्यजनकैरवचन्द्रमाः मुनिपञ्चशतीवृतः भगवान् वज्रस्वामी अपि महीं विजहार ।

**समास :-** (१) वज्रस्वामी – पूर्ववत् ।

(२) मुनिपञ्चशतीवृतः – (A) पञ्चानां शतानां समाहारः इति पञ्चशती । (द्विगु.क.)

(B) मुनीनां पञ्चशती इति मुनिपञ्चशती । (ष.त.पु.)

(C) मुनिपञ्चशत्या वृतः इति मुनिपञ्चशतीवृतः । (तृ.त.पु.)

(३) भव्यजनकैरवचन्द्रमाः – (A) भव्याश्च ते जनाश्च इति भव्यजनाः । (वि.पू.क.)

(B) भव्यजनाः एव कैरवाः इति भव्यजनकैरवाः । (अव.पू.क.)

(C) भव्यजनकैरवान् उल्लासयतीति भव्यजनकैरवोल्लासी । (उप.त.पु.)

(D) भव्यजनकैरवोल्लासी चासौ चन्द्रमाश्च इति भव्यजनकैरवचन्द्रमाः । (म.प.लो.क.)

**पुनानः क्ष्मां विहारेण, वज्रस्वामी महामुनिः ।**
**यत्र यत्र ययौ तत्र, तत्र ख्यातिरभूदियम् ॥२४०॥**

**अन्वय :-** विहारेण क्ष्मां पुनानः महामुनिः वज्रस्वामी यत्र यत्र ययौ तत्र तत्र इयं ख्यातिः अभूत् ।

**समास :-** (१) वज्रस्वामी - पूर्ववत् ।
(२) महामुनिः - पूर्ववत् ।

**अहो ! अस्योज्ज्वलं शीलमहो ! लोकोत्तरं श्रुतम् ।**
**अहो ! सौभाग्यमनघमहो ! लवणिमाऽद्भुतः ॥२४१॥**

**अन्वय :-** अहो ! अस्य उज्ज्वलं शीलम् अहो ! लोकोत्तरं श्रुतम् अहो ! अनघं सौभाग्यम् अहो ! अद्भुतः लवणिमा ।

**समास :-** (१) लोकोत्तरम् - लोकात् उत्तरम् इति लोकोत्तरम् । (पं.त.पु.)
(२) सौभाग्यम् - पूर्ववत् ।
(३) अनघम् - नास्ति अघः यस्मिन् तद् इति अनघम् । (नञ्.ब.व्री.)

**इतश्च पाटलीपुत्रे, धनो नाम महाधनः ।**
**श्रेष्ठी गुणगणश्रेष्ठो, बभूव भुवि विश्रुतः ॥२४२॥**

**अन्वय :-** इतः च पाटलीपुत्रे भुवि विश्रुतः गुणगणश्रेष्ठः महाधनः धनः नाम श्रेष्ठी बभूव ।

**समास :-** (१) महाधनः - महत् धनं यस्य सः इति महाधनः । (समा.ब.व्री.)

(२) गुणगणश्रेष्ठः - (A) गुणानां गणाः इति गुणगणाः । (ष.त.पु.)

(B) गुणगणैः श्रेष्ठः इति गुणगणश्रेष्ठः । (तृ.त.पु.)

**कन्या सुरूपा तस्याभूदभिधानेन रुक्मिणी ।**
**रुक्मिणीव पुनरपि, रूपान्तरमुपेयुषी ॥२४३॥**

**अन्वय :-** तस्य पुनः अपि रूपान्तरम् उपेयुषी रुक्मिणी इव अभिधानेन रुक्मिणी सुरूपा कन्या अभूद् ।

**समास :-** (१) सुरूपा-शोभनं रूपं यस्याः सा इति सुरूपा । (अव्य.ब.व्री.)

(२) रूपान्तरम् - अन्यद् रूपम् इति रूपान्तरम्, तद् रूपान्तरम् । (मयूर.कर्म)

**तस्य च श्रेष्ठिनो यानशालायाममलाशयाः ।**
**व्रतिन्यो निवसन्ति स्म, श्रीवज्रस्य महामुनेः ॥२४४॥**

**अन्वय :-** तस्य च श्रेष्ठिनः यानशालायां श्रीवज्रस्य महामुनेः अमलाशयाः व्रतिन्यः निवसन्ति स्म ।

**समास :-** (१) यानशालायाम् - यानाय शाला इति यानशाला, तस्यां यानशालायाम् । (च.त.पु.)

(२) अमलाशयाः - (A) अमलः - पूर्ववत् ।

(B) अमलः आशयः यासां ताः इति अमलाशयाः । (समा.ब.व्री.)

(३) श्रीवज्रस्य - (A) श्रिया युक्तः इति श्रीयुक्तः । (तृ.त.पु.)

(B) श्रीयुक्तः वज्रः इति श्रीवज्रः, तस्य श्रीवज्रस्य।
(म.प.लो.क.)

(४) महामुनेः - महामुनिः-पूर्ववत्, तस्य महामुनेः।

**व्रतिन्यस्तास्तु वज्रस्य, चक्रिरे गुणसंस्तवम्।**
**स्वाध्यायावश्यकसमो, गुरूणां हि गुणस्तवः॥२४५॥**

**अन्वय :-** ताः तु व्रतिन्यः वज्रस्य गुणसंस्तवं चक्रिरे गुरूणां ही गुणस्तवः स्वाध्यायावश्यकसमः (अस्ति)।

**समास :-** (१) गुणसंस्तवम् - गुणानां संस्तवः इति गुणसंस्तवः, तं गुणसंस्तवम्। (ष.त.पु.)

(२) स्वाध्यायावश्यकसमः -(A) स्वाध्यायः -पूर्ववत्। स्वाध्यायश्च आवश्यकानि च इति स्वाध्यायावश्यकानि। (इ.द्व.)

(B) स्वाध्यायावश्यकैः समः इति स्वाध्यायावश्यकसमः। (तृ.त.पु.)

(३) गुणस्तवः - गुणानां स्तवः इति गुणस्तवः। (ष.त.पु.)

**तां तां वज्रस्य सौभाग्यकथामाकर्ण्य रुक्मिणी।**
**वज्रमेव पतीयन्ती, प्रत्यज्ञासीदिदं च सा॥२४६॥**

**अन्वय :-** वज्रस्य तां तां सौभाग्यकथाम् आकर्ण्य वज्रम् एव पतीयन्ती सा च रुक्मिणी इदं प्रत्यज्ञासीद्।

**समास :-** (१) सौभाग्यकथाम् - (A) सौभाग्यम्-पूर्ववत्।

(B) सौभाग्यस्य कथा इति सौभाग्यकथा, तां सौभाग्यकथाम्। (ष.त.पु.)

(२) पतीयन्ती - पतिम् इच्छन्ती इति पतीयन्ती। (नामधातु) ("अमाव्ययात् क्यन् च" ३/४/२३ क्यन् + अत् (शतृ) + ई (ङी.))

**वज्र[४]: स्या[५]द्यदि[१] मे[२] भर्ता[३], भोक्ष्ये[९] भोगा[८]नहं[७] तदा[६] ।**
**अन्यथा[१०] तु[११] कृतं[१३] भोगैः[१२], किं[१७] भोगै[१६]र्दयितं[१४] विना[१५] ॥२४७॥**

**अन्वय :-** यदि मे भर्ता वज्रः स्याद् तदा अहं भोगान् भोक्ष्ये अन्यथा तु भोगैः कृतं दयितं विना भोगैः किम्।

दयितम्-प्रियपतिम्।

**तस्या[३] वरयितार[४]श्च[७], ये[१] केचि[२]दुपतस्थिरे[५] ।**
**सा[६] प्रत्यषे[११]धत्तान्[९] सर्वान्[१०], मुखमोटनलीलया[८] ॥२४८॥**

**अन्वय :-** ये केचित् तस्याः वरयितारः उपतस्थिरे सा च मुखमोटनलीलया तान् सर्वान् प्रत्यषेधत्।

**समास :-** (१) मुखमोटनलीलया - (A) मुखस्य मोटनम् इति मुखमोटनम्। (ष.त.पु.)

(B) मुखमोटनस्य लीला इति मुखमोटनलीला, तया मुखमोटनलीलया। (ष.त.पु.)

**प्रव्रजिता[१]श्च[२] तां[३] प्रोचु[४]रयि[५] ! मुग्धा[७]ऽसि[८] रुक्मिणि[६] ! ।**
**वीतरागं[१०] प्रव्रजितम्[११], यद्[९]वज्रं[१३] तं[१२] वुवूर्षसि[१४] ॥२४९॥**

**अन्वय :-** प्रव्रजिताः च तां प्रोचुः अयि ! रुक्मिणि ! मुग्धा असि यद् वीतरागं प्रव्रजितं तं वज्रं वुवूर्षसि।

**समास :-** (१) वीतरागम् – वीतः रागः यस्मात् सः इति वीतरागः, तं वीतरागम् । (समा.ब.व्री.)

**रुक्मिण्यभिदधे वज्रो, यदि प्रव्रजितस्तदा ।**
**प्रव्रजिष्याम्यहमपि, या गतिस्तस्य सैव मे ॥२५०॥**

**अन्वय :-** रुक्मिणी अभिदधे यदि वज्रः प्रव्रजितः तदा अहम् अपि प्रव्रजिष्यामि या तस्य गतिः सा एव मे (गतिः) ।

**इतश्च भगवान् वज्रः, पाटलीपुत्रपत्तने ।**
**विहारेण ययौ धर्मदेशनावारिवारिदः ॥२५१॥**

**अन्वय :-** इतः च धर्मदेशनावारिवारिदः भगवान् वज्रः विहारेण पाटलीपुत्रपत्तने ययौ ।

**समास :-** (१) पाटलीपुत्रपत्तने – (A) पाटलीपुत्रः नाम यस्य तद् इति पाटलीपुत्रनाम । (समा.ब.व्री.)

(B) पाटलीपुत्रनाम पत्तनम् इति पाटलीपुत्रपत्तनम्, तस्मिन् पाटलीपुत्रपत्तने । (म.प.लो.क.)

(२) धर्मदेशनावारिवारिदः – (A) धर्मस्य देशना इति धर्मदेशना । (ष.त.पु.)

(B) धर्मदेशना एव वारि इति धर्मदेशनावारि । (अव.पू.क.)

(C) वारि ददाति इति वारिदः । (उप.त.पु.)

(D) धर्मदेशनावारि वर्षतीति धर्मदेशनावारि-वर्षकः । (उप.त.पु.)

(E) धर्मदेशनावारिवर्षकः वारिदः इति धर्मदेशना-वारिवारिदः । (म.प.लो.क.)

**श्रुत्वा च वज्रमायान्तम्, पाटलीपुत्रपार्थिवः ।**
**तत्कालं सपरीवारोऽभ्यगादृद्ध्या गरिष्ठया ॥२५२॥**

**अन्वय :-** आयान्तं च वज्रं श्रुत्वा सपरीवारः पाटलीपुत्रपार्थिवः गरिष्ठया ऋद्ध्या तत्कालम् अभ्यगाद् ।

**समास :-** (१) पाटलीपुत्रपार्थिवः - पाटलीपुत्रस्य पार्थिवः इति पाटलीपुत्रपार्थिवः । (ष.त.पु.)

(२) सपरीवारः - पूर्ववत् ।

**इतश्चेतश्च वज्रर्षेर्वृन्दीभूतान् महामुनीन् ।**
**ददर्शाऽऽगच्छतो राजा, राजमानांस्तपःश्रिया ॥२५३॥**

**अन्वय :-** राजा इतः च इतः च वज्रर्षेः तपःश्रिया राजमानान् वृन्दीभूतान् आगच्छतः महामुनीन् ददर्श ।

**समास :-** (१) वज्रर्षेः - पूर्ववत् ।

(२) वृन्दीभूतान् - (A) न वृन्दम् इति अवृन्दम् । (नञ्.त.पु.)

(B) अवृन्दं वृन्दम् इव भूताः इति वृन्दीभूताः, तान् वृन्दीभूतान् । (गति.त.पु.)

(३) महामुनीन् - महामुनयः-पूर्ववत्, तान् महामुनीन् ।

(४) तपःश्रिया - तपः एव श्रीः इति तपःश्रीः, तया तपःश्रिया । (अव.पू.क.)

**दृष्ट्वा तांस्तु निदध्यौ च, सर्वेऽमी द्युतिशालिनः ।**
**सर्वेऽपि मधुराकाराः, सर्वेऽपि विकसन्मुखाः ॥२५४॥**

सर्वे[१६] प्रियंवदाः[१७] सर्वे,[१८] करुणारससागराः[१९] ।
सर्वेऽ[२०]पि[२१] समताभाजः[२२], सर्वेऽ[२३]पि[२४] ममतोज्झिताः[२५] ॥२५५॥
को[३४] नाम[२६] वज्रस्वामी[३२]ति[३५], न[३६] जानामि[३७] करोमि[३९] किम्[३८] ।
स[४] एव[३३] भगवा[३१]नादौ,[२९] वन्द्यो[३०] गच्छस्य[२७] नायकः[२८] ॥२५६॥

(त्रिभिर्विशेषकम्)

**अन्वय :-** तान् तु दृष्ट्वा स निदध्यौ अमी सर्वे द्युतिशालिनः, सर्वे अपि च मधुराकाराः, सर्वे अपि विकसन्मुखाः, सर्वे प्रियंवदाः, सर्वे करुणारससागराः, सर्वे अपि समताभाजः, सर्वे अपि ममतोज्झिताः (सन्ति) नाम गच्छस्य नायकः, आदौ वन्द्यः भगवान् वज्रस्वामी एव कः इति न जानामि किं करोमि ?

**समास :-** (१) द्युतिशालिनः – द्युतिना शालन्ते इत्येवंशीलाः इति द्युतिशालिनः । (उप.त.पु.)

(२) मधुराकाराः – मधुरः आकारः येषां ते इति मधुराकाराः । (समा.ब.व्री.)

(३) विकसन्मुखाः – विकसद् मुखं येषां ते इति विकसन्मुखाः । (समा.ब.व्री.)

(४) प्रियंवदाः – प्रियं वदन्ति इति प्रियंवदाः । (उप.त.पु.)

(५) करुणारससागराः – (A) करुणा एव रसः इति करुणारसः । (अव.पू.क.)

(B) करुणारसस्य सागराः इति करुणारससागराः ।
(ष.त.पु.)

(६) समताभाजः - समतां भजन्ते इति समताभाजः ।
(उप.त.पु.) । भजो विण् ५।१।१४६ विण् ।

(७) ममतोज्झिताः - ममतया उज्झिताः इति
ममतोज्झिताः । (तृ.त.पु.)

(८) वज्रस्वामी - पूर्ववत् ।

**पप्रच्छ च क्षणं स्थित्वा, भगवन्तो महर्षयः! ।**
**आख्यान्तु वज्रः किमयम्, किमेष किमसाविति ॥२५७॥**

**अन्वय :-** क्षणं स्थित्वा च पप्रच्छ भगवन्तः ! महर्षयः ! किम् अयं (वज्रः) किम् एष (वज्रः) किम् असौ वज्रः इति आख्यान्तु ।

**समास :-** (१) महर्षयः - पूर्ववत् ।

**मुनयः प्रोचिरे राजन्!, वज्रस्यान्तिषदो वयम् ।**
**मा चिन्तय तमस्मासु, क्वार्कः क्व ज्योतिरिङ्गणाः? ॥२५८॥**

**अन्वय :-** मुनयः प्रोचिरे राजन् ! वयं वज्रस्य अन्तिषदः क्व अर्कः क्व ज्योतिरिङ्गणाः अस्मासु तं मा चिन्तय ।
ज्योतिरिङ्गणाः- खद्योताः । "खजूआ" इति लोके ।
खद्योतो ज्योतिरिङ्गणः । इत्यभिधाने । (१२१३)

**समास :-** (१) अन्तिषदः - अन्ति सीदन्ति इति अन्तिषदः ।
(उप.त.पु.)

(२) ज्योतिरिङ्गणाः - ज्योतिः इव इङ्गन्ति इति
ज्योतिरिङ्गणाः । (उप.त.पु.)

**एवं[१] तु[२] मुनिवृन्देषु[४], पृच्छन्[५]सर्वेषु[३] भूपतिः[६] ।**
**वज्रं[११] ददर्श[१२] मोहाद्रिवज्रं[१०] पश्चाद्[८] गणे[७] स्थितम्[९] ॥२५९॥**

**अन्वय :-** एवं तु सर्वेषु मुनिवृन्देषु पृच्छन् भूपतिः गणे पश्चाद् स्थितं मोहाद्रिवज्रं वज्रं ददर्श ।

**समास :-** (१) मुनिवृन्देषु - मुनीनां वृन्दानि इति मुनिवृन्दानि तेषु मुनिवृन्देषु । (ष.त.पु.)

(२) भूपतिः- भुवः पतिः इति भूपतिः । (ष.त.पु.)

(२) मोहाद्रिवज्रम् - (A) मोहः एव अद्रिः इति मोहाद्रिः । (अव.पू.क.)

(B) मोहाद्रिं भिनत्ति इति मोहाद्रिभिद् । (उप.त.पु.)

(C) मोहाद्रिभिद् वज्रः इति मोहाद्रिवज्रः, तं मोहाद्रिवज्रम् । (म.प.लो.क.)

**वज्रभट्टारकम्[७]अथ[१], ववन्दे[८] वसुधाधवः[६] ।**
**किरीटरत्नांशुजलैः[२]स्तत्पादौ[३] स्नपयन्[४]निव[५] ॥२६०॥**

**अन्वय :-** अथ किरीटरत्नांशुजलैः तत्पादौ स्नपयन् इव वसुधाधवः वज्रभट्टारकं ववन्दे ।

**समास :-** (१) वज्रभट्टारकम् - वज्रश्चासौ भट्टारकश्च इति वज्रभट्टारकः, तं वज्रभट्टारकम् । (वि.उत्त.क.)

(२) वसुधाधवः - वसुधायाः धवः इति वसुधाधबः । (ष.त.पु.)

(३) किरीटरत्नांशुजलैः – (A) किरीटस्य रत्नानि इति किरीटरत्नानि । (ष.त.पु.)

(B) किरीटरत्नानाम् अंशवः इति किरीटरत्नांशवः । (ष.त.पु)

(C) किरीटरत्नांशवः एव जलानि इति किरीटरत्नांशुजलानि, तैः किरीटरत्नांशुजलैः । (अव.पू.क.)

(४) तत्पादौ – तस्य पादौ इति तत्पादौ तौ तत्पादौ । (ष.त.पु.)

**सुनन्दासूनुराचार्योऽप्युद्याने समवासरत् ।**
**आश्रित्य सपरीवारस्तरुच्छायाप्रतिश्रयम् ॥२६१॥**

**अन्वय :-** सपरीवारः सुनन्दासूनुः आचार्यः अपि तरुच्छायाप्रतिश्रयम् आश्रित्य उद्याने समवासरत् ।

**समास :-** (१) सुनन्दासूनुः – सुनन्दायाः सूनुः इति सुनन्दासूनुः । (ष.त.पु.)

(२) सपरीवारः – पूर्ववत् ।

(३) तरुच्छायाप्रतिश्रयम् – (A) तरोः छाया इति तरुच्छाया । (ष.त.पु.)

(B) तरुच्छाया एव प्रतिश्रयः इति तरुच्छायाप्रतिश्रयः, तं तरुच्छायाप्रतिश्रयम् । (अव.पू.क.)

**महीनाथोऽपि वज्रर्षेर्निषद्यायां निषेदुषः ।**
**पादावचर्चयद्यक्षकर्दमेन सुगन्धिना ॥२६२॥**

**अन्वय :-** महीनाथः अपि निषद्यायां निषेदुषः वज्रर्षेः पादौ

सुगन्धिना यक्षकर्दमेन अचर्चयत् ।

**समास :-** (१) महीनाथः – मह्याः नाथः इति महीनाथः । (ष.त.पु.)

(२) वज्रर्षे: – पूर्ववत् ।

(३) सुगन्धिना – शोभनः गन्धः यस्मिन् सः इति सुगन्धिः, तेन सुगन्धिना । (अव्य.ब.व्री.)

**ततः[1]श्च[2] भगवान्[3]वज्रः[4], सुधामधुरया[5] गिरा[6] ।**
**चकार[9] देशनां[8] मोहध्वान्तध्वंसैकदीपिकाम्[7] ॥२६३॥**

**अन्वय :-** ततः च भगवान् वज्रः सुधामधुरया गिरा मोहध्वान्तध्वंसैकदीपिकां देशनां चकार ।

**समास :-** (१) सुधामधुरया – सुधा इव मधुरा इति सुधामधुरा, तया सुधामधुरया । (उप.कर्म.)

(२) मोहध्वान्तध्वंसैकदीपिकाम् – (A) मोह एव ध्वान्तम् इति मोहध्वान्तम् । (अव.पू.क.)

(B) मोहध्वान्तस्य ध्वंसः इति मोहध्वान्तध्वंसः । (ष.त.पु.)

(C) एका चासौ दीपिका च इति एकदीपिका । (वि.पू.क.)

(D) मोहध्वान्तध्वंसे एकदीपिका इव इति मोहध्वान्तध्वंसैकदीपिका, तां मोहध्वान्तध्वंसैकदीपिकाम् । (स.त.पु.)

***क्षीरास्रवलब्धिमतः[1], श्रीवज्रस्वामिनः[2]तया[3] ।***
**धर्मदेशनया[4] राजा[5], हृतचित्तोऽ[6]भवत्तराम्[7] ॥२६४॥**

**अन्वय :-** क्षीरास्रवलब्धिमतः श्रीवज्रस्वामिनः तया धर्मदेशनया राजा हृतचित्तः अभवत्तराम् ।

**समास :-** (१) क्षीरास्रवलब्धिमतः (A) क्षीरस्य आस्रवः यस्यां सा इति क्षीरास्रवा । (समा.ब.व्री.)

(B) क्षीरास्रवा चासौ लब्धिश्च इति क्षीरास्रवलब्धिः । (वि.पू.क.)

(C) क्षीरास्रवलब्धिः अस्ति यस्य इति क्षीरास्रव-लब्धिमान्, तस्य क्षीरास्रवलब्धिमतः । (तद्धित)

(२) श्रीवज्रस्वामिनः - पूर्ववत् ।

(३) धर्मदेशनया- धर्मदेशना पूर्ववत्, तया धर्मदेशनया ।

(४) हृतचित्तः - हृतं चित्तं यस्य सः इति हृतचित्तः । (समा.ब.व्री.)

**देशनान्ते[१] मुनिं[२] नत्वा[३], राजा[४] स्वसदनं[५] ययौ[६] ।**
**गत्वा[९] च[८] मध्येशुद्धान्तम्[७], राज्ञीनामि[१०]त्य[११]चीकथत्[१२] ॥२६५॥**

**अन्वय :-** देशनान्ते मुनिं नत्वा राजा स्वसदनं ययौ मध्येशुद्धान्तं च गत्वा राज्ञीनाम् इति अचीकथत् ।

शुद्धान्तः - अन्तःपुरम् । "शुद्धान्तः स्यादन्तःपुरम्, इत्यभिधाने । (७२७)

**समास :-** (१) देशनान्ते - देशनायाः अन्तः इति देशनान्तः, तस्मिन् देशनान्ते । (ष.त.पु.)

(२) स्वसदनम् - स्वस्य सदनम् इति स्वसदनम् तद् स्वसदनम्। (ष.त.पु.)

(३) मध्येशुद्धान्तम् - शुद्धान्तस्य मध्यम् इति मध्ये-शुद्धान्तम्, तद् मध्येशुद्धान्तम्। (अव्य.भा.)

**बाह्योद्याने[५] कृतावासो[६], वज्रस्वा[८]म्ययि[१] ! सुभ्रुवः[२] ! ।**
**मया[४]ऽद्य[३] वन्दितो[९] धर्मदेशनाक्षीरसागरः[७] ॥२६६॥**

**अन्वय :-** अयि सुभ्रुवः ! अद्य मया बाह्योद्याने कृतावासः धर्म-देशनाक्षीरसागरः वज्रस्वामी वन्दितः ।

**समास :-** (१) बाह्योद्याने - (A) बहिर्भवम् इति बाह्यम्। (तद्धित)

(B) बाह्यञ्च तद् उद्यानं च इति बाह्योद्यानम्, तस्मिन् बाह्योद्याने। (वि.पू.क.)

(२) कृतावासः - कृतः आवासः येन सः इति कृतावासः। (समा.ब.व्री.)

(३) वज्रस्वामी - पूर्ववत्।

(४) सुभ्रुवः - सुष्ठु भ्रुवौ यासां ताः इति सुभ्रुवः, तत्सम्बोधनं सुभ्रुवः !। (सु.पू.क.)

(५) धर्मदेशनाक्षीरसागरः -(A) धर्मदेशना - पूर्ववत्।

(B) धर्मदेशना एव क्षीरम् इति धर्मदेशनाक्षीरम्। (अव.पू.क.)

(C) धर्मदेशनाक्षीरस्य सागरः इति धर्मदेशनाक्षीर-सागरः। (ष.त.पु.)

**तं[१] वन्दित्वा[७] च[२] दृष्ट्वा[३] च[८], तद्धर्मं[९] तु[१०] निशम्य[११] च[१४] ।**
**मम[४] गात्रं[८] च[१२] नेत्रे[५] च[६], श्रोत्रे[१३] चागुः[१६,१७] कृतार्थताम्[१५] ॥२६७॥**

**अन्वय :-** तं च दृष्ट्वा मम नेत्रे च वन्दित्वा च गात्रं च तद्धर्मं तु निशम्य श्रोत्रे च कृतार्थताम् अगुः ।

**समास :-** (१) तद्धर्मम् - (A) तेन उक्तः इति तदुक्तः । (तृ.त.पु.)
(B) तदुक्तः धर्मः इति तद्धर्मः, तं तद्धर्मम् ।
(म.प.लो.क.)

(२) कृतार्थताम् - (A) कृतः अर्थः येन सः इति कृतार्थः । (समा.ब.व्री.)
(B) कृतार्थस्य भावः इति कृतार्थता, तां कृतार्थताम् । (तद्धित)

**इदमेव[२,३] दिनं[४] मन्ये[६], दिनत्वेन[५] सुलोचनाः[१]! ।**
**अभवद्यत्र[११,७] वज्रर्षेर्ज्ञानादित्यस्य[९,८] दर्शनम्[१०] ॥२६८॥**

**अन्वय :-** सुलोचनाः ! इदम् एव दिनं दिनत्वेन मन्ये यत्र ज्ञानादित्यस्य वज्रर्षेः दर्शनम् अभवत् ।

**समास :-** (१) सुलोचनाः ! - शोभने लोचने यासां ताः इति सुलोचनाः, तत्संबोधनं सुलोचनाः! ।
(अव्य.ब.व्री.)

(२) वज्रर्षेः - पूर्ववत् ।

(३) ज्ञानादित्यस्य - ज्ञानम् एव आदित्यः इति ज्ञानादित्यः, तस्य ज्ञानादित्यस्य । (अव.पू.क.)

**एतावताऽपि धन्योऽस्मि, दृष्टो वज्रमुनिर्मया ।**
**किं पुनस्तन्मुखाद्धर्ममश्रौषमहमार्हतम् ॥२६९॥**

**अन्वय :-** मया वज्रमुनिः दृष्टः एतावता अपि धन्यः अस्मि किम् पुनः अहं तन्मुखाद् आर्हतं धर्मम् अश्रौषम् ।

**समास :-** (१) वज्रमुनिः - (A) वज्रः नाम यस्य सः इति वज्रनामा । (समा.ब.व्री.)
(B) वज्रनामा मुनिः इति वज्रमुनिः । (म.प.लो.क.)
(२) तन्मुखाद् - तस्य मुखम् इति तन्मुखम्, तस्मात् तन्मुखात् । (ष.त.पु.)
(३) आर्हतम् - अर्हता उक्तः इति आर्हतः, तम् आर्हतम् । (तद्धित)

**हे देव्यस्तद्यूयमपि, वज्रर्षिं द्रष्टुमर्हथ ।**
**त्वरितं यात ऋषयो, नैकत्रस्थाः समीरवत् ॥२७०॥**

**अन्वय :-** हे देव्यः ! यूयम् अपि वज्रर्षिं द्रष्टुम् अर्हथ समीरवत् ऋषयः एकत्रस्थाः न तद् त्वरितं यात ।

**समास :-** (१) वज्रर्षिम् - वज्रर्षिः - पूर्ववत्, तम् वज्रर्षिम् ।
(२) एकत्रस्थाः - (A) एकस्मिन् स्थाने इति एकत्र । (तद्धित)
(B) एकत्र तिष्ठन्तीति एकत्रस्थाः । (उप.त.पु.)
(३) समीरवत् - समीरः इव इति समीरवत् । (तद्धित)

**राज्ञ्यः प्रोचुः स्वयमपि, तं विवन्दिषवो वयम् ।**
**त्वदाऽऽज्ञाऽप्यत्र यदभूत्तत्प्राप्तौ तृषितैः सरित् ॥२७१॥**

**अन्वय :-** राज्ञ्यः प्रोचुः वयम् अपि स्वयं तं विवन्दिषवः यद्
अत्र त्वदाज्ञा अपि अभूत् तद् तृषितैः सरित् प्राप्ता ।

**समास :-** (१) वन्दितुम् इच्छवः इति विवन्दिषवः । (सन्+उ)
(२) त्वदाज्ञा - तव आज्ञा इति त्वदाज्ञा । (ष.त.पु.)

**ततश्चानुज्ञया राज्ञो, राज्ञ्यो वज्रविभूषितम् ।**
**याप्ययानाधिरूढास्तास्तदुद्यानवरं ययुः ॥२७२॥**

**अन्वय :-** ततः च राज्ञः अनुज्ञया याप्ययानाधिरूढाः ताः राज्ञ्यः
वज्रविभूषितं तद् उद्यानवरं ययुः ।
याप्ययानम् - सुखासनम् ।

**समास :-** (१) वज्रविभूषितम् - वज्रेण विभूषितम् इति
वज्रविभूषितम्, तद् वज्रविभूषितम् । (तृ.त.पु.)
(२) याप्ययानाधिरूढाः - (A) याप्यस्य (अशक्तस्य)
यानम् इति याप्ययानम् । (ष.त.पु.)
(B) याप्ययाने अधिरूढाः इति याप्ययानाधिरूढाः ।
(स.त.पु.)
(३) उद्यानवरम् - उद्यानं च तद् वरं च इति उद्यानवरम्,
तद् उद्यानवरम् । (वि.उत्त.क.)

**वज्रमागतमाकर्ण्य, रुक्मिण्यपि जनोक्तिभिः ।**
**तमेव चिन्तयन्त्यस्थादात्मानमिव योगिनी ॥२७३॥**

**अन्वय :-** जनोक्तिभिः आगतं वज्रम् आकर्ण्य तम् एव आत्मानं
चिन्तयन्ती रुक्मिणी अपि योगिनी इव अस्थाद् ।

**समास :-** (१) जनोक्तिभिः - जनानाम् उक्तयः इति जनोक्तयः, ताभिः जनोक्तिभिः । (ष.त.पु.)

**द्वितीये वासरे रुक्मिण्युवाच पितरं निजम् ।**
**वज्रस्वाम्यागतोऽस्तीह, यं वुवूर्षाम्यहं सदा ॥२७४॥**

**अन्वय :-** रुक्मिणी द्वितीये वासरे निजं पितरम् उवाच अहं सदा यं वुवूर्षामि (सः) वज्रस्वामी इह आगतः अस्ति ।

**समास :-** (१) वज्रस्वामी - पूर्ववत् ।

**तन्मां वज्रकुमाराय, सम्प्रदत्तान्यथा तु मे ।**
**मरणं शरणं तात !, ग्राव्णि रेखेव गीरियम् ॥२७५॥**

**अन्वय :-** तात ! तद् मां वज्रकुमाराय सम्प्रदत्त अन्यथा तु मे मरणं शरणं ग्राव्णि रेखा इव इयम् गीः ।

**समास :-** (१) वज्रकुमाराय - वज्रश्चासौ कुमारश्च इति वज्रकुमारः, तस्मै वज्रकुमाराय । (वि.उत्त.क.)

**आभिजात्यसखीं लज्जाम्, विहायैवं ब्रवीमि यत् ।**
**तत्रेदं कारणं वज्रो, मत्पुण्यैरयमागतः ॥२७६॥**

**अन्वय :-** आभिजात्यसखीं लज्जां विहाय एवं ब्रवीमि तत्र इदं कारणं यत् मत्पुण्यैः अयं वज्रः आगतः ।

आभिजात्यसखीम् - उत्तमकुलजातसखीम् ।

**समास :-** (१) आभिजात्यसखीम् - (A) अभिमतं (प्रशस्तं) जातं (जन्म) यस्य तद् इति अभिजातम् । (प्रादि.ब.व्री.)

*(B) अभिजातस्य भावः इति आभिजात्यम् ।* (तद्धित)

(C) आभिजात्यस्य सखी इति आभिजात्यसखी, ताम् आभिजात्यसखीम् । (ष.त.पु.)

(२) मत्पुण्यैः - मम पुण्यानि इति मत्पुण्यानि, तैः मत्पुण्यैः । (ष.त.पु.)

**एष प्रायेण न स्थास्नुर्यद्यद्यैवेह गच्छति ।**
**किं ज्ञायते कदाऽप्येति भूयोऽप्युड्डीनपक्षिवत् ॥२७७॥**

**अन्वय :-** प्रायेण एष न स्थास्नुः यदि अद्य एव गच्छति भूयः अपि कदा अपि उड्डीनपक्षिवत् इह एति किं ज्ञायते ।

**समास :-** (१) स्थास्नुः-तिष्ठति इत्येवंशीलः इति स्थास्नुः । (उप.त.पु.)

(२) उड्डीनपक्षिवत्- (A) उड्डीनश्चासौ पक्षी च इति उड्डीनपक्षी । (वि.पू.क.)

(B) उड्डीनपक्षी इव इति उड्डीनपक्षिवत् । (तद्धित)

**तस्मादलं विलम्बेन, देहि वज्राय तात ! माम् ।**
**चिरकौमारदीनां माम्, पश्यन्किं न हि दूयसे ॥२७८॥**

**अन्वय :-** तात ! तस्माद् विलम्बेन अलं मां वज्राय देहि हि चिरकौमारदीनां मां पश्यन् किं न दूयसे ।

**समास :-** (१) चिरकौमारदीनाम् - (A) कुमार्याः भावः इति कौमारम् । (तद्धित)

(B) चिरात् कौमारम् इति चिरकौमारम् । (प्रा. कर्म.)

(C) चिरकौमारेण दीना इति चिरकौमारदीना, तां चिरकौमारदीनाम् । (तृ.त.पु.)

**एवं धनोऽतिनिर्बन्धादुपवज्रं निनाय ताम् ।**
**सद्यः कृत्वा विवाहार्हसर्वालङ्कारभूषिताम् ॥२७९॥**

**अन्वय :-** एवं धनः अतिनिर्बन्धात् सद्यः तां विवाहार्हसर्वालङ्कार-भूषितां कृत्वा उपवज्रं निनाय ।

**समास :-** (१) अतिनिर्बन्धात् – अतिशयेन निर्बन्धः इति अति-निर्बन्धः, तस्मात् अतिनिर्बन्धात् । (प्रा.कर्म.)

(२) उपवज्रम् – वज्रस्य समीपे इति उपवज्रम्, तद् उपवज्रम् । (अव्य.भा.)

(३) विवाहार्हसर्वालङ्कारभूषिताम् – (A) विवाहमर्हन्ति इति विवाहार्हाः । (उप.त.पु.)

(B) सर्वे च ते अलङ्काराश्च इति सर्वालङ्काराः । (वि.पू.क.)

(C) विवाहार्हाश्च ते सर्वालङ्काराश्च इति विवाहार्हस-र्वालङ्काराः । (वि.पू.क.)

(D) विवाहार्हसर्वालङ्कारैः भूषिता इति विवाहार्ह-सर्वालङ्कारभूषिता, तां विवाहार्हसर्वालङ्कार-भूषिताम् । (तृ.त.पु.)

**पुत्र्या सममनैषीच्च, धनकोटीरनेकशः ।**
**प्रलोभनं वरयितुर्यथा स्यादिति जातधीः ॥२८०॥**

**अन्वय :-** यथा वरयितुः प्रलोभनं स्याद् इति जातधीः पुत्र्या समम् अनेकशः च धनकोटीः अनैषीद् ।

**समास :-** (१) धनकोटीः– धनानां कोट्यः इति धनकोट्यः, ताः धनकोटीः । (ष.त.पु.)

(२) जातधीः- जाता धीः यस्य सः इति जातधीः ।
(समा.ब.व्री.)

**तदहाद्[1] ह्यस्तने[2] चा[3]ह्नि[4], वज्रे[5] कुर्वति[7] देशनाम्[6] ।**
**भक्तिमान्[8]नागरो[9] लोकः[10], परस्परम[11]दो[12]ऽवदत्[13] ॥२८१॥**

**अन्वय :-** तदहात् ह्यस्तने च अह्नि वज्रे देशनां कुर्वति भक्तिमान् नागरः लोकः परस्परम् अदः अवदत् ।

**समास :-** (१) तदहात् - तच्च तद् अहश्च इति तदहम्, तस्मात् तदहात् । (वि.पू.क.)

(२) ह्यस्तने - ह्यः भवः इति ह्यस्तनः, तस्मिन् ह्यस्तने । (तद्धित)

**अहो[1]! वज्रस्य[2] सौस्वर्यम्[3], यदीयां[4] धर्मदेशनाम्[5] ।**
**आकर्ण्या[6]ऽनन्दमग्नानाम्[7], मुक्त्यव[8]स्थेव[9] जायते[10] ॥२८२॥**

**अन्वय :-** अहो ! वज्रस्य सौस्वर्यं यदीयां धर्मदेशनाम् आकर्ण्य आनन्दमग्नानां मुक्त्यवस्था इव जायते ।

**समास :-** (१) सौस्वर्यम् - (A) शोभनः स्वरः इति सुस्वरः । (सु.पू.क.)

(B) सुस्वरस्य भावः इति सौस्वर्यम् । (तद्धित)

(२) यदीयाम् - यस्य इयम् इति यदीया, तां यदीयाम् । (तद्धित)

(३) धर्मदेशनाम् - पूर्ववत् ।

(४) आनन्दमग्नानाम् – आनन्दे मग्नाः इति आनन्दमग्नाः, तेषाम् – आनन्दमग्नानाम् । (स.त.पु.)

(५) मुक्त्यवस्था – मुक्तेः अवस्था इति मुक्त्यवस्था । (ष.त.पु.)

**श्रीवज्रस्वामिनः[2] सर्वगुणरत्नमहोदधेः[1] ।**
**गुणानुरूपं[4] चे[3]द्रूपम्[5], भवे[6]दुच्यते[9] तर्हि[7] किम्[8] ? ॥२८३॥**

**अन्वय :-** सर्वगुणरत्नमहोदधेः श्रीवज्रस्वामिनः चेत् गुणानुरूपं रूपं भवेद् तर्हि किम् उच्यते ।

**समास :-** (१) श्रीवज्रस्वामिनः – पूर्ववत् ।

(२) सर्वगुणरत्नमहोदधेः – (A) सर्वे च ते गुणाश्च इति सर्वगुणाः । (वि.पू.क.)

(B) सर्वगुणाः एव रत्नानि इति सर्वगुणरत्नानि । (अव.पू.क.)

(C) महांश्चासौ उदधिश्च इति महोदधिः । (वि.पू.क.)

(D) सर्वगुणरत्नानां महोदधिः इति सर्वगुणरत्न-महोदधिः । (ष.त.पु.)

(३) गुणानुरूपम् – (A) रूपस्य योग्यम् इति अनुरूपम् । (अव्य.भा.)

(B) गुणानाम् अनुरूपम् इति गुणानुरूपम् । (ष.त.पु.)

**वज्रर्षिणा[3] च[2] नगरप्रवेशे[1] रूप[7]मात्मनः[6] ।**
**शक्त्या[5] संक्षिप्त[8]मेवा[9]सीत् पु[10]रक्षोभाभिशङ्कया[4] ॥२८४॥**

**अन्वय :-** नगरप्रवेशे च वज्रर्षिणा पुरक्षोभाभिशङ्कया शक्त्या आत्मनः रूपं संक्षिप्तम् एव आसीत् ।

**समास :-** (१) वज्रर्षिणा –वज्रर्षिः – पूर्ववत्, तेन वज्रर्षिणा ।

(२) नगरप्रवेशे – नगरस्य प्रवेशः इति नगरप्रवेशः, तस्मिन् नगरप्रवेशे । (ष.त.पु.)

(३) पुरक्षोभाभिशङ्कया – (A) पुरस्य क्षोभः इति पुर-क्षोभः । (ष.त.पु.)

(B) पुरक्षोभस्य अभिशङ्का इति पुरक्षोभाभिशङ्का, तया पुरक्षोभाभिशङ्कया । (ष.त.पु.)

**तदा[१] च[२] भगवान्[३]वज्र[४]स्तेषां[७] भावं[९] मनोगतम्[८] ।**
**संलापं[१०] च[११] ज्ञानबलेना[६]ज्ञासी[१२]दतिशायिना[५] ॥२८५॥**

**अन्वय :-** तदा च भगवान् वज्रः अतिशायिना ज्ञानबलेन तेषां मनोगतं भावं संलापं च अज्ञासीद् ।

**समास :-** (१) मनोगतम् – मनसि गतः इति मनोगतः, तं मनोगतम् । (स.त.पु.)

(२) ज्ञानबलेन – ज्ञानस्य बलम् इति ज्ञानबलम्, तेन ज्ञानबलेन । (ष.त.पु.)

(३) अतिशायिना – अतिशेते इत्येवंशीलम् इति अतिशायि, तेन अतिशायिना । (उप.त.पु.)

**द्वितीये[१]ऽह्नि[३] च[२] वज्रेण[५], विचक्रे[९]ऽनेकलब्धिना[४] ।**
**सहस्त्रपत्रं[७] कमलम्[८], कमलाविष्टरोपमम्[६] ॥२८६॥**

**अन्वय :-** द्वितीये च अह्नि अनेकलब्धिना वज्रेण कमलाविष्टरोपमं सहस्रपत्रं कमलं विचक्रे ।

**समास :-** (१) अनेकलब्धिना - (A) न एकाः इति अनेकाः । (नञ्.त.पु.)

(B) अनेकाः लब्धयः यस्य सः इति अनेकलब्धिः, तेन अनेकलब्धिना । (समा.ब.व्री.)

(२) सहस्रपत्रम् - सहस्रं पत्राणि यस्य तद् इति सहस्रपत्रम्, तद् सहस्रपत्रम् । (संख्या.ब.व्री.)

(३) कमलाविष्टरोपमम् - (A) कमलायाः विष्टरम् इति कमलाविष्टरम् । (ष.त.पु.)

(B) कमलाविष्टरस्य उपमा यस्य तद् इति कमला-विष्टरोपमम्, तद् कमलाविष्टरोपमम् । (व्यधि.ब.व्री.)

**कृत्वा[१०] स्वाभाविकं[७] रूप[९]मद्भुतं[८] तस्य[१] [२]चोपरि[३] ।**
**निषीदति[११] स्म[१२] भगवान्[५], वज्रो[६] राजमरालवत्[४] ॥२८७॥**

**अन्वय :-** तस्य च उपरि राजमरालवत् भगवान् वज्रः स्वाभाविकं अद्भुतं रूपं कृत्वा निषीदति स्म ।

**समास :-** (१) स्वाभाविकम्-स्वभावाद् आगतम् इति स्वाभाविकम्, तद् स्वाभाविकम् । (तद्धित)

(२) राजमरालवत् - (A) मरालानां राजा इति राजमरालः । (ष.त.पु.)

(B) राजमराल इव इति राजमरालवत् । (तद्धित)

**वज्ररूपं[६] जनो[४] दृष्ट्वा[७], जितामरकुमारकम्[५] ।**
**शिरांसि[८] दुधुवे[९] गीताभ्यासं[१] विरचयन्[२]निव[३] ॥२८८॥**

**अन्वय :-** गीताभ्यासं विरचयन् इव जनः जितामरकुमारकं वज्ररूपं दृष्ट्वा शिरांसि दुधुवे ।

**समास :-** (१) वज्ररूपम् - वज्रस्य रूपम् इति वज्ररूपम्, तद् वज्ररूपम् । (ष.त.पु.)

(२) जितामरकुमारकम् - (A) अमराः कुमाराः इव इति अमरकुमाराः । (उप.उत्त.क.)

(B) जिताः अमरकुमाराः येन तद् इति जितामर-कुमारकम्, तद् जितामरकुमारकम् । (समा.ब.व्री.)

(३) गीताभ्यासम्-गीतानाम् अभ्यासः इति गीताभ्यासः, तं गीताभ्यासम् । (ष.त.पु.)

**ऊचे च लोको वज्रस्य, रूपं नैसर्गिकं ह्यदः ।**
**गुणानामाकृतेश्चाद्य, सदृशोऽभूत्समागमः ॥२८९॥**

**अन्वय :-** लोकः च ऊचे हि अद्य वज्रस्य अदः नैसर्गिकं रूपं गुणानाम् आकृतेः च सदृशः समागमः अभूत् ।

**समास :-** (१) नैसर्गिकम् - निसर्गाद् भवम् इति नैसर्गिकम् । (तद्धित)

(२) सदृशः-समानः इव दृश्यते इति सदृशः । (उप.त.पु.)

**मा भूवं प्रार्थनीयोऽहम्, लोकस्येति हि शङ्कया ।**
**सामान्यं ह्यस्तनं रूपम्, नूनं शक्त्यैष निर्ममे ॥२९०॥**

**अन्वय :-** हि अहं लोकस्य प्रार्थनीयः मा भूवम् इति शङ्कया एष शक्त्या नूनं ह्यस्तनं सामान्यं रूपं निर्ममे ।

**समास :-** (१) ह्यस्तनम् - पूर्ववत् ।

(२) सामान्यम् -समानस्य भावः इति सामान्यम्, तद् सामान्यम् । (तद्धित)

**राजोऽपि व्याजहारैवम्, विस्मयस्मेरमानसः ।**
**यथेष्टरूपनिर्माणलब्धिर्वज्रमुनिः खलु ॥२११॥**

**अन्वय :-** खलु विस्मयस्मेरमानसः राजा एवं व्याजहार वज्रमुनिः यथेष्टरूपनिर्माणलब्धिः अपि (अस्ति) ।

**समास :-** (१) विस्मयस्मेरमानसः - (A) स्मेरं च तद् मानसं च इति स्मेरमानसम् । (वि.पू.क.)

(B) विस्मयेन स्मेरमानसं यस्य सः इति विस्मयस्मेरमानसः (व्यधि.ब.व्री.)

(२) यथेष्टरूपनिर्माणलब्धिः - (A) इष्टम् अनतिक्रम्य इति यथेष्टम् । (अव्य.भा.)

(B) यथेष्टं च तद् रूपं च इति यथेष्टरूपम् । (वि.पू.क.)

(C) यथेष्टरूपस्य निर्माणम् इति यथेष्टरूपनिर्माणम् । (ष.त.पु.)

(D) यथेष्टरूपनिर्माणस्य लब्धिः यस्य सः इति यथेष्टरूपनिर्माणलब्धिः । (व्यधि.ब.व्री.)

(३) वज्रमुनिः - पूर्ववत् ।

**धनश्रेष्ठ्यपि तद्वज्रस्वामिरूपं निरूपयन् ।**
**स्वां पुत्रीं वर्णयामास, साग्रहां तत्स्वयंवरे ॥२१२॥**

**अन्वय :-** तद् वज्रस्वामिरूपं निरूपयन् धनश्रेष्ठी अपि तत्स्वयंवरे साग्रहां स्वां पुत्रीं वर्णयामास ।

**समास :-** (१) धनश्रेष्ठी - (A) धनः नाम यस्य सः इति धननामा । (समा.ब.व्री.)

(B) धननामा श्रेष्ठी इति धनश्रेष्ठी । (म.प.लो.क.)

(२) वज्रस्वामिरूपम्–वज्रस्वामी–पूर्ववत्, वज्रस्वामिनः रूपम् इति वज्रस्वामिरूपम्, तद् वज्रस्वामिरूपम् । (ष.त.पु.)

(३) साग्रहाम् – आग्रहेण सह वर्तते या सा इति साग्रहा, तां साग्रहाम् । (सह.ब.व्री.)

(४) तत्स्वयंवरे–(A) स्वयं व्रियतेऽस्मिन् इति स्वयंवरः । (उप.त.पु.)

(B) तस्याः स्वयंवरः इति तत्स्वयंवरः, तस्मिन् तत्स्वयंवरे । (ष.त.पु.)

**धनस्य[4] हृदये[5] स्वार्थप्रार्थनां[1] कर्तुमि[2]च्छतः[3] ।**
**न[10] वज्रदेशनार्थो[9]ऽस्था[11]दत्युत्ताने[6] इवो[8]दकम्[7] ॥२९३॥**

**अन्वय :-** स्वार्थप्रार्थनां कर्तुम् इच्छतः धनस्य हृदये अत्युत्ताने उदकम् इव वज्रदेशनार्थः न अस्थाद् ।

**समास :-** (१) स्वार्थप्रार्थनाम् – (A) स्वस्य अर्थः इति स्वार्थः । (ष.त.पु.)

(B) स्वार्थस्य प्रार्थना इति स्वार्थप्रार्थना, तां स्वार्थप्रार्थनाम् । (ष.त.पु.)

(२) वज्रदेशनार्थः – (A) वज्रस्य देशना इति वज्रदेशना। (ष.त.पु.)

(B) वज्रदेशनायाः अर्थः इति वज्रदेशनार्थः । (ष.त.पु.)

(३) अत्युत्ताने – अतिशयेन उत्तानः इति अत्युत्तानः, तस्मिन् अत्युत्ताने । (प्रा.क.)

**देशनान्तेऽवदद्वज्रम्, धनश्रेष्ठी कृताञ्जलिः ।**
**कृत्वा प्रसादं मत्पुत्रीमिमामुद्वह मानद! ॥२९४॥**

**अन्वय :-** देशनान्ते कृताञ्जलिः धनश्रेष्ठी वज्रम् अवदत् मानद ! प्रसादं कृत्वा इमां मत्पुत्रीम् उद्वह ।

**समास :-** (१) देशनान्ते – पूर्ववत् ।

(२) धनश्रेष्ठी–पूर्ववत् ।

(३) कृताञ्जलिः – कृतः अञ्जलिः येन सः इति कृताञ्जलिः । (समा.ब.व्री.)

(४) मत्पुत्रीम् – मम पुत्री इति मत्पुत्री, तां मत्पुत्रीम् । (ष.त.पु.)

(५) मानद ! – मानं ददाति इति मानदः, तत्संबोधनं मानद ! । (उप.त.पु.)

**क्व भवानमराकारः, क्वेयं मानुषकीटिका ।**
**ऊरीकुरु तथाप्येनाम्, महत्सु न वृथाऽर्थना ॥२९५॥**

**अन्वय :-** अमराकारः भवान् क्व मानुषकीटिका इयं का तथा अपि एनाम् ऊरीकुरु महत्सु अर्थना वृथा न (भवति) ।

**समास :-** (१) अमराकारः – अमरस्य आकारः इव आकारः यस्य सः इति अमराकारः । (उप.ब.व्री.)

(२) मानुषकीटिका – मानुषेषु कीटिका इव इति मानुषकीटिका । (स.त.पु.)

(३) ऊरीकुरु – (A) न ऊरी इति अनूरी । (नञ्.त.पु.)

(B) अनूरी ऊरी कुरु इति ऊरीकुरु । (गति.त.पु.)

**विवाहानन्तरं[२] वज्र[१] !, हस्तमोचनपर्वणि[३] ।**
**द्रव्यकोटी[५]रसङ्ख्याता[४]स्तुभ्यं[६] दास्ये[७] भव[९]त्वदः[८] ॥२९६॥**

**अन्वय :-** वज्र ! विवाहानन्तरं हस्तमोचनपर्वणि असङ्ख्याताः द्रव्यकोटीः तुभ्यं दास्ये अदः भवतु ।

**समास :-** (१) विवाहानन्तरम् - (A) नास्ति अन्तरं यस्मिन् तद् इति अनन्तरम् । (नञ्.ब.व्री.)

(B) विवाहाद् अनन्तरम् इति विवाहानन्तरम् । (पं.त.पु.)

(२) हस्तमोचनपर्वणि - (A) हस्तस्य मोचनम् इति हस्तमोचनम् । (ष.त.पु.)

(B) हस्तमोचनस्य पर्व इति हस्तमोचनपर्व, तस्मिन् हस्तमोचनपर्वणि । (ष.त.पु.)

(३) द्रव्यकोटीः - द्रव्याणां कोट्यः इति द्रव्यकोट्यः, ताः द्रव्यकोटीः । (ष.त.पु.)

**वज्र[२]स्त[३]मज्ञं[४] विज्ञाय[५], स्मित्वो[६]चे[७] करुणापरः[१] ।**
**पर्याप्तं[१०] द्रव्यकोटीभिः[९], पर्याप्तं[१३] कन्यया[११] च[१२] ते[८] ॥२९७॥**

**अन्वय :-** करुणापरः वज्रः तम् अज्ञं विज्ञाय स्मित्वा ऊचे ते द्रव्यकोटीभिः पर्याप्तं कन्यया च पर्याप्तम् ।

**समास :-** (१) अज्ञम् - न जानाति इति अज्ञः, तम् अज्ञम् । (उप.त.पु.)

(२) करुणापरः - करुणायां परः इति करुणापरः । (स.त.पु.)

(३) द्रव्यकोटीभिः – द्रव्यकोट्यः-पूर्ववत्, ताभिः द्रव्यकोटीभिः ।

**नितम्बिन्यो[2] हि[5] विषया[4]स्ते[3] पुनः[1] स्यु[10]र्विषोपमाः[6] ।**
**आपातमात्रमधुराः[7], परिणामे[8]ऽतिदारुणाः[9] ॥२९८॥**

**अन्वय :-** पुनः नितम्बिन्यः ते विषयाः हि विषोपमाः आपातमात्र-मधुराः परिणामे अतिदारुणाः स्युः ।

**समास :-** (१) विषोपमाः-विषस्य उपमा येषां ते इति विषोपमाः । (व्यधि.ब.व्री.)

(२) आपातमात्रमधुराः – (A) आपातम् एव इति आपात-मात्रम् । (मयू.कर्म.)

(B) आपातमात्रे मधुराः इति आपातमात्रमधुराः । (स.त.पु.)

(३) अतिदारुणाः – अतिशयेन दारुणाः इति अतिदारुणाः । (प्रा.क.)

**विवेच्यमाना[1] विषया[2], विशिष्यन्ते[5] विषाद[3]पि[4] ।**
**जन्मान्तरे[7]ऽप्य[8]नर्थाय[10], ये[6] भवन्ति[11] शरीरिणाम्[9] ॥२९९॥**

**अन्वय :-** विवेच्यमानाः विषयाः विषाद् अपि विशिष्यन्ते ये जन्मान्तरे अपि शरीरिणाम् अनर्थाय भवन्ति ।

**समास :-** (१) जन्मान्तरे – अन्यद् जन्म इति जन्मान्तरम्, तस्मिन् जन्मान्तरे । (मयू.कर्म.)

(२) *अनर्थाय* – *न अर्थः इति अनर्थः, तस्मै अनर्थाय* । (नञ्.त.पु.)

(३) शरीरिणाम्-शरीरमस्ति येषाम् इति शरीरिणः, तेषां शरीरिणाम् । (तद्धित)

**ज्ञात्वा दुरन्तान् विषयान्, कथमङ्गीकरोम्यमूम् ।**
**ज्ञातैश्चौरैरसारोऽपि, ग्रहीतुं न हीं शक्यते ॥३००॥**

**अन्वय :-** विषयान् दुरन्तान् ज्ञात्वा अमूं कथम् अङ्गीकरोमि ही ज्ञातैः चौरैः असारः अपि ग्रहीतुं न शक्यते ।

**समास :-** (१) दुरन्तान् - दुष्टः अन्तः येषां ते इति दुरन्ताः, तान् दुरन्तान् । (प्रादि.ब.व्री.)

(२) अङ्गीकरोमि - (A) न अङ्गम् इति अनङ्गम् । (नञ्.त.पु.)

(B) अनङ्गम् अङ्गम् इव करोमि इति अङ्गीकरोमि । (गति.त.पु.)

(३) असारः - नास्ति सारं यस्मिन् सः इति असारः । (नञ्.ब.व्री.)

**महानुभाव ! कन्या ते, यदि मय्यनुरागिणी ।**
**प्रव्रज्यां तन्मयोपात्तामुपादत्तामसावपि ॥३०१॥**

**अन्वय :-** महानुभाव ! यदि ते कन्या मयि अनुरागिणी तद् मया उपात्तां प्रव्रज्याम् असौ अपि उपादत्ताम् ।

**समास :-** (१) महानुभाव! - महान् अनुभावः यस्य सः इति महानुभावः, तत्सम्बोधनं महानुभाव ! (समा.ब.व्री.)

(२) अनुरागिणी - अनुरागः अस्ति अस्या इति अनुरागिणी । (तद्धित)

**इयेष[८] मामेव[६,७] यदि[१], कुलीना[२] मनसा[४]ऽप्य[५]सौ[३] ।**
**तदेवं[९,११] युज्यते[१३] कर्तुं[१२], परलोकहितेच्छया[१०] ॥३०२॥**

**अन्वय :-** यदि कुलीना असौ मनसा अपि माम् एव इयेष तद् परलोकहितेच्छया एवं कर्तुं युज्यते ।

**समास :-** (१) कुलीना - कुले भवा इति कुलीना । (तद्धित)

(२) परलोकहितेच्छया - (A) परश्चासौ लोकश्च इति परलोकः । (वि.पू.क.)

(B) परलोकाय हितम् इति परलोकहितम् । (च.त.पु.)

(C) परलोकहितस्य इच्छा इति परलोकहितेच्छा, तया परलोकहितेच्छया । (ष.त.पु.)

**विवेक[१]पूर्वमथवा[२]ऽनुज्ञया[४]ऽपि[५] मदीयया[३] ।**
**गृह्णा[९]त्वेषा[६] परिव्रज्याम्[८], निर्वाणार्पणलग्निकाम्[७] ॥३०३॥**

**अन्वय :-** विवेकपूर्वम् अथवा मदीयया अनुज्ञया अपि एषा निर्वाणार्पणलग्निकां परिव्रज्यां गृह्णातु ।

**समास :-** (१) विवेकपूर्वम्-विवेकेन पूर्वम् इति विवेकपूर्वम् । (तृ.त.पु.)

(२) मदीयया - मम इयम् इति मदीया, तया मदीयया । (तद्धित)

(३) निर्वाणार्पणलग्निकाम् - (A) निर्वाणस्य अर्पणम् इति निर्वाणार्पणम् । (ष.त.पु.)

(B) निर्वाणार्पणस्य लग्निका इति निर्वाणार्पणलग्निका, तां निर्वाणार्पणलग्निकाम् । (ष.त.पु.)

**बिभीतकतरुच्छायाम्[४] इव[५] अनर्थप्रदायिनीम्[६] ।**
**मा[८] कार्षीद्[९] विषयासक्तिम्[७], त्वत्पुत्री[३] वच्मि[२] तद्धितम्[१] ॥३०४॥**

**अन्वय :-** तद्धितं वच्मि (यद्) त्वत्पुत्री बिभीतकतरुच्छायाम् इव अनर्थप्रदायिनीं विषयासक्तिं मा कार्षीत् ।

**समास :-** (१) बिभीतकतरुच्छायाम् - (A) बिभीतकः नाम यस्य सः इति बिभीतकनामा । (समा.ब.व्री.)

(B) बिभीतकनामा चासौ तरुश्च इति बिभीतकतरुः । (म.प.लो.क.)

(C) बिभीतकतरोः छाया इति बिभीतकतरुच्छाया, तां बिभीतकतरुच्छायाम् । (ष.त.पु.)

(२) अनर्थप्रदायिनीम् - (A) न अर्थः इति अनर्थः । (नञ्.त.पु.)

(B) अनर्थं प्रददाति इत्येवंशीला अनर्थप्रदायिनी, ताम् अनर्थप्रदायिनीम् । (उप.त.पु.)

(३) विषयासक्तिम् - विषयाणाम् आसक्तिः इति विषयासक्तिः, तां विषयासक्तिम् । (ष.त.पु.)

(४) त्वत्पुत्री - तव पुत्री इति त्वत्पुत्री । (ष.त.पु.)

(५) तद्धितम् - तस्यै हितम् इति तद्धितम्, तद् तद्धितम् । (च.त.पु.)

**एवं भगवतो वज्रस्वामिनः पेशलोक्तिभिः ।**
**प्रतिबुद्धा प्रवव्राजाल्पकर्मा रुक्मिणी तदा ॥३०५॥**

**अन्वय :-** एवं भगवतः वज्रस्वामिनः पेशलोक्तिभिः प्रतिबुद्धा अल्पकर्मा रुक्मिणी तदा प्रवव्राज ।

**समास :-** (१) भगवतः - भगवान् - पूर्ववत्, तस्य भगवतः ।

(२) वज्रस्वामिनः - पूर्ववत् ।

(३) पेशलोक्तिभिः - पेशलाश्च ताः उक्तयश्च इति पेशलोक्तयः, ताभिः पेशलोक्तिभिः । (वि.पू.क.)

(४) अल्पकर्मा - अल्पानि कर्माणि यस्याः सा इति अल्पकर्मा । (समा.ब.व्री.)

**धर्मोऽयमेव हि श्रेयान्, यत्र निर्लोभतेदृशी ।**
**एवं विमृश्य बहवः, प्रतिबोधं जना ययुः ॥३०६॥**

**अन्वय :-** हि अयं धर्मः एव श्रेयान् यत्र ईदृशी निर्लोभता एवं विमृश्य बहवः जनाः प्रतिबोधं ययुः ।

**समास :-** (१) ईदृशी - इयम् इव दृश्यते इति ईदृशी । (उप.त.पु.)

(२) निर्लोभता - (A) निर्गतः लोभः यस्मात्सः इति निर्लोभः । (प्रादि.ब.व्री.)

(B) निर्लोभस्य भावः इति निर्लोभता । (तद्धित)

**अन्यदा जन्मसंसिद्धपदानुसृतिलब्धिना ।**
**ततो भगवता वज्रस्वामिनाऽऽकाशगामिनी ॥३०७॥**

महापरिज्ञा[१०]ध्ययनादाचाराङ्गान्त[११]रस्थिता ।
वि[१२]द्योदद्ध्रे[१३] भग[३]वतः, सङ्घ[४]स्योपचिकीर्षुणा[५] ॥३०८॥
(युग्मम्)

**अन्वय :-** ततः अन्यदा भगवतः सङ्घस्य उपचिकीर्षुणा जन्मसंसिद्धपदानुसृतिलब्धिना भगवता वज्रस्वामिना महापरिज्ञाध्ययनाद् आचाराङ्गान्तरस्थिता आकाशगामिनी विद्या उद्दध्रे ।

**समास :-** (१) जन्मसंसिद्धपदानुसृतिलब्धिना – (A) जन्मतः संसिद्धा इति जन्मसंसिद्धा । (पं.त.पु.)

(B) पदानामनुसृतिः यस्यां सा इति पदानुसृतिः । *(व्यधि.ब.व्री.)*

(C) पदानुसृतिः नाम यस्याः सा इति पदानुसृतिनामा । (समा.ब.व्री.)

(D) पदानुसृतिनामा लब्धिः इति पदानुसृतिलब्धिः। (म.प.लो.क.)

(E) जन्मसंसिद्धा पदानुसृतिलब्धिः यस्य सः इति जन्मसंसिद्धपदानुसृतिलब्धिः, तेन जन्मसंसिद्धपदानुसृतिलब्धिना । (समा.ब.व्री.)

(२) वज्रस्वामिना – पूर्ववत् ।

(३) आकाशगामिनी – पूर्ववत् ।

(४) महापरिज्ञाध्ययनाद् – (A) महापरिज्ञा नाम यस्य तद् इति महापरिज्ञानाम । (समा.ब.व्री.)

(B) महापरिज्ञानाम च तद् अध्ययनं च इति महा-परिज्ञाध्ययनम्, तस्मात् महापरिज्ञाध्ययनाद् । (म.प.लो.क.)

५) आचाराङ्गान्तरस्थिता - (A) आचाराणां कथनं यस्मिन् तद् इति आचारकथनम् । (समा.ब.व्री.)

(B) आचारकथनम् अङ्गम् इति आचाराङ्गम् । (म.प.लो.क.)

(C) आचाराङ्गस्य अन्तरम् इति आचाराङ्गान्तरम् । (ष.त.पु.)

(D) आचाराङ्गान्तरे स्थिता इति आचाराङ्गान्तर-स्थिता । (स.त.पु.)

**बभाण वज्रो भगवाननया विद्यया मम ।**
**जम्बूद्वीपाद् भ्रमणेऽस्ति, शक्तिरामानुषोत्तरम् ॥३०९॥**

**अन्वय :-** भगवान् वज्रः बभाण अनया विद्यया जम्बूद्वीपाद् आमा-नुषोत्तरं भ्रमणे मम शक्तिः अस्ति ।

**समास :-** (२) जम्बूद्वीपात् - जम्बूद्वीपः पूर्ववत्, तस्मात् जम्बूद्वीपात् ।

(३) आमानुषोत्तरम् - आ मानुषोत्तरात् इति आमानुषो-त्तरम् । (अव्य.भा.)

**मयेयं धरणीयैवं, विद्या देया न कस्यचित् ।**
**अल्पर्द्धयोऽल्पसत्त्वाश्च, भाविनोऽन्ये ह्यतः परम् ॥३१०॥**

*अन्वय :- इयं विद्या मया एव धरणीया, कस्यचित् न देया, हि अतः परम् अन्ये अल्पर्द्धयः अल्पसत्त्वाः च भाविनः ।*

**समास :-** (१) अल्पर्द्धयः - अल्पा ऋद्धिः येषां ते इति अल्पर्द्धयः । (समा.ब.व्री.)

(२) अल्पसत्त्वाः - अल्पं सत्त्वं येषां ते इति अल्पसत्त्वाः । (समा.ब.व्री.)

**अन्यदा पूर्वदिग्भागाच्छ्रीवज्रोऽगान्महामुनिः ।**
**सूर्यो मकरसङ्क्रान्ताविवापाच्यां उदग्दिशम् ॥३११॥**

**अन्वय :-** अन्यदा मकरसङ्क्रान्तौ सूर्यः अपाच्या (उदग्दिशम्) इव महामुनिः श्रीवज्रः पूर्वदिग्भागाद् उदग्दिशम् अगाद् ।

**समास :-** (१) पूर्वदिग्भागाद् - (A) पूर्वा च सा दिक् च इति पूर्वदिक् । (वि.पू.क.)

(B) पूर्वदिशः भागः इति पूर्वदिग्भागः, तस्मात् पूर्वदिग्भागात् । (ष.त.पु.)

(२) श्रीवज्रः - पूर्ववत् ।

(३) महामुनिः - पूर्ववत् ।

(४) मकरसङ्क्रान्तौ - मकरस्य संक्रान्तिः यस्मिन् सः इति मकरसङ्क्रान्तिः, तस्मिन् मकरसङ्क्रान्तौ । (व्यधि.ब.व्री.)

(५) उदग्दिशम् - उदक् चासौ दिक् च इति उदग्दिक्, ताम् उदग्दिशम् । (वि.पू.क.)

**तदा तत्र प्रववृते, दुर्भिक्षमतिभीषणम् ।**
**बभूव भोजनश्रद्धानुबन्धविधुरो जनः ॥३१२॥**

**अन्वय :-** तदा तत्र अतिभीषणं दुर्भिक्षं प्रववृते जनः भोजनश्रद्धानुबन्धविधुरः बभूव ।

**समास :-** (१) दुर्भिक्षम् – भिक्षायाः अभावः इति दुर्भिक्षम् । (अव्य.भा.)

(२) अतिभीषणम् – अतिशयेन भीषणम् इति अतिभीषणम् । (प्रा.क.)

(३) भोजनश्रद्धानुबन्धविधुरः – (A) भोजनस्य श्रद्धा इति भोजनश्रद्धा । (ष.त.पु.)

(B) भोजनश्रद्धायाः अनुबन्धः इति भोजनश्रद्धानुबन्धः । (ष.त.पु.)

(C) भोजनश्रद्धानुबन्धात् विधुरः इति भोजनश्रद्धानुबन्धविधुरः । (पं.त.पु.)

**गृहिणामन्नदारिद्र्यादल्पभोजनकारिणाम् ।**
**बभूव नित्यमप्यूनोदरता यतिनामिव ॥३१३॥**

**अन्वय :-** अन्नदारिद्र्यात् अल्पभोजनकारिणां यतिनाम् इव गृहिणाम् अपि नित्यम् ऊनोदरता बभूव ।

**समास :-** (१) अन्नदारिद्र्यात् – अन्नस्य दारिद्र्यम् इति अन्नदारिद्र्यम्, तस्मात् अन्नदारिद्र्यात् । (ष.त.पु.)

(२) अल्पभोजनकारिणाम् – (A) अल्पं च तद् भोजनं च इति अल्पभोजनम् । (वि.पू.क.)

(B) अल्पभोजनं कुर्वन्ति इत्येवंशीलाः इति अल्प-भोजनकारिणः, तेषाम् अल्पभोजनकारिणाम् । (उप.त.पु.)

(३) ऊनोदरता - (A) ऊनं च तद् उदरं च इति ऊनोदरम् । (वि.पू.क.)

(B) ऊनोदरस्य भावः इति ऊनोदरता । (तद्धित)

**संवव्रिरे[५] सत्रशाला[४], गृहस्थै[२]रीश्वरै[१]रपि[३] ।**
**सर्व[६]त्राभू[१०]दविरलरुलद्रोलाकुलै[७]र्व[८] भू[९]: ॥३१४॥**

अन्वय :- इश्वरैः गृहस्थैः अपि सत्रशालाः संवव्रिरे सर्वत्र अविरलरुलद्रोलाकुला एव भूः अभूद् ।

"अविरलं-निरन्तरम्" । निबिडं तु निरन्तरम् ॥१४४६॥ निबिरीसं घनं सान्द्रं नीरन्ध्रं बहलं दृढम् । गाढमविरलं च । इत्यभिधाने । (१४४७)... । रोलः-दीनः ।

समास :- (१) सत्रशालाः- सत्रस्य शालाः इति सत्रशालाः । (ष.त.पु.)

(२) गृहस्थैः- गृहस्थाः पूर्ववत्, तैः गृहस्थैः । (उप.त.पु.)

(३) अविरलरुलद्रोलाकुला- (A) अविरलं रुलन्तः इति अविरलरुलन्तः । (द्वि.त.पु.)

(B) अविरलरुलन्तश्चामी रोलाश्च इति अविरल-रुलद्रोलाः (वि.पू.क.)

(C) अविरलरुलद्रोलैः आकुला इति अविरल-रुलद्रोलाकुला । (तृ.त.पु.)

**रङ्का[1] विक्रीयमाणानि[5], दधिभाण्डानि[6] चत्वरे[4] ।**
**स्फोटं[7] स्फोटं[8] तद्दधीनि[9], लिलिहुः[10] कुक्कुरा[2] इव[3] ॥३१५॥**

**अन्वय :-** रङ्काः कुक्कुराः इव चत्वरे विक्रीयमाणानि दधिभाण्डानि स्फोटं स्फोटं तद्दधीनि लिलिहुः ।

**समास :-** (१) दधिभाण्डानि- (A) दध्ना भृतानि इति दधिभृतानि । (तृ.त.पु.)

(B) दधिभृतानि भाण्डानि इति दधिभाण्डानि, तानि दधिभाण्डानि । (म.प.लो.क.)

(२) तद्दधीनि - तेषां दधीनि तद्दधीनि, तानि तद्दधीनि । (ष.त.पु.)

**अस्थिचर्मावशेषाङ्गाः[4], सुव्यक्तस्नायुमण्डलाः[5] ।**
**रङ्काः[6] सर्वत्र[7] सञ्चेरुः[8], परेता[1] इव[2] दारुणाः[3] ॥३१६॥**

**अन्वय :-** परेताः इव दारुणाः अस्थिचर्मावशेषाङ्गाः सुव्यक्तस्नायु-मण्डलाः रङ्काः सर्वत्र सञ्चेरुः ।

परेताः-मृताः । प्रमीत उपसम्पन्नः परेतप्रेतसंस्थिताः ॥३७३॥ नामालेख्ययशःशेषौ व्यापन्नोपगतौ मृतः ॥ इत्यभिधाने (३७४)

**समास :-** (१) अस्थिचर्मावशेषाङ्गाः - (A) अस्थीनि च चर्माणि च एतेषां समाहारः इति अस्थिचर्म । (समा.द्व.)

(B) अस्थिचर्म अवशेषः यस्मिन् तद् इति अस्थि-चर्मावशेषम् । (समा.ब.व्री.)

(C) अस्थिचर्मावशेषम् अङ्गं येषां ते अस्थि-चर्मावशेषाङ्गाः । (समा.ब.व्री.)

(२) सुव्यक्तस्नायुमण्डलाः - (A) स्नायूनां मण्डलानि इति स्नायुमण्डलानि । (ष.त.पु.)

(B) सुष्ठु व्यक्तानि इति सुव्यक्तानि । (सु.पू.क.)

(C) सुव्यक्तानि स्नायुमण्डलानि येषां ते इति सुव्यक्तस्नायुमण्डलाः । (समा.ब.व्री.)

(३) परेताः - परम् इताः इति परेताः । (द्वि.त.पु.)

**अनगारे[३]ष्वतिथिता[१]मागतेष्व[२]न्नतृष्णया[६] ।**
**अदर्शय[९]न्भिक्षादोषा[७]नुपेत्य[८] श्रावका[४] अपि[५] ॥३१७॥**

**अन्वय :-** अतिथिताम् आगतेषु अनगारेषु श्रावका अपि अन्नतृष्णया भिक्षादोषान् उपेत्य अदर्शयन् ।

**समास :-** (१) अनगारेषु - नास्ति अगारं येषां ते इति अनगाराः, तेषु अनगारेषु । (नञ्.ब.व्री.)

(२) अतिथिताम् - (A) अतिथिः-पूर्ववत् ।

(B) अतिथेः भावः अतिथिता, ताम् अतिथिताम् । (तद्धित)

(३) अन्नतृष्णया - अन्नस्य तृष्णा इति अन्नतृष्णा, तया अन्नतृष्णया । (ष.त.पु.)

(४) भिक्षादोषान् - भिक्षायाः दोषा इति भिक्षादोषाः तान् भिक्षादोषान् । (ष.त.पु.)

**ग्रामेषु[४] शून्यीभूतेषु[३], विष्वग्निर्धूमधामसु[२] ।**
**अभवत्पादसञ्चाराः[५], पन्था[६]नोऽ[७]प्यभव[९]न्खिलाः[८] ॥३१८॥**

**अन्वय :-** विष्वग् निर्धूमधामसु शून्यीभूतेषु ग्रामेषु अभवत्पादसञ्चाराः पन्थानः अपि खिलाः अभवन् ।

खिलाः - सञ्चारायोग्याः । "द्वे खिलाऽप्रहते समे त्रिषु" इत्यमरः (२।१।५)

**समास :-** (१) शून्यीभूतेषु - (A) न शून्याः इति अशून्याः । (नञ्.त.पु.)

(B) अशून्याः शून्याः इव भूताः शून्यीभूताः तेषु शून्यीभूतेषु । (गति.त.पु.)

(२) निर्धूमधामसु - (A) निर्गतः धूमः येभ्यस्तानि इति निर्धूमानि । (प्रादि.ब.व्री.)

(B) निर्धूमानि धामानि येषु ते इति निर्धूमधामानः, तेषु निर्धूमधामसु । (समा.ब.व्री.)

(३) अभवत्पादसञ्चाराः - (A) न भवन् इति अभवन् । (नञ्.त.पु.)

(B) पादानां सञ्चारः इति पादसञ्चारः । (ष.त.पु.)

(C) अभवन् पादसञ्चारः येषु ते इति अभवत्पाद-सञ्चाराः । (समा.ब.व्री.)

**ततश्च[1,2] सकलः[6] संघो[7], दुष्कालेन[3] कदर्थितः[4] ।**
**दीनो[5] विज्ञपयामास[10], सुनन्दानन्दनं[8] मुनिम्[9] ॥३१९॥**

**अन्वय :-** ततः च दुष्कालेन कदर्थितः दीनः सकलः संघः सुनन्दानन्दनं मुनिं विज्ञपयामास ।

**समास :-** (१) दुष्कालेन - दुष्टः कालः इति दुष्कालः, तेन दुष्कालेन । (प्रा.क.)

(२) सुनन्दानन्दनम् – सुनन्दानन्दनः – पूर्ववत्, तं सुनन्दानन्दनम् ।

**अस्मान्दुःखार्णवादस्मात्, कथंचिदपि तारय ।**
**सङ्घप्रयोजने विद्योपयोगोऽपि न दुष्यति ॥३२०॥**

**अन्वय :-** अस्माद् दुःखार्णवाद् कथंचिद् अपि अस्मान् तारय सङ्घप्रयोजने विद्योपयोगः अपि न दुष्यति ।

**समास :-** (१) दुःखार्णवात् –दुःखम् एव अर्णवः इति दुःखार्णवः, तस्मात् दुःखार्णवात् । (अव.पू.क.)

(२) सङ्घप्रयोजने–सङ्घस्य प्रयोजनम् इति सङ्घप्रयोजनम्, तस्मिन् सङ्घप्रयोजने । (ष.त.पु.)

(३) विद्योपयोगः – विद्यायाः उपयोगः इति विद्योपयोगः । (ष.त.पु.)

**ततश्च वज्रो भगवान्, विद्याशक्त्या गरिष्ठया ।**
**पटं विचक्रे विपुलम् , चक्रभृच्चर्मरत्नवत् ॥३२१॥**

**अन्वय :-** ततः च भगवान् वज्रः गरिष्ठया विद्याशक्त्या चक्रभृच्चचर्मरत्नवत् विपुलं पटं विचक्रे ।

**समास :-** (१) विद्याशक्त्या – विद्यायाः शक्तिः इति विद्याशक्तिः, तया विद्याशक्त्या । (ष.त.पु.)

(२) चक्रभृच्चर्मरत्नवत् – (A) चक्रं बिभर्ति इति चक्रभृत् । (उप.तं.पु.)

(B) चर्मणा निर्मितम् इति चर्मनिर्मितम् । (तृ.त.पु.)

(C) चर्मनिर्मितं रत्नम् इति चर्मरत्नम् ।
(म.प.लो.क.)

(D) चक्रभृतः चर्मरत्नम् इति चक्रभृच्चर्मरत्नम् ।
(ष.त.पु.)

(E) चक्रभृच्चर्मरत्नम् इव इति चक्रभृच्चर्मरत्नवत् ।
(तद्धित)

**श्रीवज्रस्वामिना[2] सङ्घो[5], निर्दिष्टः[3] सकल[4]स्तदा[1] ।**
**पोते[6] वणिक्सार्थ[7] इवा[8]धिरुरोह[10] महापटे[9] ॥३२२॥**

**अन्वय :-** तदा श्रीवज्रस्वामिना निर्दिष्टः सकलः सङ्घः पोते वणिक्सार्थः इव महापटे अधिरुरोह ।

**समास :-** (१) श्रीवज्रस्वामिना – पूर्ववत् ।

(२) वणिक्सार्थः – वणिजां सार्थः इति वणिक्सार्थः ।
(ष.त.पु.)

(३) महापटे – महाँश्चासौ पटश्च इति महापटः, तस्मिन् महापटे । (वि.पू.क.)

**वज्रर्षिणा[2] भगवता[1], विद्याशक्त्या[4] प्रयुक्तया[3] ।**
**उत्पुप्लुवे[8] पटो[5] व्योम्नि[7], पवनोत्क्षिप्ततूलवत्[6] ॥३२३॥**

**अन्वय :-** भगवता वज्रर्षिणा प्रयुक्तया विद्याशक्त्या पटः पवनोत्क्षिप्ततूलवत् व्योम्नि उत्पुप्लुवे ।

**समास :-** (१) वज्रर्षिणा – पूर्ववत् ।

(२) विद्याशक्त्या – पूर्ववत् ।

(३) पवनोत्क्षिप्ततूलवत् – (A) पवनेन उत्क्षिप्तम् इति पवनोत्क्षिप्तम् । (तृ.त.पु.)

(B) पवनोत्क्षिप्तं च तद् तूलं च इति पवनोत्क्षिप्त-तूलम् । (वि.पू.क.)

(C) पवनोत्क्षिप्ततूलम् इव इति पवनोत्क्षिप्ततूलवत् । (तद्धित)

**तदा[1] शय्यातरो[4] दत्तनामा[3] वज्रमहामुने[2]: ।**
**समाययौ[10] स[8] हि[9] वारिग्रहणार्थं[5] गतो[6]ऽभवत्[7] ॥३२४॥**

**अन्वय :-** तदा वज्रमहामुनेः दत्तनामा शय्यातरः वारिग्रहणार्थं गतः अभवत् सः हि समाययौ ।

**समास :-** (१) शय्यातरः – पूर्ववत् ।

(२) दत्तनामा – दत्तः नाम यस्य सः इति दत्तनामा । (समा.ब.व्री.)

(३) वज्रमहामुनेः – पूर्ववत् ।

(४) वारिग्रहणार्थम् – (A) वारिणः ग्रहणम् इति वारि-ग्रहणम् । (ष.त.पु.)

*(B) वारिग्रहणस्य अर्थम् इति वारिग्रहणार्थम् । (ष.त.पु.)*

**सङ्घेन[1] सहितं[2] वज्रस्वामिनं[4] व्योमयायिनम्[3] ।**
**निरीक्ष्य[5] मूर्धजाँ[7]ञ्शीघ्र[8]मुत्खा[9]यै[10]व[11]मुवाच सः[6] ॥३२५॥**

**अन्वय :-** सङ्घेन सहितं व्योमयायिनं वज्रस्वामिनं निरीक्ष्य सः मूर्धजान् शीघ्रम् उत्खाय एवम् उवाच ।

**समास :-** (१) वज्रस्वामिनम् - पूर्ववत् ।

(२) व्योमयायिनम् - व्योम्नि याति इत्येवंशील: इति व्योमयायी, तं व्योमयायिनम् । (उप.त.पु.)

(३) मूर्धजान् - मूर्ध्नि जाता: इति मूर्धजा:, तान् मूर्धजान् । (उप.त.पु.)

**शय्यातरोऽहं युष्माकमभवं भगवन् ! पुरा ।**
**अद्य साधर्मिकोऽप्यस्मि, निस्तारयसि किं न माम् ? ॥३२६॥**

**अन्वय :-** भगवन् ! पुरा अहं युष्माकं शय्यातर: अभवम् अद्य साधर्मिक: अपि अस्मि मां किं न निस्तारयसि ? ।

**समास :-** (१) शय्यातर: - पूर्ववत् ।

(२) साधर्मिक: - (A) समान: धर्म: यस्य स: इति सधर्मा । (समा.ब.व्री.)

(B) सधर्माण: अयम् (संबन्ध:) इति साधर्मिक: । (तद्धित)

**शय्यातरस्य तां वाचम्, श्रुत्वोपालम्भगर्भिताम् ।**
**दृष्ट्वा च लूनकेशं तम्, वज्र: सूत्रार्थमस्मरत् ॥३२७॥**

**अन्वय :-** शय्यातरस्य उपालम्भगर्भितां तां वाचं श्रुत्वा लूनकेशं च तं दृष्ट्वा वज्र: सूत्रार्थम् अस्मरत् ।

**समास :-** (१) शय्यातरस्य - पूर्ववत् ।

(२) उपालम्भगर्भिताम् - उपालम्भेन गर्भिता इति उपालम्भगर्भिता, ताम् उपालम्भगर्भिताम् । (तृ.त.पु.)

(३) लूनकेशम् – लूनाः केशाः येन सः इति लूनकेशः, तं लूनकेशम् । (समा.ब.व्री.)

(४) सूत्रार्थम् – सूत्राणाम् अर्थः इति सूत्रार्थः, तं सूत्रार्थम् । (ष.त.पु.)

**ये[1] साधर्मिकवात्सल्ये[2], स्वाध्याये[3] चरणे[4]ऽपि[10] वा[5] ।**
**तीर्थप्रभावनायां[6] चो[7]द्युक्ता[8]स्तां[9]स्तारये[12]न्मुनि[11]ः ॥३२८॥**

**अन्वय :-** ये साधर्मिकवात्सल्ये स्वाध्याये चरणे वा तीर्थप्रभावनायां च उद्युक्ताः तान् अपि मुनिः तारयेत् ।

**समास :-** (१) साधर्मिकवात्सल्ये – (A) साधर्मिकः–पूर्ववत् ।

(B) वत्सलस्य भावः इति वात्सल्यम् । (तद्धित)

(C) साधर्मिकाणां वात्सल्यम् इति साधर्मिक-वात्सल्यम्, तस्मिन् साधर्मिकवात्सल्ये । (ष.त.पु.)

(२) स्वाध्याये – पूर्ववत् ।

(३) तीर्थप्रभावनायाम् – तीर्थस्य प्रभावना इति तीर्थ-प्रभावना, तस्यां तीर्थप्रभावनायाम् । (ष.त.पु.)

**आगमार्थ[2]मिमं[1] स्मृत्वा[3], वज्रस्वामिमहर्षिणा[4] ।**
**पटे[9] तस्मिं[8]न्नध्यरोपि[10], सो[5]ऽपि[7] शय्यातरोत्तमः[6] ॥३२९॥**

**अन्वय :-** इमम् आगमार्थं स्मृत्वा वज्रस्वामिमहर्षिणा सः शय्यातरोत्तमः अपि तस्मिन् पटे अध्यरोपि ।

**समास :-** (१) आगमार्थम् – आगमस्य अर्थः इति आगमार्थः, तम् आगमार्थम् । (ष.त.पु.)

(२) वज्रस्वामिमहर्षिणा - (A) वज्रस्वामी-पूर्ववत् ।

(B) महर्षिः - पूर्ववत् ।

(C) वज्रस्वामी चासौ महर्षिश्च इति वज्रस्वामि-महर्षिः, तेन वज्रस्वामिमहर्षिणा । (वि.उत्त.क.)

(३) शय्यातरोत्तमः - (A) शय्यातरः-पूर्ववत् ।

(B) शय्यातरेषु उत्तमः इति शय्यातरोत्तमः । (स.त.पु.)

**विद्यापटोपविष्टा[1]स्ते[3], यान्तः[2] साद्रिसरित्पुराम्[5] ।**
**सर्वे[4] विलोकयामासुः[8], करामलक[7]वन्महीम्[6] ॥३३०॥**

**अन्वय :-** विद्यापटोपविष्टाः यान्तः ते सर्वे साद्रिसरित्पुरां महीं करामलकवत् विलोकयामासुः ।

**समास :-** (१) विद्यापटोपविष्टाः - (A) विद्यया (कृतः) पटः इति विद्यापटः । (तृ.त.पु.)

(B) विद्यापटे उपविष्टाः इति विद्यापटोपविष्टाः । (स.त.पु.)

(२) साद्रिसरित्पुराम् - (A) अद्रयश्च सरितश्च पुरश्च इति अद्रिसरित्पुरः । (इ.द्व.)

(B) सह अद्रिसरित्पूर्भिः वर्तते या सा इति साद्रि-सरित्पुरा, तां साद्रिसरित्पुराम् । (सह.ब.व्री.)

(३) करामलकवत् - (A) करे स्थितम् इति करस्थितम् । (स.त.पु.)

(B) करस्थितम् आमलकम् इति करामलकम् । (म.प.लो.क.)

(C) करामलकम् इव करामलकवत् । (तद्धित)

**भक्तिप्रह्वैः[1] पूज्यमानो[3], मार्गस्थव्यन्तरामरैः[2] ।**
**व्योम्नि[4] प्रदीयमानार्घो[7], भक्तै[5]र्ज्योतिषिकामरैः[6] ॥३३१॥**
**विद्याधरै[9]र्वर्ण्यमानः[10], शक्तिसम्पच्चमत्कृतैः[8] ।**
**आलिङ्ग्यमानः[15] सुहृ[13]देवा[14]नुकूलेन[11] वायुना[12] ॥३३२॥**
**पटच्छायादर्शिताम्रच्छायासौख्यो[17] महीस्पृशाम्[16] ।**
**वन्दमानो[22] नभःस्थो[18]ऽपि[19], मार्गचैत्या[21]न्यनेकशः[20] ॥३३३॥**
**पटस्थो[23]ऽपि[24] पटस्थेभ्य[25]स्तन्वानो[27] धर्मदेशनाम्[26] ।**
**वज्रर्षि[28]रास[33]सादा[29]थ, पुरीं[32] नाम[31] महापुरीम्[30] ॥३३४॥**

**( चतुर्भिः कलापकम् )**

**अन्वय :-** भक्तिप्रह्वैः मार्गस्थव्यन्तरामरैः पूज्यमानः, व्योम्नि भक्तैः ज्योतिषिकामरैः प्रदीयमानार्घः, शक्तिसम्पच्चमत्कृतैः विद्याधरैः वर्ण्यमानः, अनुकूलेन वायुना सुहृदा इव आलिङ्ग्यमानः, महीस्पृशां पटच्छायादर्शिताम्रच्छाया-सौख्यः, नभःस्थः अपि अनेकशः मार्गचैत्यानि वन्दमानः, पटस्थः अपि पटस्थेभ्यः धर्मदेशनां तन्वानः, वज्रर्षिः अथ महापुरीं नाम पुरीम् आससाद ।

**समास :-** (१) भक्तिप्रह्वैः - भक्त्या प्रह्वाः इति भक्तिप्रह्वाः, तैः भक्तिप्रह्वैः । (तृ.त.पु.)

(२) मार्गस्थव्यन्तरामरैः - (A) व्यन्तरः जातिः येषां ते इति व्यन्तरजातयः । (समा.ब.व्री.)

(B) व्यन्तरजातयः अमराः इति व्यन्तरामराः ।
(म.प.लो.क.)

(C) मार्गे तिष्ठन्ति इति मार्गस्थाः । (उप.त.पु.)

(D) मार्गस्थाश्च ते व्यन्तरामराश्च इति मार्गस्थव्यन्तरामराः, तैः मार्गस्थव्यन्तरामरैः । (वि.पू.क.)

(३) प्रदीयमानार्घः – प्रदीयमानः अर्घः यस्मै सः इति प्रदीयमानार्घः । (समा.ब.व्री.)

(४) ज्योतिषिकामरैः – (A) ज्योतिषि भवाः इति ज्योतिषिकाः । (तद्धित)

(B) ज्योतिषिकाश्च ते अमराश्च इति ज्योतिषिकामराः, तैः ज्योतिषिकामरैः । (वि.पू.क.)

(५) विद्याधरैः – विद्यां धरन्तीति विद्याधराः, तैः विद्याधरैः । (उप.त.पु.)

(६) शक्तिसम्पच्चमत्कृतैः– (A) शक्तिः एव सम्पत् इति शक्तिसम्पत् । (अव.पू.क.)

(B) शक्तिसम्पदा चमत्कृताः इति शक्तिसम्पच्चमत्कृताः, तैः शक्तिसम्पच्चमत्कृतैः । (तृ.त.पु.)

(७) पटच्छायादर्शिताम्रच्छायासौख्यः –

(A) पटस्य छाया इति पटच्छाया । (ष.त.पु.)

(B) पटच्छायया दर्शितम् इति पटच्छायादर्शितम् ।
(तृ.त.पु.)

(C) आम्रस्य छाया इति आम्रच्छाया ।

(D) आम्रच्छायायाः सौख्यम् इति आम्रच्छायासौख्यम् । (ष.त.पु.)

(E) पटच्छायादर्शितम् आम्रच्छायासौख्यं येन सः इति पटच्छायादर्शिताम्रच्छायासौख्यः। (समा.ब.व्री.)

(८) महीस्पृशाम् – महीं स्पृशन्ति इति महीस्पृशः, तेषां महीस्पृशाम्। (उप.त.पु.)

(९) नभःस्थः – नभसि तिष्ठति इति नभःस्थः । (उप.त.पु.)

(१०) मार्गचैत्यानि – (A) मार्गे स्थितानि इति मार्ग-स्थितानि । (स.त.पु.)

(B) मार्गस्थितानि चैत्यानि इति मार्गचैत्यानि । (म.प.लो.क.)

(११) पटस्थः – पटे तिष्ठतीति पटस्थः । (उप.त.पु.)

(१२) पटस्थेभ्यः – पटे तिष्ठन्ति इति पटस्थाः, तेभ्यः पटस्थेभ्यः । (उप.त.पु.)

(१३) धर्मदेशनाम् – पूर्ववत्।

(१४) वज्रर्षिः – पूर्ववत्।

**तस्यां[२] धनकणाढ्यायाम्[१], सुभिक्ष[४]मभव[५]त्सदा[३] ।**
**प्रायेण[८] श्रावको[६] लोको[७], बुद्धभक्त[११]स्तु[१०] पार्थिवः[९] ॥३३५॥**

**अन्वय :-** धनकणाढ्यायां तस्यां सदा सुभिक्षम् अभवत् श्रावकः लोकः प्रायेण पार्थिवः तु बुद्धभक्तः (आसीत्) ।

**समास :-** (१) धनकणाढ्यायाम् – (A) धनानि च कणाश्च इति धनकणाः । (इ.द्व.)

(B) धनकणैः आढ्या इति धनकणाढ्या, तस्यां धनकणाढ्यायाम् । (तृ.त.पु.)

(२) सुभिक्षम् - भिक्षायाः समृद्धिः इति सुभिक्षम् । (अव्य.भा.)

(३) बुद्धभक्तः - बुद्धस्य भक्तः इति बुद्धभक्तः । (ष.त.पु.)

**तस्यां[१] जैनाश्च[४][५] बौद्धाश्च[६][७], स्पर्धमानाः[३] परस्परम्[२] ।**
**चक्रिरे[९] देवपूजादि[८], जैनैर्बौद्धास्तु[११][१२][१०] जिग्यिरे[१३] ॥३३६॥**

**अन्वय :-** तस्यां परस्परं स्पर्धमानाः जैनाः च बौद्धाः च देवपूजादि चक्रिरे तु जैनैः बोद्धाः जिग्यिरे ।

**समास :-** (१) जैनाः - जिनः देवता येषाम् इति जैनाः । (तद्धित)

(२) बौद्धाः- बुद्धः देवता येषाम् इति बौद्धाः । (तद्धित)

(३) देवपूजादि - (A) देवस्य पूजा इति देवपूजा । (ष.त.पु.)

(B) देवपूजा आदौ यस्मिन् तद् इति देवपूजादि, तद् देवपूजादि । (व्यधि.ब.व्री.)

(४) जैनैः - जैनाः पूर्ववत् तैः जैनैः ।

**जैना[३] हि[२] यद्यत्पुष्पादि[३][४][५], पूजोपकरणं[६] पुरे[१] ।**
**ददृशुस्तत्तदधिकमूल्यदानेन[७][८][९][१०] चिक्रियुः[११] ॥३३७॥**

**अन्वय :-** पुरे हि जैनाः यद् यद् पुष्पादि पूजोपकरणं ददृशुः तद् तद् अधिकमूल्यदानेन चिक्रियुः ।

**समास :-** (१) जैनाः - पूर्ववत् ।

(२) पुष्पादि – पुष्पाणि आदौ यस्मिन् तद् इति पुष्पादि, तद् पुष्पादि। (व्यधि.ब.व्री.)

(३) पूजोपकरणम् – पूजायाः उपकरणम् इति पूजोपकरणम्, तद् पूजोपकरणम् । (ष.त.पु.)

(४) अधिकमूल्यदानेन – (A) अधिकं च तद् मूल्यं च इति अधिकमूल्यम्। (वि.पू.क.)

(B) अधिकमूल्यस्य दानम् इति अधिकमूल्यदानम्, तेन अधिकमूल्यदानेन। (ष.त.पु.)

**नाभूवन्बुद्धभक्तास्तु, पुष्पाद्यादातुमीश्वराः ।**
**ततश्च बुद्धायतनेष्वभूत्पूजा तनीयसी ॥३३८॥**

**अन्वय :-** बुद्धभक्ताः तु पुष्पादि आदातुम् ईश्वराः न अभूवन् ततः च बुद्धायतनेषु तनीयसी पूजा अभूत्।

**समास :-** (१) बुद्धभक्ताः – पूर्ववत्।

(२) पुष्पादि – पूर्ववत्।

(३) बुद्धायतनेषु – बुद्धस्य आयतनानि इति बुद्धायतनानि, तेषु बुद्धायतनेषु। (ष.त.पु.)

**बुद्धभक्तास्तु ते ह्रीणा, बुद्धभक्तं महीपतिम् ।**
**विज्ञप्य सर्वं पुष्पादि, श्रावकाणां न्यवारयन् ॥३३९॥**

**अन्वय :-** ह्रीणाः ते बुद्धभक्ताः तु बुद्धभक्तं महीपतिं विज्ञप्य श्रावकाणां सर्वं पुष्पादि न्यवारयन्।

**समास :-** (१) बुद्धभक्ताः – पूर्ववत्।

(२) बुद्धभक्तम् – बुद्धभक्तः पूर्ववत्, तं बुद्धभक्तम्।

(३) महीपतिम् – मह्याः पतिः इति महीपतिः, तं महीपतिम् । (ष.त.पु.)

(४) पुष्पादि – पूर्ववत् ।

**पुष्पापणेषु[3] सर्वेषु[2], बहुमूल्यप्रदा[4] अपि[5] ।**
**अर्हद्भक्ता[6]स्ततः[1] पुष्पवृन्तान्य[7]पि[8] न[9] लेभिरे[10] ॥३४०॥**

**अन्वय :-** ततः सर्वेषु पुष्पापणेषु बहुमूल्यप्रदाः अपि अर्हद्भक्ताः पुष्पवृन्तानि अपि न लेभिरे ।

**समास :-** (१) पुष्पापणेषु – पुष्पाणाम् आपणाः इति पुष्पापणाः, तेषु पुष्पापणेषु । (ष.त.पु.)

(२) बहुमूल्यप्रदाः – (A) बहूनि च तानि मूल्यानि च इति बहुमूल्यानि । (वि.पू.क.)

(B) बहुमूल्यानि प्रददति इति बहुमूल्यप्रदाः । (उप.त.पु.)

(३) अर्हद्भक्ताः – अर्हतः भक्ताः इति अर्हद्भक्ताः । (ष.त.पु.)

(४) पुष्पवृन्तानि – पुष्पाणां वृन्तानि इति पुष्पवृन्तानि, तानि पुष्पवृन्तानि । (ष.त.पु.)

**उपस्थिते[3] पर्युषणापर्वण्य[2]र्हदुपासकाः[6] ।**
**ततो[1] रुदन्तो[5] दीनास्या[4], वज्रर्षि[7]मुपतस्थिरे[8] ॥३४१॥**

**अन्वय :-** ततः पर्युषणापर्वणि उपस्थिते दीनास्याः रुदन्तः अर्हदुपासकाः वज्रर्षिम् उपतस्थिरे ।

**समास :-** (१) पर्युषणापर्वणि– (A) पर्युषणा नाम यस्य तद् इति पर्युषणानाम । (समा.ब.व्री.)

(B) पर्युषणानाम पर्व इति पर्युषणापर्व, तस्मिन् पर्युषणापर्वणि । (म.प.लो.क.)

(२) अर्हदुपासकाः - अर्हन्तम् उपासते इति अर्हदुपासकाः । (उप.त.पु.)

(३) दीनास्याः-दीनम् आस्यं येषां ते इति दीनास्याः । (समा.ब.व्री.)

(४) वज्रर्षिम् - वज्रर्षिः पूर्ववत्, तं वज्रर्षिम् ।

**ते[4] श्रावका[5] नेत्रजलैः[1], क्लेदयन्तो[3] महीतलम्[2] ।**
**नत्वा[7] व्यजिज्ञपन्[10] वज्रम्[6], खेदगद्गदया[8] गिरा[9] ॥३४२॥**

**अन्वय :-** नेत्रजलैः महीतलं क्लेदयन्तः ते श्रावकाः वज्रं नत्वा खेदगद्गदया गिरा व्यजिज्ञपन् ।

**समास :-** (१) नेत्रजलैः - (A) नेत्राभ्यां निःसृतानि इति नेत्र-निःसृतानि । (तृ.त.पु.)

(B) नेत्रनिःसृतानि जलानि इति नेत्रजलानि, तैः नेत्रजलैः । (म.प.लो.क.)

(२) महीतलम् - मह्याः तलम् इति महीतलम्, तद् महीतलम् । (ष.त.पु.)

(३) खेदगद्गदया - खेदेन गद्गदा इति खेदगद्गदा, तया खेदगद्गदया । (तृ.त.पु.)

**अर्हच्चैत्येष्वहरहः[2], पूजादि[3] द्रष्टुमक्षमैः[4][5] ।**
**बौद्धैर्[9] वयं[10] पराभूता[11], भूतैरिव[6][7] दुरात्मभिः[8] ॥३४३॥**

**अन्वय :-** अर्हच्चैत्येषु अहरहः पूजादि द्रष्टुम् अक्षमैः भूतैः इव दुरात्मभिः बौद्धैः वयं पराभूताः ।

**समास :-** (१) अर्हच्चैत्येषु- अर्हतः चैत्यानि इति अर्हच्चैत्यानि, तेषु अर्हच्चैत्येषु । (ष.त.पु.)

(२) अहरहः - अह्नि, अह्नि इति अहरहः । (अव्य.भा.)

(३) पूजादि - पूजा आदौ यस्मिन् तद् इति पूजादि, तद् पूजादि । (व्यधि.ब.व्री.)

(४) अक्षमैः - न क्षमाः इति अक्षमाः, तैः अक्षमैः । (नञ्.त.पु.)

(५) दुरात्मभिः - दुष्टः आत्मा येषां ते इति दुरात्मानः, तैः दुरात्मभिः । (प्रादि.ब.व्री.)

**विज्ञप्तो बौद्धलोकेन, बौद्धो राजा न्यवारयत् ।**
**पुष्पाणि ददतोऽस्माकम्, मालिकानखिलानपि ॥३४४॥**

**अन्वय :-** बौद्धलोकेन विज्ञप्तः बौद्धः राजा अस्माकं पुष्पाणि ददतः अखिलान् अपि मालिकान् न्यवारयत् ।

**समास :-** (१) बौद्धलोकेन - बौद्धश्चासौ लोकश्च इति बौद्धलोकः, तेन बौद्धलोकेन । (वि.पू.क.)

**लभामहे वयं नाथ । नागस्तिकुसुमान्यपि ।**
**किं कुर्मो द्रव्यवन्तोऽपि, राजाज्ञां कोऽतिलङ्घते ॥३४५॥**

**अन्वय :-** नाथ ! द्रव्यवन्तः अपि वयम् अगस्तिकुसुमानि अपि न लभामहे किं कुर्मः कः राजाज्ञाम् अतिलङ्घते ।

अगस्तिः - वृक्षविशेषः । 'अगथिया' इति भाषायाम् ।

**समास :-** (१) अगस्तिकुसुमानि - अगस्तेः कुसुमानि इति अगस्तिकुसुमानि, तानि अगस्तिकुसुमानि । (ष.त.पु.)

(२) द्रव्यवन्तः – द्रव्यम् अस्ति येषां ते इति द्रव्यवन्तः ।
(तद्धित)

(३) राजाज्ञाम् – राज्ञः आज्ञा इति राजाज्ञा, तां राजाज्ञाम् ।
(ष.त.पु.)

**तुलसीबर्बरीपूजापात्रतां[3] ग्रामयक्षवत्[1] ।**
**प्रयान्ति[4] जिनबिम्बानि[2], हहा[5] किं[8] जीवितेन[7] नः[6] ॥३४६॥**

**अन्वय :-** ग्रामयक्षवत् जिनबिम्बानि तुलसीबर्बरीपूजापात्रतां प्रयान्ति हहा नः जीवितेन किम् ।

बर्बरी – बावल इति भाषायाम् ।

**समास :-** (१) तुलसीबर्बरीपूजापात्रताम् –

(A) तुलसी च बर्बरी च इति तुलसीबर्बर्यौ (इ.द्व.)

(B) तुलसीबर्बरीभ्यां (कृता) पूजा इति तुलसीबर्बरीपूजा । (तृ.त.पु.)

(C) तुलसीबर्बरीपूजायाः पात्रम् इति तुलसीबर्बरीपूजापात्रम् । (ष.त.पु.)

(D) तुलसीबर्बरीपूजापात्रस्य भावः इति तुलसीबर्बरीपूजापात्रता, तां तुलसीबर्बरीपूजापात्रताम् । (तद्धित)

(२) ग्रामयक्षवत् – (A) ग्रामं रक्षतीति ग्रामरक्षकः । (उप.त.पु.)

(B) ग्रामरक्षकः यक्षः इति ग्रामयक्षः ।
(म.प.लो.क.)

(C) ग्रामयक्षः इव इति ग्रामयक्षवत् । (तद्धित)

(३) जिनबिम्बानि-जिनानां बिम्बानि इति जिनबिम्बानि ।
(ष.त.पु.)

**मार्हत्स्वारोपयन्त्वेते, छद्मनेत्यभिशङ्कितैः ।**
**बौद्धैः पुष्पं निषिद्धं नः, केशवासकृतेऽपि हि ॥३४७॥**

**अन्वय :-** एते छद्मना अर्हत्सु मा आरोपयन्तु इति अभिशङ्कितैः बौद्धैः नः केशवासकृते अपि हि पुष्पं निषिद्धम् ।

**समास :-** (१) केशवासकृते- **(A)** केशानां वासः इति केशवासः । (ष.त.पु)
(B) केशवासस्य कृते इति केशवासकृते । (ष.त.पु.)

**किञ्चानिशं गणयतामु स्वामिन्नस्माकमङ्गुलीः ।**
**आगात्पर्युषणापर्वदिनं दिनमतल्लिका ॥३४८॥**

**अन्वय :-** स्वामिन् ! किञ्च अनिशम् अङ्गुलीः गणयताम् अस्माकं दिनमतल्लिका पर्युषणापर्वदिनम् आगात् ।

**समास :-** (१) पर्युषणापर्वदिनम् - **(A)** पर्युषणापर्व-पूर्ववत् ।
(B) पर्युषणापर्वणः दिनम् इति पर्युषणापर्वदिनम् । (ष.त.पु.)
(२) दिनमतल्लिका - मतल्लिका च तद् दिनं च इति दिनमतल्लिका । (मयू.कर्म.)

**पर्वण्यप्यागतेऽमुष्मिन्वयं यतिवदर्हताम् ।**
**भावपूजां करिष्यामः, पुष्पसम्पत्तिवर्जिताः ॥३४९॥**

***अन्वय :-*** *अमुष्मिन् पर्वणि आगते अपि पुष्पसम्पत्तिवर्जिताः वयं* यतिवद् अर्हतां भावपूजां करिष्यामः ।

समास :- (१) यतिवद् - यतयः इव यतिवद् । (तद्धित)

(२) भावपूजाम् - **(A)** भावः प्रधानं यस्यां सा इति भावप्रधाना । (समा.ब.व्री.)

(B) भावप्रधाना पूजा इति भावपूजा, तां भावपूजाम् । (म.प.लो.क.)

(३) पुष्पसम्पत्तिवर्जिताः - **(A)** पुष्पाणि एव सम्पत्तिः इति पुष्पसम्पत्तिः । (अव.पू.क.)

(B) पुष्पसम्पत्त्याः वर्जिताः इति पुष्पसम्पत्ति-वर्जिताः । (पं.त.पु.)

**पराभूय[७] पराभूय[८], बौद्धै[६]र्दुर्बुद्धिभि[५]र्वयम्[९] ।**
**जीवन्मृता[१०] इव[११] कृता[१२]:, स्वामिनि[२] त्वयि[१] सत्ये[३]पि[४] ॥३५०॥**

अन्वय :- त्वयि स्वामिनि सति अपि दुर्बुद्धिभिः बौद्धैः पराभूय पराभूय वयं जीवन्मृताः इव कृताः ।

समास :- (१) दुर्बुद्धिभिः - दुष्टा बुद्धिः येषां ते इति दुर्बुद्धयः, तैः दुर्बुद्धिभिः । (प्रादि.ब.व्री.)

(२) जीवन्मृताः - जीवन्तः मृताः इव इति जीवन्मृताः । (वि.उभ.क.)

**जिनप्रवचन[४]स्याभिभूत[२]स्यास्य[३] प्रभावनाम्[५] ।**
**विधाय[६] भगव[१]न्नस्मान्[७], सञ्जीवयि[८]तुमर्हसि[९] ॥३५१॥**

अन्वय :- भगवन् ! अभिभूतस्य अस्य जिनप्रवचनस्य प्रभावनां विधाय अस्मान् सञ्जीवयितुम् अर्हसि ।

समास :- (१) जिनप्रवचनस्य - जिनस्य प्रवचनम् इति जिनप्रवचनम्, तस्य जिनप्रवचनस्य । (ष.त.पु.)

**समाश्वसत हे श्राद्धाः!, यतिष्ये वः सुतेजसे ।**
**इत्युक्त्वा भगवान् व्योमन्युत्पपात सुपर्णवत् ॥३५२॥**

**अन्वय :-** हे श्राद्धाः ! समाश्वसत वः सुतेजसे यतिष्ये इति उक्त्वा भगवान् व्योमनि सुपर्णवत् उत्पपात ।

**समास :-** (१) सुतेजसे- शोभनं तेजः इति सुतेजः, तस्मै सुतेजसे । (सु.पू.क.)

(२) सुपर्णवत् - सुपर्णः इव इति सुपर्णवत् । (तद्धित)

**स्वामी निमेषमात्रेणाथागान्माहेश्वरीं पुरीम् ।**
**अवातारीदुपवने, चैकस्मिन्विस्मयावहे ॥३५३॥**

**अन्वय :-** अथ स्वामी निमेषमात्रेण माहेश्वरीं पुरीम् आगात् विस्मयावहे च एकस्मिन् उपवने अवातारीद् ।

**समास :-** (१) निमेषमात्रेण - निमेषः एव इति निमेषमात्रम्, तेन निमेषमात्रेण । (मयू.कर्म.)

(२) उपवने - उपवनम् - पूर्ववत्, तस्मिन् उपवने ।

(३) विस्मयावहे - विस्मयम् आवहति इति विस्मयावहम्, तस्मिन् विस्मयावहे । (उप.त.पु.)

**हुताशनाभिधानस्य, देवस्योपवनं च तत् ।**
**योऽभूदारामिकस्तत्र, मित्रं धनगिरेः स तु ॥३५४॥**

**अन्वय :-** तत् हुताशनाभिधानस्य देवस्य उपवनम् (आसीत्) तत्र च तु यः आरामिकः सः धनगिरेः मित्रम् अभूत् ।

समास :- (१) हुताशनाभिधानस्य – हुताशनः अभिधानं यस्य सः इति हुताशनाभिधानः, तस्य हुताशनाभिधानस्य । (समा.ब.व्री.)

(२) उपवनम् – पूर्ववत् ।

**अकस्मादागतं वज्रम्, निरीक्ष्यानभ्रवृष्टिवत् ।**
**आरामिकः प्रगे सद्यस्तडिताख्यो मुदावदत् ॥३५५॥**

अन्वय :- प्रगे अनभ्रवृष्टिवत् अकस्माद् आगतं वज्रं निरीक्ष्य ताडिताख्यः आरामिकः मुदा सद्यः अवदत् ।

समास :- (१) अनभ्रवृष्टिवत् – (A) न विद्यन्ते अभ्राणि यस्यां सा इति अनभ्रा । (नञ्.ब.व्री.)

(B) अनभ्रा चासौ वृष्टिश्च इति अनभ्रवृष्टिः । (वि.पू.क.)

(C) अनभ्रवृष्टिः इव इति अनभ्रवृष्टिवत् । (तद्धित)

(२) तडिताख्यः – तडितः आख्या यस्य सः इति तडिताख्यः । (समा.ब.व्री.)

**तिथिस्तिथिषु धन्येयम्, यस्यां त्वमतिथिर्मम ।**
**आत्मानं चाधुना धन्यम्, मन्येऽहं यत्स्मृतस्त्वया ॥३५६॥**

अन्वय :- तिथिषु इयं तिथिः धन्या यस्यां मम त्वम् अतिथिः (भूतः) अधुना च अहम् आत्मानं धन्यं मन्ये यत् त्वया स्मृतः ।

समास :- (१) अतिथिः – पूर्ववत् ।

**दिष्ट्या सुस्वप्नवदहम्, चित्तान्नापकृतस्त्वया ।**
**ममागास्त्वं यदतिथिः, किमातिथ्यं करोमि ते ? ॥३५७॥**

**अन्वय :-** दिष्ट्या सुस्वप्नवद् त्वया अहं चित्तात् न अपकृतः यद् त्वं मम अतिथिः आगाः ते किम् आतिथ्यं करोमि ?

**समास :-** (१) सुस्वप्नवद् - (A) शोभनः स्वप्नः इति सुस्वप्नः । (सू.पू.क.)

(B) सुस्वप्न इव इति सुस्वप्नवद् । (तद्धित)

(२) अतिथिः - पूर्ववत् ।

(३) आतिथ्यम् - अतिथेः भावः इति आतिथ्यम्, तद् आतिथ्यम् । (तद्धित)

**वज्रस्वाम्य[1]प्य[2]भिदधे[3], मम[5] ह्यु[10]द्यानपालक[4]! ।**
**पुष्पैः[6] प्रयोजनं[7] तानि[8], प्रदातुं[11] च[9] त्वमी[12]शिषे[13] ॥३५८॥**

**अन्वय :-** वज्रस्वामी अपि अभिदधे उद्यानपालक ! मम पुष्पैः प्रयोजनं तानि च हि प्रदातुं त्वम् ईशिषे ।

**समास :-** (१) वज्रस्वामी - पूर्ववत् ।

(२) उद्यानपालक !-उद्यानं पालयति इति उद्यानपालकः, तत्संबोधनम् उद्यानपालक! । (उप.त.पु.)

**मालाकारो[1]ऽवदत्[2]पुष्पादाने[3]नानुगृहाण[5] माम्[4] ।**
**भवन्ति[11] प्रत्यहं[8] पुष्पलक्षा[10] विंशति[9]रत्र[7] हि[6] ॥३५९॥**

**अन्वय :-** मालाकारः अवदत् पुष्पादानेन माम् अनुगृहाण हि अत्र प्रत्यहं विंशतिः पुष्पलक्षाः भवन्ति ।

**समास :-** (१) मालाकारः - मालां करोति इति मालाकारः । (उप.त.पु.)

(२) पुष्पादानेन - पुष्पाणाम् आदानम् इतिं पुष्पादानम्, तेन पुष्पादानेन । (ष.त.पु.)

(३) प्रत्यहम् – अहः अहः इति प्रत्यहम् । (अव्य.भा.)

(४) पुष्पलक्षाः–पुष्पाणां लक्षाः इति पुष्पलक्षाः ।
(ष.त.पु.)

**भगवानादिशत्तर्हि, पुष्पाणि प्रगुणीकुरु ।**
**आगच्छाम इतो गत्वा, यावदुद्यानरक्षक ! ॥३६०॥**

**अन्वय :-** भगवान् आदिशत् उद्यानरक्षक ! तर्हि यावद् इतः गत्वा आगच्छामः पुष्पाणि प्रगुणीकुरु ।

**समास :-** (१) प्रगुणीकुरु – (A) न प्रगुणानि इति अप्रगुणानि ।
(नञ्.त.पु.)

(B) अप्रगुणानि प्रगुणानि कुरु इति प्रगुणीकुरु ।
(गति.त.पु.)

(२) उद्यानरक्षक ! – उद्यानं रक्षति इति उद्यानरक्षकः, तत्संबोधनम् उद्यानरक्षक ! । (उप.त.पु.)

**एवमुक्त्वा पृषदश्व, इवोत्पत्य विहायसा ।**
**अक्षुद्रः क्षुद्रहिमवद्गिरिं वज्रमुनिर्ययौ ॥३६१॥**

**अन्वय :-** एवम् उक्त्वा विहायसा पृषदश्वः इव उत्पत्य अक्षुद्रः वज्रमुनिः क्षुद्रहिमवद्गिरिं ययौ ।

पृषदश्वः–वायुः ।

वायुः समीर–समिरौ पवनाशुगौ नभःश्वासो नभस्वद–ऽनिल–श्वसनाः समीरणः ॥ वातोऽहिकान्त–पवमान–मरुत्प्रकम्पनाः कम्पाक–नित्यगति–गन्धवह–प्रभञ्जनाः ॥११०६॥ मातरिश्वा जगत्प्राणः, पृषदश्वो महाबलः । मारुतः स्पर्शनो दैत्यदेवः । इत्यभिधाने ।

**समास :-** (१) पृषदश्वः - पृषन् अश्वः यस्य सः इति पृषदश्वः । (समा.ब.व्री.)

(२) अक्षुद्रः - न क्षुद्रः इति अक्षुद्रः । (नञ्.त.पु.)

(३) क्षुद्रहिमवद्गिरिम् - (A) क्षुद्रश्चासौ हिमवान् च इति क्षुद्रहिमवान् । (वि.पू.क.)

(B) क्षुद्रहिमवान् नाम यस्य सः इति क्षुद्रहिमवन्नामा । (समा.ब.व्री.)

(C) क्षुद्रहिमवन्नामा गिरिः इति क्षुद्रहिमवद्गिरिः, तं क्षुद्रहिमवद्गिरिम् । (म.प.लो.क.)

(४) वज्रमुनिः - पूर्ववत् ।

**गङ्गासिन्धुजलक्रीडाप्रसक्तसुरवारणम्[६] ।**
**दशमामृतकुण्डाभपद्मह्रदमनोरमम्[७] ॥३६२॥**
**सदावन्दारु दिविषत्सिद्धायतनमण्डितम्[८] ।**
**गायत्किम्पुरुषीगीतानुचरैणकदम्बकम्[९] ॥३६३॥**
**अनेकधातुमद्भूमिधृतसन्ध्याभ्रविभ्रमम्[१०] ।**
**भ्राम्यदुन्मत्तचमरीभम्भाभाङ्कारगह्वरम्[११] ॥३६४॥**
**नमेरुभूर्जतगरकिम्पाकाकुलमेखलम्[१२] ।**
**स[५] तं[१३] हिमाद्रिम्[१४] अद्राक्षीद्[१५], व्योमस्थो[४]ऽन्य[१] इवा[३]र्यमा[२] ॥३६५॥**

(चतुर्भिः कलापकम्)

**अन्वय :-** अन्यः अर्यमा इव व्योमस्थः सः गङ्गासिन्धुजलक्रीडाप्रसक्तसुरवारणम्, दशमामृतकुण्डाभपद्मह्रदमनोरमम्, सदावन्दारुदिविषत्सिद्धायतनमण्डितम्, गायत्किम्पुरुषी-

गीतानुचरैणकदम्बकम्, अनेकधातुमद्भूमिधृतसन्ध्याभ्रविभ्रमम्, भ्राम्यदुन्मत्तचमरीभम्भाभाङ्कारगह्वरम्, नमेरुभूर्जतगरकिम्पाकाकुलमेखलम्, तं हिमाद्रिम् अद्राक्षीत्।

नमेरुः- सुरपुन्नागतरुः। भूर्जः-भोजपत्रवृक्षः।

तगरः- तन्नामपादपः, 'मींढक' इतिभाषायाम्।

किम्पाकः- विषमयवृक्षः।

**समास :-** (१) गङ्गासिन्धुजलक्रीडाप्रसक्तसुरवारणम् - (A) गङ्गा च सिन्धुश्च एतयोः समाहारः गङ्गासिन्धु। (समा.द्व.)

(B) गङ्गासिन्धुनः जलम् इति गङ्गासिन्धुजलम्। (ष.त.पु.)

(C) गङ्गासिन्धुजले क्रियमाणा इति गङ्गासिन्धुजलक्रियमाणा। (स.त.पु.)

(D) गङ्गासिन्धुजलक्रियमाणा क्रीडा इति गङ्गासिन्धुजलक्रीडा। (म.प.लो.क.)

(E) गङ्गासिन्धुजलक्रीडायां प्रसक्ताः इति गङ्गासिन्धुजलक्रीडाप्रसक्ताः। (स.त.पु.)

(F) सुराणां वारणाः इति सुरवारणाः। (ष.त.पु.)

(G) गङ्गासिन्धुजलक्रीडाप्रसक्ताः सुरवारणाः यस्मिन् सः इति गङ्गासिन्धुजलक्रीडाप्रसक्तसुरवारणः, तं गङ्गासिन्धुजलक्रीडाप्रसक्तसुरवारणम्। (समा.ब.व्री.)

(२) दशमामृतकुण्डाभपद्महृदमनोरमम् -

(A) अमृतस्य कुण्डम् इति अमृतकुण्डम्। (ष.त.पु)

(B) दशानां पूरणम् इति दशमम्। (तद्धित)

(C) दशमञ्च तद् अमृतकुण्डञ्च इति दशमामृतकुण्डम्। (वि.पू.क.)

(D) दशमामृतकुण्डेन आभः इति दशमामृत-कुण्डाभः। (तृ.त.पु.)

(E) पद्मं नाम यस्य सः इति पद्मनामा। (समा.ब.व्री.)

(F) पद्मनामा ह्रदः इति पद्महृदः।

(G) दशमामृतकुण्डाभश्चासौ पद्महृदश्च इति दशमा-मृतकुण्डाभपद्महृदः। (वि.पू.क.)

(H) मनः रमयति यत्र इति मनोरमः। (उप.त.पु.)

(I) दशमामृतकुण्डाभपद्महृदेन मनोरमः इति दश-मामृतकुण्डाभपद्महृदमनोरमः, तं दशमामृत-कुण्डाभपद्महृदमनोरमम्। (तृ.त.पु.)

(३) सदावन्दारुदिविषत्सिद्धायतनमण्डितम् –

(A) सदा वन्दन्ते इत्येवंशीलाः इति सदावन्दारवः।

(B) दिवि सीदन्ति इति दिविषदः। (उप.त.पु.)

(C) सदावन्दारवश्चामी दिविषदश्च इति सदावन्दा-रुदिविषदः। (वि.पू.क.)

(D) सिद्धैः विराजितानि इति सिद्धविराजितानि। (तृ.त.पु.)

(E) सिद्धविराजितानि आयतनानि इति सिद्धाय-तनानि। (म.प.लो.क.)

(F) सदावन्दारुदिविषद्भिः युक्तानि इति सदा-वन्दारुदिविषद्युक्तानि। (तृ.त.पु.)

(G) सदावन्दारुदिविषद्युक्तानि सिद्धायतनानि इति सदावन्दारुदिवित्सिद्धायतनानि। (म.प.लो.क.)

(H) सदावन्दारुदिविषत्सिद्धायतनैः मण्डितः इति सदावन्दारुदिविषत्सिद्धायतनमण्डितः, तं सदावन्दारुदिविषत्सिद्धायतनमण्डितम् । (तृ.त.पु.)

(४) गायत्किम्पुरुषीगीतानुचरैणकदम्बकम् - (A) गायन्त्यश्चामूः किम्पुरुष्यश्च इति गायत्किम्पुरुष्यः । (वि.पू.क.)

(B) गायत्किम्पुरुषीणां गीतानि गायत्किम्पुरुषीगीतानि । (ष.त.पु.)

(C) गायत्किम्पुरुषीगीतानि अनुचरति इति गायत्किम्पुरुषीगीतानुचरः । (उप.त.पु.)

(D) एणानां कदम्बकः इति एणकदम्बकः । (ष.त.पु.)

(E) गायत्किम्पुरुषीगीतानुचरः एणकदम्बकः यस्मिन् सः इति गायत्किम्पुरुषीगीतानुचरैणकदम्बकः, तं गायत्किम्पुरुषीगीतानुचरैणकदम्बकम् । (समा.ब.व्री.)

(५) अनेकधातुमद्भूमिधृतसन्ध्याभ्रविभ्रमम् -

(A) न एके इति अनेके। (नञ्.त.पु.)

(B) अनेके च ते धातवश्च इति अनेकधातवः । (वि.पू.क.)

(C) अनेकधातवः सन्ति अस्याम् इति अनेकधातु-मती । (तद्धित)

(D) अनेकधातुमती चासौ भूमिश्च इति अनेकधातु-मद्भूमिः । (वि.पू.क.)

(E) सन्ध्यायाः अभ्रम् इति सन्ध्याभ्रम् । (ष.त.पु.)

(F) सन्ध्याभ्रस्य विभ्रमः इति सन्ध्याभ्रविभ्रमः । (ष.त.पु.)

(G) अनेकधातुमद्भूम्या धृतः इति अनेकधातुमद्-भूमिधृतः । (तृ.त.पु.)

(H) अनेकधातुमद्भूमिधृतः सन्ध्याभ्रविभ्रमः यस्मिन् सः इति अनेकधातुमद्भूमिधृतसन्ध्याभ्रविभ्रमः, तम् अनेकधातुमद्भूमिधृतसन्ध्याभ्रविभ्रमम् । (समा.ब.व्री.)

(६) भ्राम्यदुन्मत्तचमरीभम्भाभाङ्कारगह्वरम् -

(A) उन्मत्ताश्च ताः चमर्यश्च इति उन्मत्तचमर्यः । (वि.पू.क.)

(B) भ्राम्यन्त्यश्च ताः उन्मत्तचमर्यश्च इति भ्राम्य-दुन्मत्तचमर्यः । (वि.पू.क.)

(C) भ्राम्यदुन्मत्तचमरीणां भम्भाः इति भ्राम्यदुन्मत्त-चमरीभम्भाः । (ष.त.पु.)

(D) भ्राम्यदुन्मत्तचमरीभम्भानां भाङ्काराः इति भ्राम्यदुन्मत्तचमरीभम्भाभाङ्काराः । (ष.त.पु.)

(E) भ्राम्यदुन्मत्तचमरीभम्भाभाङ्कारैः गह्वरः इति

भ्राम्यदुन्मत्तचमरीभम्भाभाङ्कारगह्वरः, तं भ्राम्य-
दुन्मत्तचमरीभम्भाभाङ्कारगह्वरम् । (तृ.त.पु.)

(७) नमेरुभूर्जतगरकिम्पाकाकुलमेखलम् -

(A) नमेरवश्च भूर्जाश्च तगराश्च किम्पाकाश्च एतेषां समाहारः इति नमेरुभूर्जतगरकिम्पाकम् । (समा.द्व.)

(B) नमेरुभूर्जतगरकिम्पाकेन आकुला इति नमेरुभूर्जतगरकिम्पाकाकुला । (तृ.त.पु.)

(C) नमेरुभूर्जतगरकिम्पाकाकुला मेखला यस्मिन् सः इति नमेरुभूर्जतगरकिम्पाकाकुलमेखलः, तं नमेरुभूर्जतगरकिम्पाकाकुलमेखलम् । (समा.ब.व्री.)

(८) हिमाद्रिम्-(A) हिमैः आच्छादितः इति हिमाच्छादितः । (तृ.त.पु.)

(B) हिमाच्छादितः अद्रिः इति हिमाद्रिः, तं हिमाद्रिम् । (म.प.लो.क.)

(९) व्योमस्थः-व्योम्नि तिष्ठति इति व्योमस्थः । (उप.त.पु.)

**स[3] शाश्वतार्हत्प्रतिमा[5]ः, सिद्धायतनवर्तिनी[4]ः ।**
**ववन्दे[6] वन्द्यमानांह्रि[2]र्विद्याधरकुमारकै[1]ः ॥३६६॥**

**अन्वय :-** विद्याधरकुमारकैः वन्द्यमानांह्रिः सः सिद्धायतनवर्तिनीः शाश्वतार्हत्प्रतिमाः ववन्दे ।

**समास :-** (१) शाश्वतार्हत्प्रतिमाः - (A) अर्हतां प्रतिमाः इति अर्हत्प्रतिमाः । (ष.त.पु.)

(B) शश्वद् भवाः इति शाश्वत्यः । (तद्धित)

(C) शाश्वत्यश्च ताः अर्हत्प्रतिमाश्च इति शाश्वतार्हत्प्रतिमाः ताः शाश्वतार्हत्प्रतिमाः । (वि.पू.क.)

(२) सिद्धायतनवर्तिनीः – (A) सिद्धायतनानि–पूर्ववत् ।

(B) सिद्धायतनेषु वर्तन्ते इत्येवंशीलाः इति सिद्धायतनवर्तिन्यः, ताः सिद्धायतनवर्तिनीः । (उप.त.पु.)

(३) वन्द्यमानांह्रिः – वन्द्यमानौ अंह्री यस्य सः इति वन्द्यमानांह्रिः । (समा.ब.व्री.)

(४) विद्याधरकुमारकैः – (A) विद्याधराः – पूर्ववत् ।

(B) विद्याधराणां कुमारकाः इति विद्याधरकुमारकाः, तैः विद्याधरकुमारकैः । (ष.त.पु.)

**तरङ्गरङ्गशालास्थलास्यलासकपङ्कजम्[4] ।**
**पद्मसौगन्ध्यवहना[5][7]दिव मन्थरमारुतम्[6] ।।३६७।।**
**सञ्चरन्नीर[10]ज[11]मिव, क्रीडदप्सरसां[8] मुखैः[9] ।**
**उन्निद्रपङ्कजरजोधिवाससुभगोदकम्[12] ।।३६८।।**
**श्रीदेवीदेवतागारप्रगायदमरीजनम्[13] ।**
**पद्मह्रदं[14] जगा[15]माथ[1], वज्रर्षि[2]र्व्योमवर्त्मना[3] ।।३६९।।**

(त्रिभिर्विशेषकम्)

**अन्वय :–** अथ वज्रर्षिः व्योमवर्त्मना तरङ्गरङ्गशालास्थलास्यलासक-पङ्कजं पद्मसौगन्ध्यवहनात् मन्थरमारुतम् इव क्रीडदप्सरसां मुखैः सञ्चरन्नीरजम् इव उन्निद्रपङ्कजरजोधि-

वाससुभगोदकं श्रीदेवीदेवतागारप्रगायदमरीजनं पद्महृदं जगाम।

**समास :-** (१) तरङ्गरङ्गशालास्थलास्यलासकपङ्कजम् -

(A) तरङ्गानां रङ्गशाला इति तरङ्गरङ्गशाला। (ष.त.पु.)

(B) तरङ्गरङ्गशालायां तिष्ठन्ति इति तरङ्गरङ्गशालास्थानि। (उप.त.पु.)

(C) लास्यानि च तानि लासकानि च इति लास्यलासकानि। (वि.उभ.क.)

(D) पङ्कजानि - पूर्ववत्।

(E) तरङ्गरङ्गशालास्थानि लास्यलासकानि पङ्कजानि यस्मिन् सः इति तरङ्गरङ्गशालास्थलास्यलासकपङ्कजः, तं तरङ्गरङ्गशालास्थलास्यलासकपङ्कजम्। (समा.बहु.प.ब.व्री.)

(२) पद्मसौगन्ध्यवहनाद् - (A) शोभनः गन्धः इति सुगन्धः। (सू.पू.क.)

(B) सुगन्धः एव इति सौगन्ध्यम्। (तद्धित)

(C) पद्मानां सौगन्ध्यम् इति पद्मसौगन्ध्यम्।(ष.त.पु.)

(D) पद्मसौगन्ध्यस्य वहनम् इति पद्मसौगन्ध्यवहनम्, तस्मात् पद्मसौगन्ध्यवहनाद्। (ष.त.पु.)

(३) मन्थरमारुतम् - (A) मरुद् एव इति मारुतः। (तद्धित) ७/२/१६५ अण् प्रत्ययः।

(B) मन्थरश्चासौ मारुतश्च इति मन्थरमारुतः, तं मन्थरमारुतम्। (वि.पू.क.)

(४) सञ्चरन्नीरजम् – (A) नीरे जातानि इति नीरजानि। (उप.त.पु.)

(B) सञ्चरन्ति नीरजानि यस्मिन्सः इति सञ्चरन्नीरजः, तं सञ्चरन्नीरजम्। (समा.ब.व्री.)

(५) क्रीडदप्सरसाम् – क्रीडन्त्यश्चामूः अप्सरसश्च इति क्रीडदप्सरसः, तासां क्रीडदप्सरसाम्। (वि.पू.क.)

(६) उन्निद्रपङ्कजरजोधिवाससुभगोदकम् –

(A) पङ्कजानि – पूर्ववत्।

(B) उद्गता निद्रा येषां तानि इति उन्निद्राणि। (प्रादि.ब.व्री.)

(C) उन्निद्राणि च तानि पङ्कजानि च इति उन्निद्रपङ्कजानि। (वि.पू.क.)

(D) उन्निद्रपङ्कजानां रजांसि इति उन्निद्रपङ्कजरजांसि। (ष.त.पु.)

(E) उन्निद्रपङ्कजरजसाम् अधिवासः इति उन्निद्रपङ्कजरजोऽधिवासः। (ष.त.पु.)

(F) उन्निद्रपङ्कजरजोधिवासेन सुभगम् उदकं यस्मिन्सः इति उन्निद्रपङ्कजरजोधिवाससुभगोदकः, तम् उन्निद्रपङ्कजरजोऽधिवाससुभगोदकम्। (व्यधि.बहु. प. ब.व्री.)

(७) श्रीदेवीदेवतागारप्रगायदमरीजनम् – (A) श्रीः नाम यस्याः सा इति श्रीनामा। (समा.ब.व्री.)

(B) श्रीनामा देवी इति श्रीदेवी। (म.प.लो.क.)

(C) श्रीदेवी चासौ देवता च इति श्रीदेवीदेवता । (वि.पू.क.)

(D) श्रीदेवीदेवतायाः अगारम् इति श्रीदेवीदेवतागारम् । (ष.त.पु.)

(E) श्रीदेवीदेवतागारे प्रगायन्तः इति श्रीदेवीदेवता-गारप्रगायन्तः । (स.त.पु.)

(F) अमर्यः जनाः इति अमरीजनाः । (वि.पू.क.)

(G) श्रीदेवीदेवतागारप्रगायन्तः अमरीजनाः यस्मिन् सः इति श्रीदेवीदेवतागारप्रगायदमरीजनः, तं श्रीदेवीदेवतागारप्रगायदमरीजनम् (समा.ब.व्री.)

(८) पद्महृदम् - (A) पद्म नाम यस्य सः इति पद्मनामा । (समा.ब.व्री.)

(B) पद्मनामा हृदः इति पद्महृदः, तं पद्महृदम् । (म.प.लो.क.)

(९) वज्रर्षिः- पूर्ववत् ।

(१०) व्योमवर्त्मना - व्योम एव वर्त्म इति व्योमवर्त्म, तेन व्योमवर्त्मना । (अव.पू.क.)

**तदा[१] च[२] देवपूजार्थम[३]वचित्यै[६]कम[४]म्बुजम्[५] ।**
**श्रीदेव्या[९] देवतागारम्[७], यान्त्या[८] वज्रर्षि[१०]रैक्ष्यत[११] ॥३७०॥**

**अन्वयः-** तदा च देवपूजार्थम् एकम् अम्बुजम् अवचित्य देवतागारं यान्त्या श्रीदेव्या वज्रर्षिः ऐक्ष्यत ।

**समासः-** (१) देवपूजार्थम् - (A) देवपूजा - पूर्ववत् ।

(B) देवपूजायाः अर्थम् इति देवपूजार्थम् । (ष.त.पु.)

(२) अम्बुजम् - पूर्ववत् ।

(३) श्रीर्देव्या - श्रीदेवी-पूर्ववत्, तया श्रीदेव्या ।

(४) देवतागारम् - पूर्ववत् ।

(५) वज्रर्षिः - पूर्ववत् ।

**श्री[५]र्देवता[६] ववन्दे[१०] तम्[८], दृष्टमात्रं[७] मुनीश्वरम्[९] ।**
**रक्तोष्णीषप्रभाम्भोभिः[१], स्नपयन्ती[३]व[४] तत्क्रमौ[२] ॥३७१॥**

**अन्वयः-** रक्तोष्णीषप्रभाम्भोभिः तत्क्रमौ स्नपयन्ती इव श्रीः देवता दृष्टमात्रं तं मुनीश्वरं ववन्दे ।

**समासः-** (१) दृष्टमात्रम् - दृष्टः एव इति दृष्टमात्रः, तं दृष्टमात्रम् । (मयू.व्यं.कर्म.)

(२) मुनीश्वरम् - मुनीनाम् ईश्वरः इति मुनीश्वरः, तं मुनीश्वरम् । (ष.त.पु.)

(३) रक्तोष्णीषप्रभाम्भोभिः - (A) उष्णीषस्य प्रभाः इति उष्णीषप्रभाः । (ष.त.पु.)

(B) रक्ताश्च ताः उष्णीषप्रभाश्च इति रक्तोष्णीषप्रभाः । (वि.पू.क.)

(C) रक्तोष्णीषप्रभा एव अम्भांसि इति रक्तोष्णीष-प्रभाम्भांसि, तैः रक्तोष्णीषप्रभाम्भोभिः । (अव.पू.क.)

(४) तत्क्रमौ - तस्य क्रमौ इति तत्क्रमौ, तौ तत्क्रमौ । (ष.त.पु.)

**धर्मलाभाशिषं[१] दत्त्वा[२], तस्थिवांसं[३] तु[४] तं[५] मुनिम्[६] ।**
**बद्धाञ्जलिः[७] श्री[८]रवद्दा[९]ज्ञापय करोमि[११] किम्[१०] ॥३७२॥**

**अन्वयः-** धर्मलाभाशिषं दत्त्वा तस्थिवांसं तु तं मुनिं बद्धाञ्जलिः श्रीः अवदद् किं करोमि आज्ञापय।

**समासः-** (१) धर्मलाभाशिषम् - (A) धर्मस्य लाभः इति धर्मलाभः। (ष.त.पु.)

(B) धर्मलाभस्य आशीः इति धर्मलाभाशीः, तां धर्मलाभाशिषम्। (ष.त.पु.)

(२) बद्धाञ्जलिः-बद्धः अञ्जलिः यया सा इति बद्धाञ्जलिः। (समा.ब.व्री.)

**जगाद वज्रो भगवानादिष्टमिदमेव ते।**
**पाणिपद्मस्थितं पद्ममिदं पद्मे! ममार्प्यताम्॥३७३॥**

**अन्वयः-** भगवान् वज्रः जगाद पद्मे! ते पाणिपद्मस्थितम् इदं पद्मं मम अर्प्यताम् इदम् एव आदिष्टम्।

**समासः-** (१) पाणिपद्मस्थितम् - (A) पाणिरेव पद्मम् इति पाणिपद्मम्। (अव.पू.क.)

(B) पाणिपद्मे स्थितम् इति पाणिपद्मस्थितम्। (स.त.पु.)

**स्वामिन्! किमेतदादिष्टमिन्द्रोपवनजान्यपि।**
**पुष्पाण्यानेतुमीशास्मीत्युक्त्वा सा पद्ममार्पयत्॥३७४॥**

**अन्वयः-** स्वामिन्! एतद् किम् आदिष्टम् इन्द्रोपवनजानि अपि पुष्पाणि आनेतुम् ईशा अस्मि इति उक्त्वा सा पद्मम् आर्पयत्।

**समासः-** (१) इन्द्रोपवनजानि - (A) उपवनम् - पूर्ववत्।

(B) इन्द्रस्य उपवनम् इति इन्द्रोपवनम्। (ष.त.पु.)

(C) इन्द्रोपवने जातानि इति इन्द्रोपवनजानि, तानि इन्द्रोपवनजानि । (उप.त.पु.)

**वन्दितश्च श्रिया वज्रः, पुनरुत्पत्य सत्वरम् ।**
**पथा यथागतेनैव, हुताशनवनं ययौ ॥३७५॥**

**अन्वयः-** श्रिया च वन्दितः वज्रः पुनः उत्पत्य यथागतेन पथा एव सत्वरं हुताशनवनं ययौ ।

**समासः-** (१) सत्वरम् - त्वरया सह वर्तते यद् तद् इति सत्वरम् । (सह.ब.व्री.)

(२) यथागतेन - आगतस्य अनुरूपम् इति यथागतम्, तेन यथागतेन । (अव्य.भा.)

(३) हुताशनवनम् - (A) हुताशनं नाम यस्य तद् इति हुताशननाम । (समा.ब.व्री.)

(B) हुताशननाम वनम् इति हुताशनवनम्, तद् हुताशनवनम् । (म.प.लो.क.)

**विद्याशक्त्या च भगवान्, विमानं व्यकरोदथ ।**
**पालकस्यानुजन्मेव, बन्धुरं विविधर्द्धिभिः ॥३७६॥**

**अन्वयः-** अथ भगवान् च विद्याशक्त्या विविधर्द्धिभिः बन्धुरं पालकस्य अनुजन्मा इव विमानं व्यकरोद् ।

**समास :-** (१) विद्याशक्त्या -पूर्ववत् ।

(२) अनुजन्म - अनुगतं जन्म यस्य तद् इति अनुजन्म । (प्रादि.ब.व्री.)

(३) विविधर्द्धिभिः – विविधाः ऋद्धयः इति विविधर्द्धयः, ताभिः विविधर्द्धिभिः । (वि.पू.क.)

**अस्थापयच्च तन्मध्ये, श्रीदेव्यर्पितमम्बुजम् ।**
**विंशतिं पुष्पलक्षाणि, तस्य पार्श्वेषु तु न्यधात् ॥३७७॥**

**अन्वयः-** तन्मध्ये च श्रीदेव्यर्पितम् अम्बुजम् अस्थापयत् तस्य पार्श्वेषु तु विंशतिं पुष्पलक्षाणि न्यधात् ।

**समासः-** (१) तन्मध्ये – तस्य मध्यम् इति तन्मध्यम्, तस्मिन् तन्मध्ये । (ष.त.पु.)

(२) श्रीदेव्यर्पितम् – (A) श्रीदेवी–पूर्ववत् ।

(B) श्रीदेव्या अर्पितम् इति श्रीदेव्यर्पितम् तद् श्रीदेव्यर्पितम् । (तृ.त.पु.)

(३) अम्बुजम् – पूर्ववत् ।

(४) पुष्पलक्षाणि – पुष्पाणां लक्षाणि इति पुष्पलक्षाणि, तानि पुष्पलक्षाणि । (ष.त.पु.)

**स्मरति स्म तदा वज्रो, भगवाञ्जृम्भकामरान् ।**
**ते वज्रं वज्रिणमिव, तत्क्षणाच्चोपतस्थिरे ॥३७८॥**

**अन्वयः-** तदा भगवान् वज्रः जृम्भकामरान् स्मरति स्म ते च वज्रिणम् इव वज्रं तत्क्षणात् उपतस्थिरे ।

**समासः-** (१) जृम्भकामरान्– जृम्भकामराः – पूर्ववत्, तान् जृम्भकामरान् ।

(२) वज्रिणम् – वज्रः अस्ति यस्य इति वज्री, तं वज्रिणम् । (तद्धित)

(३) तत्क्षणात् – स चासौ क्षणश्च इति तत्क्षणः, तस्मात् तत्क्षणात् । (वि.पू.क.)

**छत्रस्येवाम्बुजस्याधो, धनगिर्यात्मभूर्मुनिः ।**
**निषद्य व्योमयानाय, विमानवरमादिशत् ॥३७९॥**

**अन्वयः-** धनगिर्यात्मभूः मुनिः छत्रस्य इव अम्बुजस्य अधः निषद्य विमानवरं व्योमयानाय आदिशत् ।

**समासः-** (१) अम्बुजस्य - पूर्ववत् ।

(२) धनगिर्यात्मभूः - (A) आत्मभूः - पूर्ववत् ।

(B) धनगिरेः आत्मभूः इति धनगिर्यात्मभूः । (ष.त.पु.)

(३) व्योमयानाय - व्योम्नि यानम् इति व्योमयानम्. तस्मै व्योमयानाय । (स.त.पु.)

(४) विमानवरम् - विमानश्चासौ वरश्च इति विमानवरः, तं विमानवरम् । (वि.उत्त.क.)

**तस्मिन् विमाने चलिते, जृम्भका अपि नाकिनः ।**
**चेलुर्विमानारूढास्ते, गीतवाद्यादिपूर्वकम् ॥३८०॥**

**अन्वयः-** तस्मिन् विमाने चलिते विमानारूढाः ते जृम्भकाः नाकिनः अपि गीतवाद्यादिपूर्वकं चेलुः ।

**समासः-** (१) विमानारूढाः - विमाने आरूढाः इति विमानारूढाः । (स.त.पु.)

(२) गीतवाद्यादिपूर्वकम् - (A) गीतं वाद्यम् आदौ यस्मिन् तद् इति गीतवाद्यादि । (व्यधि.ब.प.ब.व्री.)

(B) गीतवाद्यादिना पूर्वकम् इति गीतवाद्यादि-पूर्वकम् तद् गीतवाद्यादिपूर्वकम् । (तृ.त.पु.)

**वैमानिकैर्विमानस्थैर्विमानस्थः समावृतः ।**
**पुरीं नाम पुरीं प्राप, वज्रस्तां बौद्धदूषिताम् ॥३८१॥**

**अन्वयः-** विमानस्थैः वैमानिकैः समावृतः विमानस्थः वज्रः बौद्धदूषितां तां पुरीं नाम पुरीं प्राप ।

**समासः-** (१) विमानस्थैः – विमाने तिष्ठन्ति इति विमानस्थाः, तैः विमानस्थैः । (उप.त.पु.)

(२) विमानस्थः--पूर्ववत् ।

(३) वैमानिकैः – विमाने जाताः इति वैमानिकाः, तैः वैमानिकैः । (तद्धित)

(४) बौद्धदूषिताम् – (A) बौद्धाः – पूर्ववत् ।

(B) बौद्धैः दूषिता इति बौद्धदूषिता, तां बौद्धदूषिताम् । (तृ.त.पु.)

**तत्पुरीवासिनो बौद्धा, विमानानि निरीक्ष्य खे ।**
**अभाषन्तैवमुत्पश्या, उत्पुप्लुषोद्यता इव ॥३८२॥**

**अन्वयः-** खे विमानानि निरीक्ष्य उत्पुप्लुषोद्यताः इव उत्पश्याः तत्पुरीवासिनः बौद्धाः एवम् अभाषन्त ।

"उत्पश्य उन्मुखः" । (४५७) इत्यभिधाने ।

**समासः-** (१) तत्पुरीवासिनः – (A) सा च सा पुरी च इति तत्पुरी । (वि.पू.क.)

(B) तत्पुर्यां वसन्तीति तत्पुरीवासिमः । (उप.त.पु.)

(२) उत्पश्याः– ऊर्ध्वं पश्यन्तीति उत्पश्याः । (उप.त.पु.)

'घ्राध्मा. ५/१/५८ श प्रत्ययः ।

(३) उत्पुप्लुषोद्यताः- (A) उत्प्लोतुम् इच्छा इति उत्पुप्लुषा । शंसि-प्रत्ययात् ५/१/१०५ अ प्रत्ययः ।

(B) उत्पुप्लुषया उद्यताः इति उत्पुप्लुषोद्यताः । (तृ.त.पु.)

**सप्रभावमहो ! बौद्धदर्शनं प्रेक्ष्य नाकिनः ।**
**बुद्धपूजार्थमायान्ति, श्रीबुद्धाय नमोनमः ॥३८३॥**

**अन्वयः-** अहो ! बौद्धदर्शनं सप्रभावं प्रेक्ष्य नाकिनः बुद्धपूजार्थम् आयान्ति । श्रीबुद्धाय नमः नमः ।

**समासः-** (१) सप्रभावम् - प्रभावेन सह वर्तते यद् तद् इति सप्रभावम्, तद् सप्रभावम् । (सह.ब.व्री)

(२) बौद्धदर्शनम् - (A) बौद्धाः - पूर्ववत् ।

(B) बौद्धानां दर्शनम् इति बौद्धदर्शनम्, तद् बौद्धदर्शनम् । (ष.त.पु.)

(३) बुद्धपूजार्थम् - (A) बुद्धस्य पूजा इति बुद्धपूजा । (ष.त.पु.)

(B) बुद्धपूजायाः अर्थम् इति बुद्धपूजार्थम् । (ष.त.पु.)

(४) श्रीबुद्धाय - (A) श्रिया युक्तः इति श्रीयुक्तः । (तृ.त.पु.)

(B) श्रीयुक्तः बुद्धः इति श्रीबुद्धः, तस्मै श्रीबुद्धाय । (म.प.लो.क.)

**तेषां च वदतामेवम्, वज्रोऽर्हत्सदनं ययौ ।**
**विमानैर्दर्शयन् व्योम्नि, गान्धर्वनगरश्रियम् ॥३८४॥**

**अन्वयः-** तेषां च एवं वदतां व्योम्नि विमानैः गान्धर्वनगरश्रियं दर्शयन् वज्रः अर्हत्सदनं ययौ ।

**समासः-** (१) अर्हत्सदनम् - अर्हतां सदनम् इति अर्हत्सदनम्, तद् अर्हत्सदनम् । (ष.त.पु.)

(२) गान्धर्वनगरश्रियम् - (A) गान्धर्वाणां नगरम् इति गान्धर्वनगरम् । (ष.त.पु.)

(B) गान्धर्वनगरस्य श्रीः इति गान्धर्वनगरश्रीः, तां गान्धर्वनगरश्रियम् । (ष.त.पु.)

**पुनर्बौद्धैरभिदधे, मषीधौताननैरिव ।**
**अहो ! अर्हद्दर्शनेऽभूदियं दैवी प्रभावना ॥३८५॥**

**अन्वयः-** मषीधौताननैः इव बौद्धैः पुनः अभिदधे अहो ! इयं दैवी प्रभावना अर्हद्दर्शने अभूत् ।

**समास :-** (१) मषीधौताननैः (A) मष्या धौतम् इति मषीधौतम् । (तृ.त.पु.)

(B) मषीधौतम् आननं येषां ते इति मषीधौताननाः, तैः मषीधौताननैः । (समा.ब.व्री.)

(२) अर्हद्दर्शने - अर्हतां दर्शनम् इति अर्हद्दर्शनम्, तस्मिन् अर्हद्दर्शने । (ष.त.पु.)

(३) दैवी-देवैः कृता इति दैवी । (तद्धित) 'कृते' ६/३/१९२ ॥ अण् प्रत्ययः+ङी ।

**चिन्तितमन्यथास्माभिरन्यथेदमुपस्थितम् ।**
**दृष्टिः प्रसारिताप्यस्थाद् वायुना नीतमञ्जनम् ॥३८६॥**

**अन्वयः-** अस्माभिः अन्यथा चिन्तितम् इदम् अन्यथा उपस्थितं दृष्टिः प्रसारिता अस्थाद् अपि अञ्जनं वायुना नीतम् ।

**ततः पर्युषणापर्वण्यर्हदायतनेऽमरैः ।**
**महीयान्महिमाऽकारि, भूस्पृशां यो न गोचरः ॥३८७॥**

**अन्वयः-** ततः अमरैः पर्युषणापर्वणि अर्हदायतने महीयान् महिमा अकारि यः भूस्पृशां न गोचरः (अस्ति) ।

**समासः-** (१) अमरैः - नास्ति मरः येषां ते इति अमराः, तैः अमरैः । (नञ्.ब.व्री.)

(२) पर्युषणापर्वणि - पर्युषणापर्व - पूर्ववत्, तस्मिन् पर्युषणापर्वणि । (म.प.लो.क.)

(३) अर्हदायतने - अर्हताम् आयतनम् इति अर्हदायतनम्, तस्मिन् अर्हदायतने । (ष.त.पु.)

(४) महीयान् - अयमनयोरतिशयेन महान् इति महीयान् । (तद्धित) ७/३/९ ईयसु प्रत्ययः ।

(५) भूस्पृशाम् - भुवं स्पृशन्तीति भूस्पृशः, तेषां भूस्पृशाम् । (उप.त.पु.)

**जृम्भकामरकृतां प्रभावनामर्हतो भगवतो निरीक्ष्य ताम् ।**
**बौद्धभावमपहाय पार्थिवः सप्रजोऽपि परमार्हतोऽभवत् ॥३८८॥**

**अन्वयः-** अर्हतः भगवतः जृम्भकामरकृतां तां प्रभावनां निरीक्ष्य सप्रजः पार्थिवः अपि बौद्धभावम् अपहाय परमार्हतः अभवत् ।

**समासः-** (१) जृम्भकामरकृताम् - (A) जृम्भकामराः - पूर्ववत्।

(B) जृम्भकामरैः कृता इति जृम्भकामरकृता, तां जृम्भकामरकृताम्। (तृ.त.पु.)

(२) बौद्धभावम् - (A) बौद्धः - पूर्ववत्।

(B) बौद्धस्य भावः इति बौद्धभावः, तं बौद्धभावम्। (ष.त.पु.)

(३) सप्रजः- प्रजया सह वर्तते यः सः इति सप्रजः। (सह.ब.व्री.)


(४) परमार्हतः- (A) अर्हन् देवता यस्य सः आर्हतः (तद्धित) 'देवता' ६/२/१०१... अण् प्रत्ययः।


(B) परमश्च सः आर्हतश्च इति परमार्हतः। (वि.पू.क.)


**इत्याचार्यश्रीहेमचन्द्रविरचिते परिशिष्टपर्वणि स्थविरावलीचरिते महाकाव्ये वज्रस्वामि-जन्म-व्रत-प्रभाववर्णनो नाम द्वादशः सर्गः ॥**

**समाप्त**









**BHARAT GRAPHICS** - Ahmedabad-1
Ph. : 079-22134176, M : 9925020106